धुक्ष्व॥मधुश्चुतंघृतमिवसुपूतमृतस्यनःपतयोमृडयंतु॥अग्नेनयसुपथारा
येअस्मान्विश्वानिदेववयुनानिविद्वान्॥युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांते
नमउक्तिंविधेम॥आदेवानामपिपंथामगन्मयच्छक्नवामतदनुप्रवोढुं॥अग्निर्वि
द्वांत्सयजात्॥३॥सेदुहोतासोअध्वरांत्सऋतून्कल्पयाति॥यद्वाहिष्ठंतदग्नयेबृ
हदर्चविभावसो॥महिषीवत्वद्रयिस्त्वद्वाजाउदीरते॥अग्नेत्वंपारयानव्योअस्मा ॥७॥

स्वस्तिभिरति दुर्गाणि विश्वा ॥ पृथ्वी पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः
॥ त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा ॥ त्वं यज्ञेष्वीड्यः ॥ यद्वो वयं प्रमिनाम व्रतानि वि
दुषां देवा अविदुष्टरासः ॥ अग्निष्टद्विश्वमा पृणाति विद्वान्येभिर्देवाꣳ ऋतुभिः क
ल्पयाति ॥४॥ जुषेथामा सनो यजा दात्रयो विंशतिश्च ॥१४॥ ॥छ॥ ॥इषे त्वा य
ज्ञस्य शुंधध्वं कर्मणे वां देवो व धूतं धृष्टिः सं वपाम्या ददे प्रत्युष्टं कृष्णोसि भुवन
मसि वाजस्यो भा वां चतुर्दश ॥३४॥ इषे द्वे ह भुवनमष्टाविंशतिः ॥२८॥ ॥इषे
त्वा कल्पयाति ॥ ॥छ॥ ॥छ॥ ॥हरिः ॐ॥ ॥आप उंदंतु जीवसे दीर्घायुत्वाय
वर्चस ओषधे त्रायस्वैनꣳ स्वधिते मैनꣳ हिꣳसीर्देवश्रूरेतानि प्रवपे स्वस्त्युत्तरा
ण्यशीयापो अस्मान्मातरः शुंधंतु घृतेन नो घृतप्वः पुनंतु विश्वमस्मत्प्रवहंतु रि

॥प्र०स०२॥ ॥८॥

ग्रमुदाभ्युः शक्र चिरापूतएमिसोमस्यतनूरसितनुवंमेपाहिमहीनांपयोसिवर्चोधा
असिवर्चः॥१॥मयिधेहिवृत्रस्यकनीनिकासिचक्षुष्पाअसिचक्षुर्मेपाहिचित्प
तिस्त्वापुनातुवाक्पतिस्त्वापुनातुदेवस्त्वासवितापुनात्वछिद्रेणपवित्रेणवसोःसू
र्यस्यरश्मिभिस्तस्यतेपवित्रपतेपवित्रेणयस्मैकंपुनेतच्छकेयमावोदेवासईमहे
सत्यधर्माणोअध्वरेयद्वोदेवासआगुरेयज्ञियासोहवामहइंद्राग्नीद्यावापृथि
वीआपओषधीस्त्वंदीक्षाणामधिपतिरसीहमासंतंपाहि॥२॥वर्चओषधीरुष्टौ
च॥१॥ ॥आकूत्यैप्रयुजेग्नयेस्वाहामेधायैमनसेग्नयेस्वाहादीक्षायैतपसेग्नये
स्वाहासरस्वत्यैपूष्णेग्नयेस्वाहापोदेवीर्बृहतीविश्वशंभुवोद्यावापृथिवीउर्वंत
रिक्षंबृहस्पतिर्नोहविषावृधातुस्वाहाविश्वेदेवस्यनेतुर्मर्त्तोवृणीतसख्यंविश्वेरा ॥५॥

यइषुध्यसिद्युम्नंवृणीतपुष्यसेस्वाहर्क्सामयोःशिल्पेस्थस्तेवामारभेतेमा॥१॥
पातमास्ययज्ञस्योदृचइमांधियꣳशिक्षमाणस्यदेवक्रतुंदक्षंवरुणसꣳशिशाधि
ययातिविश्वादुरितातरेमसुतर्माणमधिनावꣳरुहेमोर्गस्यांगिरस्यूर्णम्रदाऊर्जं
मेयच्छपाहिमामामाहिꣳसीर्विष्णोःशर्मासिशर्मयजमानस्यशर्ममेयच्छनक्षत्राणां
मातीकाशात्पाहीन्द्रस्ययोनिरसि॥२॥मामाहिꣳसीःकृष्यैत्वासुसस्यायैसुपिप्प
लाभ्यस्त्वौषधीभ्यःसूपस्थादेवोवनस्पतिरूर्ध्वोमापात्योदृचःस्वाहायज्ञंमनसा
स्वाहाद्यावापृथिवीभ्याꣳस्वाहोरोरन्तरिक्षात्स्वाहायज्ञंवातादारभे॥३॥मायोनि
रसित्रिꣳशच्च॥२॥ ॥दैवींधियंमनामहेसुमृडीकामभिष्टयेवर्चोधांयज्ञवाहस
ꣳसुपारानोअसद्वशे॥येदेवामनोजातामनोयुजःसुदक्षादक्षपितारस्तेनःपान्तु

।प्र०स०२॥ तेनोवंतुतेभ्योनमुस्तेभ्यःस्वाहाग्नेत्वꣳसुजागृहिवयꣳसुमंदिषीमहिगोपायनःस्व
॥१॥ स्तयेप्रबुधेनःपुनर्ददः॥त्वमग्नेव्रतपाअसिदेवआमर्त्येष्वा॥त्वं॥१॥यज्ञेष्वीड्यः॥वि
श्वेदेवाअभिमामावंवृत्रन्पूषासन्यासोमोराधसादेवःसवितावसोर्वसुदावारास्व
यत्सोमाभूयोभरमापृणन्पूर्त्याविराधिमाहमायुषाचंद्रमसिममभोगायभवव
स्त्रमसिममभोगायभवोस्रासिममभोगायभवहयोसिममभोगायभव॥२॥छा
गोसिममभोगायभवमेषोसिममभोगायभववायवेत्वावरुणायत्वानिर्ऋत्यैत्वा
रुद्रायत्वादेवीरापोअपान्नपाद्यऊर्मिर्हविष्यइंद्रियावान्मदिंतमस्तंवोमावक्रमि
षमच्छिन्नंतंतुंपृथिव्याअनुगेषंभद्रादभिश्रेयःप्रेहिबृहस्पतिःपुरएतातेअस्त्वथे
मवस्यवरआपृथिव्याआरेशत्रून्कृणुहिसर्ववीरएदमगन्मदेवयजनंपृथिव्या ॥१॥

विश्वैर्द्देवायद्रजुषंतपूर्वंऋक्सामाभ्यांयजुषासंतरंतोरायस्पोषेणसमिषामदेम॥
॥१॥आत्वंहयौसिममभोगोयभवस्यपंचविंशतिश्च॥३॥ ॥इयंतेशुक्रतनूरिदं
वर्चस्तयासंभवभ्राजंगछजूरसिधृतामनसाजुष्टाविष्णवेतस्यास्तेसत्यसवसः
प्रसवेवाचोयंत्रमशीयस्वाहाशुक्रमस्यमृतमसिवैश्वदेवंहविःसूर्यस्यचक्षुरा
रुहमग्नेरक्ष्णःकनीनिकांयदेतशेभिरीयसेभ्राजमानोविपश्चिताचिदसिमनासि
धीरसिदक्षिणा॥१॥असियज्ञियासिक्षत्रियास्यदितिरस्युभयतःशीर्ष्णीसानःसु
प्राचीसुप्रतीचीसंभवमित्रस्त्वापदिबध्नातुपूषाध्वनःपात्विंद्रायाध्यक्षायानुत्वामा
तामन्यतामनुपितानुभ्रातासगर्भ्योनुसखासयूथ्यःसादेविदेवमछेहींद्रायसोमं
रुद्रस्त्वावर्तयतुमित्रस्यपथा॥स्वस्तिसोमसखापुनरेहिसहरय्या॥२॥दक्षिणासो

मं सख्वापंचंच॥४॥ ॥वस्य्यसिरुद्रास्यदितिरस्यादित्यासिशुक्रासिचंद्रासिबृ
हस्पतिस्त्वासुम्नेरण्वतुरुद्रोवसुभिराचिकेतुपृथिव्यास्त्वामूर्धन्नाजिघर्मिदेवय
जेनइडायाःपदेघृतवतिस्वाहापरिलिखितꣳरक्षःपरिलिखिताअरातयइदमहꣳ
रक्षसोग्रीवाअपिकृंतामियोस्मांद्वेष्टियंचवयंद्विष्मइदमस्यग्रीवाः॥१॥अपिकृंता
म्यस्मेरायस्त्वेरायस्तोतेरायःसंदेविदेव्योर्वश्यापश्यस्वत्वष्टीमतीतेसपेयसुरेता
रेतोदधानावीरंविदेयतवसंदृशिमाहꣳरायस्पोषेणवियोषं॥२॥अस्यग्रीवाए
कान्नत्रिꣳशच्च॥५॥ ॥अꣳशुर्नातेअꣳशुःपृच्यतांपरुषापरुर्गंधस्तेकाममवतु
मदायरसोअच्युतोमात्योसिशुक्रस्तेग्रहोभित्यंदेवꣳसवितारमूण्योःकविक्रतुम
र्चामिसत्यसवसꣳरत्नधामभिप्रियंमतिमूर्ध्वायस्यामतिर्भाअदिद्युतत्सवी

मतिर्हिरण्यपाणिरमिमीतसुक्रतुःकृपासुवः॥प्रजाभ्यस्त्वाप्राणायत्वाव्यानायत्वा
प्रजास्त्वमनुप्राणिहि॥प्रजास्त्वामनुप्राणंतु॥१॥अनुसस्न्च॥६॥सोमंतेक्रीणाम्यू
र्जस्वंतंपयस्वंतंवीर्यावंतमभिमातिषाहꣳशुक्रंतेशुक्रेणक्रीणामिचंद्रंचंद्रेणामृत
ममृतेनसम्यत्तेगोरस्मेचंद्राणितपसस्तनूरसिप्रजापतेर्वर्णस्तस्यास्तेसहस्रपोषं
पुष्यंत्याश्चरमेणपशुनाक्रीणाम्यस्मेतेबंधुर्मयितेरायश्रयंतामस्मेज्योतिःसोमवि
क्रयिणितमोमित्रोनएहिस्वमित्रधाइंद्रस्योरुमाविशदक्षिणमुशन्नुशंतꣳस्योनः
स्योनꣳस्वानभ्राजांघारेबंभारेहस्तसुहस्तकृशानवेतेवःसोमक्रयणास्तान्रक्षध्वं
मावोदभंन्॥१॥ऊरुंद्वाविꣳशतिश्च॥७॥ ॥उदायुषास्वायुषोदोषधीनाꣳरसेनोत्पु
र्जन्यस्यशुष्मेणोदस्थाममृताꣳअनु॥उर्वंतरिक्षमन्विह्यदित्याःसदोस्यदित्याःसद

।प्र०स०२।। ॥११॥ आसीदास्तभ्नाद्यामृषभोअंतरिक्षममिमीतवरिमाणंपृथिव्याआसीदद्विश्वाभुव
नानिसम्राड्विश्वेत्तानिवरुणस्यव्रतानिवनेषुव्यंतरिक्षंततानवाजमर्वत्सुपयोअ
घ्नियास्कहृत्सु॥१॥क्रतुंवरुणोविक्ष्वग्निंदिविसूर्यमदधात्सोममद्रावुदुत्यंजातवे
दसंदेवंवहंतिकेतवः॥दृशेविश्वायसूर्यं॥उस्रावेतंधूर्षाहावनश्रूअवीरहणौ
ब्रह्मचोदनौवरुणस्यस्कंभनमसिवरुणस्यस्कंभसर्जनमसिप्रत्यस्तोवरुणस्य
पाशः॥२॥हृत्सुपंचत्रिंशच्च॥८॥ ॥प्रच्यवस्वभुवस्पतेविश्वान्यभिधामानिमा
त्वापरिपरीविदन्मात्वापरिपंथिनोविदन्मात्वावृकाअघायवोमागंधर्वोविश्वाव
सुरादघच्छ्येनोभूत्वापरापतयजमानस्यनोगृहेदेवैःसंस्कृतंयजमानस्यस्वस्त्य
यन्यस्यपिपंथामगस्महिस्वस्तिगामनेहसंयेनविश्वाःपरिद्विषोवृणक्तिविंदतेवसु ॥११॥

नमोमित्रस्यवरुणस्यचक्षसेमहोदेवायतदृतꣳसपर्यतदूरेदृशेदेवजातायकेतवे
दिवस्पुत्रायसूर्यायशꣳसतवरुणस्यस्कंभनमसिवरुणस्यस्कंभसर्जनमस्युन्मुक्तो
वरुणस्यपाशः॥१॥मित्रस्यत्रयोविꣳशतिश्च॥९॥ ॥अग्नेरातिथ्यमसिविष्णवेत्वा
सोमस्यातिथ्यमसिविष्णवेत्वातिथेरातिथ्यमसिविष्णवेत्वाग्नयेत्वाग्नयेत्वारायस्पो
षदाव्नेविष्णवेत्वाश्येनायत्वासोमभृतेविष्णवेत्वायातेधामानिहविषायजंतिताते
विश्वापरिभूरस्तुयज्ञंगयस्फानःप्रतरणःसुवीरोवीरहाप्रचरासोमदुर्यानदित्याः
सदोस्यदित्याःसदआ॥१॥सीदवरुणोसिधृतव्रतोवारुणमसिशंयोर्देवानाꣳसख्यान्मा
देवानामपसश्छित्स्मह्यापतयेत्वागृह्णामिपरिपतयेत्वागृह्णामितनूनप्त्रेत्वागृह्णामि
शाक्वरायत्वागृह्णामिशक्मन्नोजिष्ठायत्वागृह्णाम्यनाधृष्टमस्यनाधृष्यंदेवानामोजो

॥प्र०स०२॥ ॥भद्रास्तेपाअनाभिशस्तेन्यमनुमेदीक्षांदीक्षापतिर्मन्यतामनुतपस्तपस्पतिरंजसा
॥१२॥ सत्यमुपगेषंस्कवितेमाधाः॥२॥आमेकंच॥१०॥ ॥अंꣳशुरꣳशुस्तेदेवसोमाप्या
यतामिंद्रायैकधनविदआतुभ्यमिंद्रःप्यायतामात्वमिंद्रायप्यायस्वाप्याययस्मान्सखीन्त्स
न्यामेधयास्वस्तितेदेवसोमसुत्यामशीयेष्टारायःप्रेषेभगायऋतमृतवादिभ्योनमोदि
वेनमःपृथिव्याअग्नेव्रतपतेत्वंव्रतानांव्रतपतिरसियाममतनूरेषासात्वयि॥१॥या
तवतनूरियꣳसामयिसहनौव्रतपतेव्रतिनोर्व्रतानियातेअग्नेरुद्रियातनूस्तयानः
पाहितस्यास्तेस्वाहायातेअग्नेयाशयारजाशयाहराशयातनूर्वर्षिष्ठागह्वरेष्ठोग्रं
वचोअपावधींत्वेषंवचोअपावधींꣳस्वाहा॥२॥त्वयिचत्वारिꣳशच्च॥११॥ ॥वित्ता
यनीमेसितिक्तायनीमेस्यवतान्मानाथितमवतान्माव्यथितंविदेरग्निर्नभोनामाग्ने ॥१२॥

अंगिरोयोस्यांपृथिव्यामस्यायुषानाम्नेहियत्तेनाधृष्टंनामयज्ञियंतेनत्वादधेग्ने
अंगिरोयोद्वितीयस्यांतृतीयस्यांपृथिव्यामस्यायुषानाम्नेहियत्तेनाधृष्टंनाम॥१॥य
ज्ञियंतेनत्वादधेसिंहीरसिमहिषीरस्यूरुप्रथस्वोरुतेयज्ञपतिःप्रथतांध्रुवासिदेवे
भ्यःशुंधस्वदेवेभ्यःशुंभस्वेंद्रघोषस्त्वावसुभिःपुरस्तात्पातुमनोजवास्त्वापितृभि
र्दक्षिणतःपातुप्रचेतास्त्वारुद्रैःपश्चात्पातुविश्वकर्मात्वादित्यैरुत्तरतःपातुसिंहीर
सिसपत्नसाहीस्वाहासिंहीरसिसुप्रजावनिस्वाहासिंहीः॥२॥असिरायस्पोषव
निस्वाहासिंहीरस्यादित्यवनिस्वाहासिंहीरस्यावहदेवांदेवयतेयजमानायस्वाहा
भूतेभ्यस्त्वाविश्वायुरसिपृथिवींदृंहध्रुवक्षिदस्यंतरिक्षंदृंहाच्युतक्षिदसिदिवंदृ
ंहाग्नेर्भस्मास्यग्नेःपुरीषमसि॥३॥नामसुप्रजावनिस्वाहासिंहीःपंचत्रिंशच्च॥१२॥

युंजतेमनउतयुंजतेधियोविप्राविप्रस्यबृहतोविपश्चितः॥विहोत्रादधेवयुनाविदेक
इन्महीदेवस्यसवितुःपरिष्टुतिः॥सुवाग्देवदुर्यांॅआवददेवश्रुतौदेवेष्वाघोषेथामा
नोवीरोजायतांकर्मण्योयंॅसर्वेनुजीवामयोबहूनामसद्वशी॥इदंविष्णुर्विचक्रमेत्रे
धानिदधेपदं॥समूढमस्य॥१॥पांᳬसुरइरावतीधेनुमतीहिभूतंॅसूयवसिनीम
नवेयशस्ये॥व्यस्कभ्नारोदसीविष्णुरेतेदाधारपृथिवीमभितोमयूखैः॥प्राचीप्रे
तमध्वरंकल्पयंतीऊर्ध्वंयज्ञंनयतंमाजीह्वरतमत्रेरमेथांवर्ष्मन्पृथिव्यादिवो
वाविष्णवुतवापृथिव्यामहोवाविष्णवुतवांतरिक्षाद्धस्तौपृणस्वबहुभिर्वसव्यै
राप्रयछ॥२॥दक्षिणादोतसव्यात्॥विष्णोर्नुकंवीर्याणिप्रवोचंयःपार्थिवानिवि
ममेरजांᳬसियोअस्कभायदुत्तरंᳬसधस्थंविचक्रमाणस्त्रेधोरुगायोविष्णोररा

टमसिविष्णोः पृष्ठमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवमसिवैष्णव
मसिविष्णवेत्वा॥३॥अस्मयक्षैकान्नचेत्वारिंशाच्च॥१३॥ ॥कृणुष्वपाजःप्रसितिंन
पृथ्वींयाहिराजेवामवाँ२इभेन॥तृष्वीमनुप्रसितिंद्रूणानोस्तासिविध्यरक्षसस्त
पिष्ठैः॥तवभ्रमासआशुयापतंत्यनुस्पृशधृषताशोशुचानः॥तपूंष्यग्नेजुह्वाप
तंगानसंदितोविसृजविष्वगुल्काः॥प्रतिस्पशोविसृजतूर्णितमोभवापायुर्विशोअ
स्याअदब्धः॥योनोदूरेअघशंसः॥१॥योअंत्यग्नेमाकिष्टेव्यथिरादधर्षीत्॥उदग्ने
तिष्ठप्रत्यातनुष्वन्यमित्राँ२ओषतात्तिग्महेते॥योनोअरातिंसमिधानचक्रेनीचातं
धक्ष्यतसंनशुष्कं॥ऊर्ध्वोभवप्रतिविध्याध्यस्मदाविष्कृणुष्वदैव्यान्यग्ने॥अवस्थिरा
तनुहियातुजूनांजामिमजामिंप्रमृणीहिशत्रून्॥सते॥२॥जानातिसुमतिंयविष्ठय

ईवतेब्रह्मणेगातुमैरत्॥विश्वान्यस्मैसुदिनानिरायोद्युम्नान्यर्योविदुरोअभिद्यौत्॥
सेदग्नेअस्तुसुभगःसुदानुर्यस्त्वानित्येनहविषायउक्थैः॥पिप्रीषतिस्वआयुषिदुरो
णेविश्वेदस्मैसुदिनासासदिष्टिः॥अर्चामितेसुमतिंघोष्यर्वाक्संतेवावाताजरतां॥३॥
इयंगीः॥स्वश्वास्त्वासुरथामर्जयेमास्मेक्षत्राणिधारयेरनुद्यून्॥इहत्वाभूर्याचरे
दुपत्मंदोषावस्तर्दीदिवांसमनुद्यून्॥क्रीळंतस्त्वासुमनसःसपेमाभिद्युम्नातस्थि
वांसोजनानां॥यस्त्वास्वश्वःसुहिरण्योअग्नउपयातिवसुमतारथेन॥तस्यत्राता
भवसितस्यसखायस्तआतिथ्यमानुषग्जुजोषत्॥महोरुजामि॥४॥बंधुतावचो
भिस्तन्मापितुर्गोतमादन्वियाय॥त्वंनोअस्यवचसश्चिकिद्धिहोतर्यविष्ठसुक्रतोद
मूनाः॥अस्वप्नजस्तरणयःसुशेवाअतंद्रासोवृकाअश्रमिष्ठाः॥तेपायवःसध्रियंचो

निषद्याग्नेतवनःपांत्वमूर॥येपायवोमामतेयंतेअग्नेपश्यंतोअंधंदुरितादरक्षन्॥
ररक्षतान्सुकृतोविश्ववेदादिप्संतइद्रिपवोनाह॥५॥देभुः॥त्वयावयंसधन्यस्त्वोता
स्तवप्रणीत्यश्यामवाजान्॥उभाशंसासूदयसत्यतातेनुष्ठुयाकृणुह्यह्रयाण॥अ
यातेअग्नेसमिधाविधेमप्रतिस्तोमंशस्यमानंगृभाय॥दहाशसोरक्षसःपाह्यस्मां
द्रुहोनिदोमित्रमहोअवद्यात्॥रक्षोहणंवाजिनमाजिघर्मिमित्रंप्रथिष्ठमुपयामि
शर्म॥शिशानोअग्निःक्रतुभिःसमिद्धःसनोदिवा॥६॥सरिषःपातुनक्तं॥विज्योतिषा
बृहताभात्यग्निराविर्विश्वानिकृणुतेमहित्वा॥प्रादेवीर्मायाःसहतेदुरेवाःशिशीतेशृंगेर
क्षसेविनिक्षे॥उतस्वानासोदिविषंत्वग्नेस्तिग्मायुधारक्षसेहंतवाउ॥मदेचिदस्यप्ररु
जंतिभामानवरंतेपरिबाधोअदेवीः॥७॥अघशंसःसतेजरतांरुजामिहृदिवेकच

॥प्र०स०२॥ ॥३५॥ त्वारिंशाच्च॥१४॥ ॥आपर्उंदंत्वाकूत्यैदेवीमियंतेवस्व्यस्यंश्रनोतेसोमंतउदायुषाम
च्यवस्त्वाग्नेरातिथ्यमंश्रुरंश्रुर्वित्तायनीमेसियुंजतेकृणुष्वपाजश्चतुर्दश॥१४॥ ॥आ
पोवस्व्येसियातेवेयंगौश्चतुस्त्रिंशत्॥३४॥ ॥आपर्उंदंत्वदेवीः॥ ॥छ॥ ॥हरिःॐ॥
॥ ॥छ॥ ॥छ॥ ॥देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामाददेभ्रि
रसिनारिरसिपरिलिखितंरक्षःपरिलिखिताअरातयइदमहंरक्षसोग्रीवाअपि
कृंतामियोस्मांद्वेष्टियंचवयंद्विष्मइदमस्यग्रीवाअपिकृंतामिदिवेत्वांतरिक्षाय
त्वापृथिव्यैत्वाशुंधतांलोकःपितृषदनोयवोसियवयास्मद्वेषः॥१॥यवयारातीःपि
तृणांसदनमस्युद्दिवंस्तभानांतरिक्षंपृणपृथिवींदृंहद्युतानस्त्वामारुतोमि
नोतुमित्रावरुणयोर्ध्रुवेणधर्मणाब्रह्मवनिंत्वाक्षत्रवनिंस्रुप्रजावनिंरायस्पो ॥३५॥

प्रवन्निंपर्यूहामिब्रह्मदृंहक्षत्रंदृंहप्रजांदृंहरायस्पोषंदृंहघृतेनद्यावापृथिवी
आपृणेथामिंद्रस्यसदोसिविश्वजनस्यछायापरित्वागिर्वणोगिरइमाभवंतुविश्वतो
वृद्धायुमनुवृद्धयोजुष्टाभवंतुजुष्टयइंद्रस्यस्यूरसीद्रस्यध्रुवमस्यैंद्रमसीद्रायत्वा
॥२॥द्वेषइमाअष्टादशाच॥१॥ ॥रक्षोहणोवलगहनौवैष्णवान्खनामीदमहंतंव
लगमुद्वपामियन्नःसमानोयमसमानोनिचखानेदमेनमधरंकरोमियोनःसमा
नोयोसमानोरातीयतिगायत्रेणछंदसावबाढोवलगःकिमत्रभद्रंतन्नौसहविरा
डसिसपत्नहासम्राडसिभ्रातृव्यहास्वराडस्यभिमातिहाविश्वाराडसिविश्वा
सांनाष्ट्राणांहंता॥१॥रक्षोहणोवलगहनःप्रोक्षामिवैष्णवान्रक्षोहणोवलग
हनोवनयामिवैष्णवान्यवोसियवयास्मद्द्वेषोयवयारातीःरक्षोहणोवलगहनौ

॥प्र०स०३॥ वेस्तृणामिवैष्णवान्त्रक्षोहणोवलगहनोभिजुहोमिवैष्णवान्त्रक्षोहणोवलगहना
॥३६॥ वुपदधामिवैष्णवीरक्षोहणौवलगहनौपर्यूहामिवैष्णवीरक्षोहणौवलगहनौपरि
स्तृणामिवैष्णवीरक्षोहणौवलगहनौवैष्णवीबृहन्नसिबृहद्ग्रावाबृहतीमिंद्राय
वाचंवद॥२॥हंतेंद्रायद्वेच॥२॥ ॥विभूरसिप्रवाहणोवन्हिरसिहव्यवाहनःश्वात्रो
सिप्रचेतास्तुथोसिविश्ववेदाउशिगसिकविरंघारिरसिबंभारिरवस्युरसिदुवस्वां
छुंध्यूरसिमार्जालीयःसम्राडसिकृशानुःपरिषद्योसिपवमानःप्रतक्वासिनभस्वा
नसंमृष्टोसिहव्यसूदऋतधामासिसुवर्ज्योतिर्ब्रह्मज्योतिरसिसुवर्धामाजोस्ये
कपादहिरसिबुध्नियोरौद्रेणानीकेनपाहिमाग्नेपिपृहिमामामाहिंसीः॥१॥अ
नीकेनाष्टौच॥३॥ ॥त्वंसोमतनूकृद्भ्योद्वेषोभ्योन्यकृतेभ्यउरुयंतासिवरूथंस्वा ॥१६

हाजुषाणोअप्तुराज्यस्यवेतुस्वाहायन्नोअग्निर्वरिवःकृणोत्वयंमृधःपुरएतुप्रभिंदं
न्॥अयंशत्रूंजयतुजर्हृषाणोयंवाजंजयतुवाजसातौ॥उरुविष्णोविक्रमस्वोरु
क्षयायनःकृधि॥घृतंघृतयोनेपिबप्रप्रयज्ञपतिंतिर॥सोमोजिगातिगातुवित्॥१॥
देवानामेतिनिष्कृतमृतस्ययोनिमासदमदित्याःसदोस्यदित्याःसदआसीदेषवोदेवस
वितःसोमस्तंरक्षध्वंमावोदभदेतत्वंसोमदेवोदेवानुपागाइदमहंमनुष्योमनुष्या
त्सहप्रजयासहरायस्पोषेणनमोदेवेभ्यःस्वधापितृभ्यइदमहंनिर्वरुणस्यपाशात्स्व
वरभि॥२॥विस्वेषंवैश्वानरंज्योतिरग्नेव्रतपतेत्वंव्रतानांव्रतपतिरसियाममतनू
स्त्वय्यभूदियंसामयियातवतनूर्मय्यभूदेषासात्वयियथायथंनौव्रतपतेव्रतिनो
र्व्रतानि॥३॥गातुविदभ्येकत्रिंशच्च॥४॥ ॥अत्यन्यानगान्नान्यानुपागामर्वाक्त्वा

॥प्र०स०३॥
॥१७॥

परैरविदंपरोवैरैस्तंत्वाजुषेवैष्णवंदेवयज्यायैदेवस्त्वासवितामध्वानक्त्वोषधेत्रा
यस्वैनꣳस्वधितेमैनꣳहिꣳसीर्दिवमग्रेणमालेखीरंतरिक्षंमध्येनमाहिꣳसीःपृथिव्या
संभववनस्पतेशतवल्शोविरोहसहस्रवल्शाविवयꣳरुहेमयंत्वायꣳस्वधितिस्तेतिजा
नःप्रणिनायमहतेसौभगायाछिन्नोरायःसुवीरः॥१॥यंदशेच॥५॥ ॥पृथिव्यैत्वांतरिक्षा
यत्वादिवेत्वाशुंधतांलोकःपितृषदनोयवोसियवयास्मद्द्वेषोयवयारातीःपितृणाꣳस
दनमसिस्वावेशोस्यग्रेगानेतृणांवनस्पतिरधित्वास्थास्यतितस्यवित्तांदेवस्त्वास
वितामध्वानक्तुसुपिप्पलाभ्यस्त्वौषधीभ्यउद्दिवꣳस्तभानांतरिक्षंपृणपृथिवीमु
परेणदृꣳहतेतेधामान्युश्मसि॥१॥गमध्येगावोयत्रभूरिशृंगाअयासः॥अत्राहतदुरु
गायस्यविष्णोःपरमंपदमवभातिभूरेः॥विष्णोःकर्माणिपश्यतयतोव्रतानिपस्पशे॥ ॥१७॥

इंद्रस्ययुज्यः सखा॥ तद्विष्णोः परमंपदं सदापश्यंतिसूरयः॥ दिवीवचक्षुराततं॥ ब्र
ह्मवनित्वाक्षत्रवनिं सुप्रजावनिं रायस्पोषवनिंपर्यूहामि ब्रह्मदं हक्षत्रंदं हप्रजां
दं हरायस्पोषंदं हपरिवीरसिपरित्वादैवीर्विशोव्ययंतांपरीमं रायस्पोषोयजमानं
मनुष्याअंतरिक्षस्यत्वासानाववगूहामि॥२॥उश्मसीपोषमेकान्नविं शतिश्च॥६॥ ॥
इषेत्वोपवीरस्यूपोदेवांदैवीर्विशः प्रागुर्वन्हीरुशिजोबृहतेधारयावसूनिहव्यातेस्वदं
तांदेवत्वष्टर्वसुरण्वरेवतीरमध्वमग्नेर्जनित्रमसिवृषणौस्थउर्वश्यस्यायुरसिपुरूर
वाघृतेनाक्तेवृषणंदधाथांगायत्रंछंदोनुप्रजायस्वत्रैष्टुभंजागतंछंदोनुप्रजायस्वभ
वतं॥१॥नः समनसौसमोकसावरेपसौ॥मायज्ञं हिं सिष्टंमायज्ञपतिंजातवेदसौ
शिवौभवतमद्यनः॥अग्नावग्निश्चरतिप्रविष्टऋषीणांपुत्रोअधिराजएषः॥स्वाहा

॥प्र०स०७॥ ऋत्यब्रह्मणातेजुहोमिमादेवानांमिथुयाकर्भागधेयं॥२॥भवतमेकत्रिंशच्च॥७॥ ॥
॥१८॥ आददऋतस्यत्वादेवहविःपाशेनारभेधर्षामानुषामानुषानद्भ्यस्त्वौषधीभ्यःप्रोक्षा
म्यपांपेरुरसिस्वात्तंचित्सदेवंहव्यमापोदेवीस्वदतैनंसंतेप्राणोवायुनागच्छतांसंय
जत्रैरंगानिसंयज्ञपतिराशिषाघृतेनाक्तौपशुंत्रायेथांरेवतीर्यज्ञपतिंप्रियधाविशतो
रोअंतरिक्षसजूर्देवेन॥१॥वातेनास्यहविषस्त्मनायजसमस्यतनुवाभववर्षोवर्षी
यसियज्ञेयज्ञपतिंधाःपृथिव्याःसंपृचःपाहिनमस्तआतानानर्वाप्रेहिघृतस्यकुल्याम
नुसहप्रजयासहरायस्पोषेणापोदेवीःशुद्धायुवःशुद्धायूयंदेवानंऊढ्वंशुद्धावयंपरि
विष्टाःपरिवेष्टारोवोभूयास्म॥२॥देवेनचतुश्चत्वारिंशच्च॥८॥ ॥वाक्तआप्यायतांप्रा
णस्तआप्यायतांचक्षुस्तआप्यायतांश्रोत्रंतआप्यायतांयातेप्राणांछुग्जगामयाच ॥१८॥

क्रुयश्रीर्त्वंयत्तेक्रूरंयदास्थितंतत्तआप्यायतांतत्तएतेनशुंधतांनाभिस्तआप्यायतांपा
युस्तआप्यायतांशुद्धाश्चरित्राःशमद्भ्यः॥१॥शमोषधीभ्यःशंपृथिव्यैशमहोभ्यामो
षधेत्रायस्वैनंस्वधितेमैनंहिंसीरक्षसांभागोसीदमहंरक्षोधमंतमोनयामियो
स्मांद्वेष्टियंचवयंद्विष्मइदमेनमधमंतमोनयामीषेत्वाघृतेनद्यावापृथिवीप्रोर्णुवाथा
मच्छिन्नोरायःसुवीरउर्वंतरिक्षमन्विहिवायोवीहिस्तोकानांस्वाहोर्ध्वनभसंमारु
तंगच्छतं॥२॥अग्नोवीहिपंचच॥९॥ ॥संतेमनसामनःसंप्राणेनप्राणोजुष्टंदेवेभ्यो
हव्यंघृतवत्स्वाहैंद्रःप्राणोअंगेअंगेनिदीध्यदैंद्रोपानोअंगेअंगेविबोभुवद्देवत्वष्टर्भू
रितेसंसमेतुविषुरूपायत्सलक्ष्माणोभवथदेवत्रायंतमवसेसखायोनुत्वामातापि
तरोमदंतुश्रीरस्यग्निस्त्वाश्रीणात्वापःसमरिणन्वातस्य॥१॥त्वाध्रज्यैपूष्णोरंह्याअ

पामोषधीनाꣳरोहिष्यै घृतंघृत पावानःपिबतवसांवसापावानःपिबतांतरिक्षस्यह
विरसिस्वाहात्वांतरिक्षायदिशःप्रदिशआदिशोविदिशउद्दिशस्वाहादिग्भ्योनमोदि
ग्भ्यः॥१॥वातस्याष्टाविꣳशतिश्च॥१०॥ ॥समुद्रंगछस्वाहांतरिक्षंगछस्वाहादेवꣳ
सवितारंगछस्वाहाहोरात्रेगछस्वाहामित्रावरुणौगछस्वाहासोमंगछस्वाहायज्ञं
गछस्वाहाछंदाꣳसिगछस्वाहाद्यावापृथिवीगछस्वाहानभोदिव्यंगछस्वाहाग्निंवै
श्वानरंगछस्वाहाद्भ्यस्त्वौषधीभ्योमनोमेहार्दियछतनूंत्वचंपुत्रंनप्तारमशीयशुग
सितमभिशोचयोस्मांद्वेष्टियंचवयंद्विष्मोधाम्नोधाम्नोराजन्नितोवरुणनोमुंचय
दापोअघ्न्यावरुणेतिशपामहेततोवरुणनोमुंच॥१॥असिषड्विꣳशतिश्च॥११॥ ॥
हविष्मतीरिमाआपोहविष्मांदेवोअध्वरोहविष्माꣳआविवासतिहविष्माꣳअस्तुसूर्यः॥ ॥१९॥

अग्नेर्वोपन्नगृहस्यसदसिसादयामिसुम्नायसुम्निनीःसुम्नेमाधत्तेंद्राग्न्योर्भागधे
यीस्थमित्रावरुणयोर्भागधेयीस्थविश्वेषांदेवानांभागधेयीस्थयज्ञेजागृत॥१॥ह
विष्मतीश्चतुस्त्रिंशत्॥१२॥ ॥हृदेत्वामनसेत्वादिवेत्वासूर्यायत्वोर्ध्वमिममध्वरंकृधि
दिविदेवेषुहोत्रायच्छसोमराजन्नेह्यवरोहमाभेर्मासंविक्थामात्वाहिंसिषंप्रजास्त्व
मुपावरोहप्रजास्त्वामुपावरोहंतुशृणोत्वग्निःसमिधाहवंमेशृण्वंत्वापोधिषणाश्चदे
वीः॥शृणोतग्रावाणोविदुषोनु॥१॥यज्ञंशृणोतुदेवःसविताहवंमे॥देवीरापोअपां
नपाद्यऊर्मिर्हविष्यइंद्रियावान्मदिंतमस्तंदेवेभ्योदेवत्राधत्तशुक्रंशुक्रपेभ्योयेषां
भागस्थस्वाहाकार्षिरस्यपापांमृध्नंसमुद्रस्यवोक्षित्याउन्नये॥यमग्नेपृत्सुमर्त्यमा
वोवाजेषुयंजुनाः॥सयंताशश्वतीरिषः॥२॥नुसप्तचत्वारिंशच्च॥१३॥ ॥त्वमग्नेरु

॥अ०स०३॥ द्रोअसुरोमहोदिवस्त्वंशर्धोमारुतंपृक्षईशिषे॥त्वंवातैररुणैर्यासिशंगयस्त्वंपूषा
॥२०॥ विधतःपासिनुत्मना॥आवोराजानमध्वरस्यरुद्रंहोतारंसत्ययजंरोदस्योः॥अग्निं
पुरातनयित्नोरचित्ताद्धिरण्यरूपमवसेकृणुध्वं॥अग्निर्होतानिषसादायजीयानुपस्थे
मातुःसुरभाउलोके॥युवाकविःपुरुनिष्ठः॥१॥ऋतावाधर्ताकृष्टीनामुतमध्यइद्धः॥सा
ध्वीमकर्देववीतिंनोअद्ययज्ञस्यजिह्वामविदामगुह्यां॥सआयुरागात्सुरभिर्वसानो
भद्रामकर्देवहूतिंनोअद्य॥अक्रंददग्निस्तनयन्निवद्यौःक्षामारेरिहद्वीरुधःसमंजन्॥
सद्योजज्ञानोविहीमिद्धोअख्यदारोदसीभानुनाभात्यंतः॥त्वेवसूनिपुर्वणीक॥२॥हो
तर्दोषावस्तोरेरिरेयज्ञियासः॥क्षामेवविश्वाभुवनानियस्मिंत्संसौभगानिदधिरेपा
वके॥तुभ्यंताअंगिरस्तमविश्वाःसुक्षितयःपृथक्॥अग्नेकामाययेमिरे॥अश्याममतं ॥२०॥

कामममग्नेतवोत्यश्यामेरयिंरयिवःसुवीरं॥अश्याममवाजमभिवाजयंतोश्यामद्युम्नम
जराजरंते॥श्रेष्ठंयविष्ठभारताग्नेद्युमंतमाभर॥३॥वसोपुरुस्पृहंरयिं॥सश्वितानस्तन्य
तूरोचनस्थाअजरेभिर्नानदद्भिर्यविष्ठः॥यःपावकःपुरुतमःपुरूणिपृथून्यग्निरनुया
तिभर्वन्॥आयुष्टेविश्वतोदधदयमग्निर्वरेण्यः॥पुनस्तेप्राणआयतिपरायक्ष्मंसुवा
मिते॥आयुर्दाअग्नेहविषोजुषाणोघृतप्रतीकोघृतयोनिरेधि॥घृतंपीत्वामधुचारुग
व्यंपितेवपुत्रमभिरक्षतादिमं॥तस्मैतेप्रतिहर्यतेजातवेदोविचर्षणे॥अग्नेजनामिसु
ष्टुतिं॥दिवस्परिप्रथमंजज्ञेअग्निरस्मद्द्वितीयंपरिजातवेदाः॥तृतीयमप्सुनृमणाअ
जस्रमिंधानएनंजरतेस्वाधीः॥शुचिःपावकवंद्योग्नेबृहद्विरोचसे॥त्वंघृतेभिराहुतः॥
दृशानोरुक्मउर्व्याव्यद्यौद्दुर्मर्षमायुःश्रियेरुचानः॥अग्निरमृतोअभवद्वयोभिः॥५॥य

प्र०स०३॥
॥२१॥

दैनंद्योरजनयत्सुरेताः॥आयदिषेनृपतिंतेजआनट्शुचिरेतोनिषिक्तंद्योरभीके॥
अग्निःशर्धमनवद्यंयुवानंस्वाधियंजनयत्सूदयच्च॥सतेजीयसामनसात्वोतउत
शिक्षस्वपत्यस्यशिक्षोः॥अग्नेरायोनृतमस्यप्रभूतौभूयामतेसुष्टुतयश्चवस्वः॥अ
ग्नेसहंतमाभरद्युम्नस्यप्रासहारयिं॥विश्वायः॥६॥चर्षणीरभ्यासावाजेषुसासह
त्॥तमग्नेपृतनासहंरयिंसहस्वआभर॥त्वंहिसत्योअद्भुतोदातावाजस्यगोमतः
॥उक्षान्नायवशान्नायसोमपृष्ठायवेधसे॥स्तोमैर्विधेमाग्नये॥वद्माहिसूनोअस्यद्म
सद्वाचक्रेअग्निर्जनुषाज्मान्नं॥सत्वन्नऊर्जसनऊर्जंधाराजेववजेरवृकेक्षेष्यंतः॥अग्न
आयूंषि॥७॥पवसआसुवोर्जमिषंचनः॥आरेबाधस्वदुच्छुनां॥अग्नेपवस्वस्वपा
अस्मेवर्चःसुवीर्यं॥दधत्पोषंरयिंमयि॥अग्नेपावकरोचिषामंद्रयादेवजिह्वया॥आ ॥२१॥

देवान्वेक्षियक्षिच॥सनःपावकदीदिवोग्नेदेवांइहावह॥उपयज्ञंहविश्चनः॥अग्निः
शुचिव्रततमःशुचिर्विप्रःशुचिःकविः॥शुचीरोचतआहुतः॥उदग्नेशुचयस्तवशुक्रा
भ्राजंतईरते॥तवज्योतींष्यर्चयः॥८॥पुरुनिष्ठःपुर्वणीकभरामिवयोभिर्यआयूंषिवि
प्रःशुचिश्चतुर्दशश्च॥१४॥ ॥छ॥ ॥देवस्यरक्षोहणोविभूस्त्वंसोमात्यन्यानगांपृथि
व्याइषेत्वाददेवान्केसंतेसमुद्रंहविष्मतीहदेत्वमग्नेरुद्रश्चतुर्दश॥१४॥ ॥देवस्य
गमध्येहविष्मतीःपवस्वएकत्रिंशत॥३१॥ ॥देवस्यार्चयः॥ ॥हरिःॐ॥ ॥छ॥ ॥छ॥ ॥
म आदद्ग्रावास्यध्वरकृद्देवेभ्योगंभीरमिमध्वरंकृध्युत्तमेनपविनेंद्रायसोमंसुषुतंम
धुमंतंपयस्वंतंवृष्टिवनिमिंद्रायत्वावृत्रघ्नइंद्रायत्वावृत्रतुरइंद्रायत्वाभिमातिघ्नइंद्रा
यत्वादित्यवतइंद्रायत्वाविश्वदेव्यावतेश्वात्रास्थवृत्रतुरोराधोगूर्ताअमृतस्यपत्नीस्ता

।प्र०स०४॥ देवीर्देवत्रेमंयुज्ञंधत्तोपहूताः सोमस्यपिबतोपहूतोयुष्माकं॥१॥सोमःपिबतुयत्तेसो
॥२२॥ मदिविज्योतिर्यत्पृथिव्यांयदुरावंतरिक्षेतेनास्मैयजमानायोरुरायाकृध्यधिदात्रेवो
चोधिषणेवीडूसतीवीडयेथामूर्जंदधाथामूर्जंमेधत्तंमावांहिंसिषंमामाहिंसि
ष्टंप्रागपागुदगधराक्तास्त्वादिशआधावंत्वंबनिधरा॥यत्तेसोमादाभ्यंनामजागृवि
तस्मैतेसोमसोमायस्वाहा॥२॥युष्माकंस्वरुयत्तेनवंच॥१॥ ॥वाचस्पतयेपव
स्ववाजिन्वृषावृष्णोअंशुभ्यांगभस्तिपूतोदेवोदेवानांपवित्रमसियेषांभागोसि
तेभ्यस्त्वास्वांकृतोसिमधुमतीर्नइषस्कृधिविश्वेभ्यस्त्वेंद्रियेभ्योदिव्येभ्यःपार्थि
वेभ्योमनस्त्वाष्टूर्वंतरिक्षमन्विहिस्वाहात्वासुभवःसूर्यायदेवेभ्यस्त्वामरीचिपेभ्य
एषतेयोनिःप्राणायत्वा॥१॥वाचःसप्तचत्वारिंशत॥२॥ ॥उपयामगृहीतोस्यंत ॥२२॥

यंछमघवन्पाहिसोममुरुष्यरायःसमिषोयजस्वांतस्तेदधामिद्यावापृथिवीअं
तरुर्वंतरिक्षंसजोषादेवैरवरैःपरैश्चांतर्यामेमघवन्मादयस्वस्वांकृतोसिमधु
मतीर्नइषस्कृधिविश्वेभ्यस्त्वेंद्रियेभ्योदिव्येभ्यःपार्थिवेभ्योमनस्त्वाष्टुर्वंतरिक्षमन्वि
हिस्वाहात्वासुभवःसूर्यायदेवेभ्यस्त्वामरीचिपेभ्यएषतेयोनिरपानायत्वा॥३॥देवे
भ्यःसप्तच॥३॥ ॥आवायोभूषशुचिपाउपनःसहस्रंतेनियुतोविश्ववार॥उपोते
अंधोमद्यमयामियस्यदेवदधिषेपूर्वपेयं॥उपयामगृहीतोसिवायवेत्वेंद्रवायूइ
मेसुताः॥उपप्रयोभिरागतमिंदवोवामुशंतिहि॥उपयामगृहीतोसीन्द्रवायुभ्यां
त्वैषतेयोनिःसजोषाभ्यांत्वा॥१॥आवायोत्रिचत्वारिंशत॥४॥ ॥अयंवांमित्राव
रुणासुतःसोमऋतावृधा॥ममेदिहश्रुतंहवं॥उपयामगृहीतोसिमित्रावरुणा

॥ प्र०स०४॥ भ्यांत्वैषतेयोनिर्ऋतायुभ्यांत्वा॥१॥अयंवांविंशतिः॥५॥ ॥यावांकशामधुमत्यश्वि
॥२३॥ नासूनृतावती॥तयायज्ञंमिमिक्षतं॥उपयामगृहीतोस्यश्विभ्यांत्वैषतेयोनिर्माध्वी
भ्यांत्वा॥१॥यावामष्टादश॥६॥ ॥प्रातर्युजौविमुच्येथामश्विनावेहगच्छतं॥अस्यसो
मस्यपीतये॥उपयामगृहीतोस्यश्विभ्यांत्वैषतेयोनिरश्विभ्यांत्वा॥१॥प्रातर्युजावे
कांनविंशतिः॥७॥अयंवेनश्चोदयत्पृश्निगर्भाज्योतिर्जरायूरजसोविमाने॥इम
मपांसंगमेसूर्यस्यशिशुंनविप्रामतिभीरिहंति॥उपयामगृहीतोसिशंडायत्वैषते
योनिर्वीरतांपाहि॥१॥अयंवेनःपंचविंशतिः॥८॥ ॥तंप्रत्नथापूर्वथाविश्वथेम
थाज्येष्ठतातिंबर्हिषदंस्वर्विदंप्रतीचीनंवृजनंदोहसेगिराधुंजयंतमनुयासु
वर्धसे॥उपयामगृहीतोसिमर्कायत्वैषतेयोनिःप्रजाःपाहि॥१॥तंषड्विंशतिः॥९॥ ॥२३॥

ये दैवा दिव्येकादशस्छ पृथिव्यामध्येकादशस्था प्सुक्षदो महिनैकादशस्छ ते दैवा य
ज्ञमिमं जुषध्वमुपयामगृहीतोस्याग्रयणोसि स्वाग्रयणो जिन्व यज्ञं जिन्व यज्ञपतिम
भिसवनापाहि विष्णुस्त्वां पातु विशं त्वं पाहीन्द्रियेणैष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः॥१॥ये
देवास्त्रिचत्वारिꣳशत्॥१०॥ ॥त्रिꣳशत्त्रयश्च गणिनो रुजंतो दिवꣳ रुद्राः पृथिवीं च सचं
ते॥एकादशासो अप्सुषदः सुतꣳ सोमं जुषंताꣳ सवनाय विश्वे॥उपयाम गृहीतोस्या
ग्रयणोसि स्वाग्रयणो जिन्व यज्ञं जिन्व यज्ञपतिमभि सवना पाहि विष्णुस्त्वां पातु विशं
त्वं पाहीन्द्रियेणैष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः॥१॥त्रिꣳशद्विचत्वारिꣳशत्॥११॥उप
यामगृहीतोसीन्द्राय त्वा बृहद्वते वयस्वत उक्थायुवे यत्त इन्द्र बृहद्वयस्तस्मै त्वा विष्ण
वे त्वैष ते योनिरिन्द्राय त्वोक्थायुवे॥१॥उपयामगृहीतो द्वाविꣳशतिः॥१२॥ ॥मूर्धानं सि

॥प्र०स०७॥ द्दिवोअरतिंपृथिव्यावैश्वानरमृतायजातमग्निं॥कविꣳसम्राजमतिथिंजनानामासन्ना
॥२४॥ पात्रंजनयंतदेवाः॥उपयामगृहीतोस्यग्नयेत्वावैश्वानरायध्रुवोसिध्रुवक्षितिर्ध्रुवाणां
ध्रुवतमोच्युतानामच्युतक्षित्तमएषतेयोनिरग्नयेवैश्वानराय॥१॥मूर्धानंपंचत्रिꣳ त्वा
शत्॥१३॥ ॥मधुश्चमाधवश्चशुक्रश्चशुचिश्चनभश्चनभस्यश्चेषश्चोर्जश्चसहश्चस
हस्यश्चतपश्चतपस्यश्चोपयामगृहीतोसिसꣳसर्पोस्यꣳहस्पत्यायत्वा॥१॥मधुस्त्रिꣳ
शत्॥१४॥ ॥इंद्राग्नीआगतꣳसुतंगीर्भिर्नभोवरेण्यं॥अस्यपातंधियेषिता॥उपयाम
इंद्राग्नीवि गृहीतोसीद्राग्निभ्यांत्वैषतेयोनिरिंद्राग्निभ्यांत्वा॥१॥१५॥ ॥ओमासश्चर्षणीधृतोवि ~~इंद्र एकाग्नी~~
९ शातिः श्वेदेवासआगत॥दाश्वाꣳसोदाशुषःसुतं॥उपयामगृहीतोसिविश्वेभ्यस्त्वादेवेभ्यए
षतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः॥१॥ ~~इंद्राग्नी~~ओमासोविꣳशतिर्विꣳशतिः॥१६॥ ॥मरुत्वं ॥२४॥

तंवृषभंवावृधानमकवारिंदिव्यंशासमिंद्रं॥विश्वासाहमवसेनूतनायोग्रंसहो
दामिहतंहुवेम॥उपयामगृहीतोसींद्रायत्वामरुत्वतएषतेयोनिरिंद्रायत्वामरुत्व
ते॥१॥मरुत्वंतंषड्विंशतिः॥१७॥ ॥इंद्रमरुत्वइहपाहिसोमंयथाशार्यातेअपिबःसु
तस्य॥तवप्रणीतीतवशूरशर्मन्नाविवासंतिकवयःसुयज्ञाः॥उपयामगृहीतोसींद्रायत्वा
मरुत्वतएषतेयोनिरिंद्रायत्वामरुत्वते॥१॥१८॥ ॥मरुत्वांइंद्रवृषभोरणायपिबासो इंद्र॰कान्नत्रिं॰शत॥
ममनुष्वधंमदाय॥आसिंचस्वजठरेमध्वऊर्मिंत्वंराजासिप्रदिवःसुतानां॥उपयामगृ
हीतोसींद्रायत्वामरुत्वतएषतेयोनिरिंद्रायत्वामरुत्वते॥१॥इंद्रमरुत्वोमरुत्वानेकान मरुत्वानेकान्न त्रिं॰शत
त्रिंशदेकानत्रिंशत॥१९॥ ॥महांइंद्रोयओजसापर्जन्योवृष्टिमांइव॥स्तोमैर्व
त्सस्यवावृधे॥उपयामगृहीतोसिमहेंद्रायत्वैषतेयोनिर्महेंद्रायत्वा॥१॥महानेकानवि

॥प्र०स०८॥ ंशतिः॥२०॥ ॥महाँ२ इंद्रोनृवदाचर्षणिप्राउतद्विबर्हाअमिनःसहोभिः॥अस्मद्र्यि
॥२५॥ ग्वावृधेवीर्यायोरुःपृथुःसुकृतःकर्तृभिर्भूत्॥उपयामगृहीतोसिमहेंद्रायत्वैषतेयोनि
र्महेंद्रायत्वा॥१॥महान्नृवत्सप्तविं॑ शतिः॥२१॥ ॥कदाचनस्तरीरसिनेंद्रसश्चसिदाशु
षे॥उपोपेन्नुमघवन्भूयइन्नुतेदानंदेवस्यपृच्यते॥उपयामगृहीतोस्यादित्येभ्यस्त्वा
॥कदाचनप्रयुच्छस्युभेनिपासिजन्मनी॥तुरीयादित्यसवनंतइंद्रियमातस्थावमृ
तंदिवि॥यज्ञोदेवानांप्रत्येतिसुम्नमादित्यासोभवतामृडयंतः॥आवोर्वाचीसुमति
र्ववृत्यादंहोश्चिद्यावरिवोवित्तरासत्॥विवस्वआदित्यैषतेसोमपीथस्तेनमंदस्व
तेनतृप्यतृप्यास्मतेवयंतर्पयितारोयादिव्यावृष्टिस्तयात्वाश्रीणामि॥१॥वःसप्तविं॑
शतिश्च॥२२॥ ॥वाममद्यसवितर्वाममुश्वोदिवेदिवेवाममस्मभ्यंसावीः॥वामस्यहि ॥२५॥

क्षयस्य देव भूरेरया धिया वाम भाजस्याम ॥ उपयामगृहीतोसि देवाय त्वा सवित्रे ॥१॥
वामंचतुर्विंꣳशतिः ॥२३॥ ॥ अदब्धेभिः सवितः पायुभिष्ट्वꣳशिवेभिरद्यपरिपाहिनोग
यं ॥ हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशꣳस ईशत ॥ उपयामगृहीतोसि
देवाय त्वा सवित्रे ॥१॥ अदब्धेभिस्त्रयोविंꣳशतिः ॥२४॥ ॥ हिरण्यपाणिमूतये सवितारमुप
ह्वये ॥ सचेत्ता देवता पदं ॥ उपयामगृहीतोसि देवाय त्वा सवित्रे ॥१॥ हिरण्यपाणिंचतु
र्दश ॥२५॥ ॥ सुशर्मासि सुप्रतिष्ठानो बृहदुक्षे नम एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥१॥
सुशर्माद्वादश ॥२६॥ ॥ बृहस्पतिसुतस्य त इंदो इंद्रियावतः पत्नीवंतं ग्रहं गृह्णाम्यग्ना२
इ पत्नीवाः३ सजूर्देवेन त्वष्ट्रा सोमंपिब स्वाहा ॥१॥ बृहस्पतिसुतस्य पंचदश ॥२७॥ ॥
हरिरसि हारियोजनो हर्योस्स्थाता वज्रस्य भर्ता पृश्नेः प्रेता तस्य ते देव सोमेष्टयजुषस्तुत

॥अ०स०८॥
॥२६॥

स्तोमस्यन्नास्तोक्थस्यहरिवंतंग्रहंगृह्णामिहरीस्थहर्योर्धानाःसहसोमाइंद्रायस्वाहा॥१॥
हरिःषड्विंशतिः॥२८॥ ॥अग्नआयूंषिपवसआसुवोर्जमिषंचनः॥आरेबाधस्वदुच्छु
नां॥उपयामगृहीतोस्यग्नयेत्वातेजस्वतएषतेयोनिरग्नयेत्वातेजस्वते॥१॥अग्नेत्रयोवि
ंशतिः॥२९॥ ॥उत्तिष्ठन्नोजसासहपीत्वाशिप्रेअवेपयः॥सोममिंद्रचमूसुतं॥उपयाम
गृहीतोसींद्रायत्वोजस्वतएषतेयोनिरिंद्रायत्वोजस्वते॥१॥उत्तिष्ठन्नेकविंशतिः॥३०॥ ॥ क
तरणिर्विश्वदर्शतोज्योतिष्कृदसिसूर्य॥विश्वमाभासिरोचनं॥उपयामगृहीतोसिसूर्या
यत्वाभ्राजस्वतएषतेयोनिःसूर्यायत्वाभ्राजस्वते॥१॥तरणिर्विंशतिः॥३१॥ ॥आप्या
यस्वमदिंतमसोमविश्वाभिरूतिभिः॥भवानःसप्रथस्तमः॥१॥आनव॥३२॥ ॥ईयु
ष्टेयेपूर्वतरामपश्यन्व्युच्छंतीमुषसंमर्त्यासः॥अस्माभिरूनुप्रतिचक्ष्याभूदोतेयंति ॥२६॥

येअपरीषुपश्यान्।।१।। ईयुरेकांनविंःशतिः।।३३।। ।।ज्योतिष्मतींत्वासादयामिज्योति
ष्कृतंत्वासादयामिज्योतिर्विदंत्वासादयामिभास्वतींत्वासादयामिज्वलंतींत्वासा
दयामिमल्मलाभवंतींत्वासादयामिदीप्यमानांत्वासादयामिरोचमानांत्वासादया
षं म्यजस्रांत्वासादयामिबृहज्ज्योतिंत्वासादयामिबोधयंतींत्वासादयामिजाग्रतींत्वा
सादयामि।।१।।ज्योतिष्मतीःषड्विंःशत्।।३४।। ।।प्रयासायस्वाहायासायस्वाहावि
यासायस्वाहासंयासायस्वाहोद्यासायस्वाहावयासायस्वाहाशुचेस्वाहाशोकाय
स्वाहातप्यत्वैस्वाहातपतेस्वाहाब्रह्महत्यायैस्वाहासर्वस्मैस्वाहा।।१।।प्रयासायचतु
र्विंःशतिः।।३५।। ।।चित्तंःसंतानेनभवंयक्नारुद्रंतनिम्नापशुपतिंःस्थूलहृदयेना
ग्निंःहृदयेनरुद्रंलोहितेनशर्वंमतस्नाभ्यांमहादेवमंतःपार्श्वेनौषिष्ठहनंःशिंगीनि

कोभ्याभ्यां॥१॥चित्र्त्तमष्टादश॥३६॥ ॥आतिष्ठवृत्रहन्रथंयुक्तातेब्रह्मणाहरी॥अ
र्वाचीनꣳसुतेमनोग्रावाकृणोतुवृग्नुना॥उपयामगृहीतोसीद्रायत्वाषोडशिनएषते
योनिरिंद्रायत्वाषोडशिने॥१॥आतिष्ठषड्विꣳशतिः॥३७॥ ॥इंद्रमिद्धरीवहतोप्र
तिधृष्टशवसमृषीणांचस्तुतीरुपयज्ञंचमानुषाणां॥उपयामगृहीतोसीद्रायत्वाषो
डशिनएषतेयोनिरिंद्रायत्वाषोडशिने॥१॥इंद्रंत्रयोविꣳशतिः॥३८॥ ॥असाविसो
मइंद्रतेशविष्ठधृष्णवागहि॥आत्वापृणक्त्विंद्रियꣳरजःसूर्यंनरश्मिभिः॥उपया
मगृहीतोसींद्रायत्वाषोडशिनएषतेयोनिरिंद्रायत्वाषोडशिने॥१॥असाविसप्त
विꣳशतिः॥३९॥ ॥सर्वस्यप्रतिशीवरीभूमिस्त्वापस्थआधिता॥स्योनास्मैसुषदा
भववयच्छास्मैशर्मसप्रथाः॥उपयामगृहीतोसीद्रायत्वाषोडशिनएषतेयोनिरिंद्रा ॥२७॥

सर्वस्यषड्विंशतिः॥

यत्वाषोडशिने॥१॥४०॥ ॥महाँ२ इंद्रो वज्रबाहुः षोडशी शर्मयछतु॥स्वस्तिनोम
घवाकरोतुहंतुपाप्मानंयोस्मांद्वेष्टि॥उपयामगृहीतोसीद्रायत्वाषोडशिनएषतेयो
निरिंद्रायत्वाषोडशिने॥१॥~~सर्वस्य~~महांत्षड्विंशतिः~~षड्विंशतिः~~॥४१॥ ॥सजोषा महान्षड्विंशतिः
इंद्रसगणोमरुद्भिःसोमंपिबवृत्रहंछूरविद्वान्॥जहिशत्रूँरपमृधोनुदस्वाथाभयं
कृणुहिविश्वतोनः॥उपयामगृहीतोसीद्रायत्वाषोडशिनएषतेयोनिरिंद्रायत्वा
षोडशिने॥१॥सजोषास्त्रिंशत्॥४२॥ ॥उदुत्यंजातवेदसंदेवंवहंतिकेतवः॥दृ
शेविश्वायसूर्यं॥चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः॥आप्रा
द्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्च॥अग्नेनयसुपथारायेअ
स्मान्विश्वानिदेववयुनानिविद्वान्॥युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेन

॥त्रै०सं०४॥ मेउक्निंविधेम॥दिवंगछसुवःपतनूपेण॥१॥वोनूपमभ्यैमिवयंसावयः॥तुथोवौवि
॥२८॥ श्ववेदाविभजतुवर्षिष्ठिअधिनाके॥एतत्तेअग्नेराधऐतिसोमच्युतंतन्मित्रस्यपथानं
युर्तस्यपथाप्रेतचंद्रदक्षिणायज्ञस्यपथास्कवितानयंतीब्राह्मणमद्यराध्यासमृ
षिमार्षेयंपितृमंतंपैतृमत्यंसुधातुदक्षिणंविसुवःपश्यव्यंतरिक्षंयतस्वसद
स्यैरस्महोत्रादेवत्रागछतमधुमतीःप्रदातारमाविशतानवहायास्मांदेवया
नेनपथेतस्कृतांलोकेसीदततन्नःसंस्कृतं॥२॥नूपेणसदस्यैरष्टादशच॥
॥४३॥ ॥धातारातिःसवितेदंजुषंतांप्रजापतिर्निधिपतिर्नोअग्निः॥त्वष्टाविष्णुः
प्रजयासंरराणोयजमानायद्रविणंदधातु॥समिंद्रणोमनसानेषिगोभिःस
ंसूरिभिर्मघवंत्संस्वस्त्या॥संब्रह्मणादेवकृतंयदस्तिसंदेवानांसुमत्याय ॥२८॥

त्रियानां॥संवर्च्चसापयसासंतनूभिरगन्महिमनसासꣳशिवेन॥त्वष्टानोअत्रव
रिवः कृणोतु॥१॥अनुमार्ष्टुतनुवोयद्विलिष्टं॥यद्द्यत्वाप्रयतियज्ञेअस्मिन्नग्नेहो
तारमवृणीमहीह॥ऋधगयाडृधगुताशमिष्ठाः प्रजानन्यज्ञमुपयाहिविद्वान्॥
स्वगावोदेवाः सदनमकर्मयआजग्मसवनेदंजुषाणाः॥जक्षिवाꣳसःपपिवाꣳस
श्चविश्वेस्मेधत्तवसवोवसूनि॥यानावहउशतोदेवदेवांतान्॥२॥प्रेरयस्वेअग्नेस
धस्थे॥वहमानाभरमाणाहवीꣳषिवसुंघर्मंदिवमातिष्ठतानु॥यज्ञयज्ञंगच्छयज्ञ
पतिंगच्छस्वांयोनिंगच्छस्वाहैषतेयज्ञोयज्ञपतेसहसूक्तवाकःसुवीरःस्वाहादे
वागातुविदोगातुंवित्वागातुमितमनसस्पतइमंनोदेवदेवेषुयज्ञꣳस्वाहावाचिस्वा
हावातेधाः॥३॥कृणोतुतानष्टाचत्वारिꣳशच्च॥४४॥ ॥उरुꣳहिराजावरुणश्चका

॥प्र०स०४॥ ॥२९॥

रुसूर्यायपंथामन्वेतवाउ॥अपदेपादाप्रतिधातवेकरुतापवक्ताहृदयाविधश्चित्
॥शतंतेराजन्भिषजःसहस्रमुर्वीगंभीरासुमतिष्टेअस्तु॥बाधस्वद्वेषोनिर्ऋतिंप
राचैःकृतंचिदेनःप्रमुमुग्ध्यस्मत्॥अभिष्ठितोवरुणस्यपाशोग्नेरनीकमपआवि
वेश॥अपांनपात्प्रतिरक्षन्नसुर्यंदमेदमे॥१॥समिधंयक्ष्यग्ने॥प्रतितेजिह्वाघृतमु
च्चरण्येत्समुद्रेतेहृदयमप्स्वंतः॥संत्वाविशंत्वोषधीरुतापोयज्ञस्यत्वायज्ञपतेहवि
र्भिः॥सूक्तवाकेनमोवाकेविधेमावभृथनिचंकुणनिचेरुरसिनिचंकुणावदेवैर्दे
वकृतमेनोयाडवमर्त्यैर्मर्त्यकृतमुरोरानोदेवरिषस्पाहिसुमित्रानआपओषध
यः॥२॥संतुदुर्मित्रास्तस्मैभूयासुर्योस्मान्द्वेष्टियंचवयंद्विष्मोदेवीरापएषवोग
र्भस्तंवःसुप्रीतंसुभृतमकर्मदेवेषुनःसुकृतोब्रूतात्प्रतियुतोवरुणस्यपाशःप्र ॥२९॥

त्यस्तोवरुणस्यपाशाएधोस्येधिषीमहिसमिदसितेजोसितेजोमयिधेह्यपोअन्व
चारिषꣳरसेनसमसृक्ष्महि॥पयस्वाꣳअग्नआगमंतंमासꣳसृजवर्चसा॥३॥दमैद
मओषधयआपइं॥५५॥ ॥यस्त्वाहृदाकीरिणामन्यमानोमर्त्यंमर्त्योजोहवीमि॥जा
तवेदोयशोअस्मासुधेहिप्रजाभिरग्नेअमृतत्वमश्यां॥यस्मैत्वꣳसुकृतेजातवेदउलो
कमग्नेकृणवस्योनं॥अश्विनꣳसपुत्रिणंवीरवंतंगोमंतꣳरयिंनशतेस्वस्ति॥त्वेसुपु
त्रशवसोवृत्रन्कामकातयः॥नत्वामिंद्रातिरिच्यते॥उक्थउक्थेसोमइंद्रंममादनीथे
नीथेमघवानं॥१॥सुतासः॥यदीꣳसबाधःपितरंनपुत्राःसमानदक्षाअवसेहवंते॥अ
ग्नेरसेनतेजसाजातवेदोविरोचसे॥रक्षोहामीवचातनः॥अपोअन्वचारिषꣳरसेनस
मसृक्ष्महि॥पयस्वाꣳअग्नआगमंतंमासꣳसृजवर्चसा॥वसुर्वसुपतिर्हिकमस्यग्नेवि

॥अ०स०४॥ भा वस्क्रः॥ स्यामंतेस्क्रमुतावपि॥ त्वामग्नेवस्क्रपतिंवस्क्रनामभिप्रमंदे॥२॥ अध्वरे
॥३०॥ षुराजंन्॥ त्वयावाजंवाजयंतोजयेमाभिष्यामपृत्सुतीर्मर्त्यानां॥ त्वामग्नेवाजसा
तमंविप्रावर्धंतिस्क्रष्टुतं॥ सनोरास्वस्क्रवीर्यं॥ अयंनोअग्निर्वरिवःकृणोत्वयंमृधः
पुरएतुप्रभिंदन्॥ अयंशत्रूंजयतुजर्हृषाणोयंवाजंजयतुवाजसातौ॥ अग्निना
ग्निःसमिध्यतेकविर्गृहपतिर्युवा॥ हव्यवाड्जुह्वास्यः॥ त्वंह्यग्नेअग्निनाविप्रोवि
प्रेणसंत्सता॥ सखासख्यासमिध्यसे॥ उ दग्नेशुचयस्तवविज्योतिषा॥३॥ मु
घवानंमंदेह्यग्नेचतुर्दशाच॥४६॥ ॥७॥ वाचःप्राणायत्वा॥ उपयामगृहीतोस्य
पानायत्वा॥ आवायोवायवेसजोषाभ्यांत्वा॥ अयमृतायुभ्यांत्वा॥ यावामश्विभ्यां
माध्वीभ्यांत्वा॥ प्रातर्युजावश्विभ्यांत्वा॥ अयंवेनःशंडायत्वैषतेयोनिर्वीरतां ॥३०॥

पाहि॥तंमर्कायत्वैषतेयोनिःप्रजाःपाहि॥येदेवास्त्रिःंशदाग्रयणोसिविश्वेभ्य
स्त्वादेवेभ्यः॥उपयामगृहीतोसींद्रायत्वोक्थायुवे॥मूर्धानंमग्नयेत्वावैश्वानराय॥
मधुश्चसंसर्पोसि॥इंद्राग्नीद्राग्निभ्यांत्वा॥ओमासोविश्वेभ्यस्त्वादेवेभ्यः॥मरु
त्वंतंत्रीणींद्रायत्वामरुत्वते॥महांद्रमहेंद्रायत्वा॥कदाचनादित्येभ्यस्त्वा॥कदाचन
स्तरीर्विवस्वआदित्य॥इंदुःंशुचिरूपः॥वामंत्रीदेवायत्वासवित्रे॥सुशर्माविश्वेभ्य
स्त्वादेवेभ्यः॥बृहस्पतिस्त्वष्टासोमंपिबस्वाहा॥हरिरसिसहसोमाइंद्रायस्वाहा
॥अग्नआयूंःष्यग्नयेत्वातेजस्वते॥उत्तिष्ठन्निंद्रायत्वोजस्वते॥तरणिःसूर्यायत्वा
भ्राजस्वते॥आतिष्ठाद्याःषडिंद्रायत्वाषोडशिने॥उरुमायुष्टेयदेवामनुग्धि॥
अग्नाविष्णुमुमुक्तं॥परावेपंक्तयः॥देववेयेदेवाःपंक्तयौ॥परावैसवाचं॥भ्र

।प्र०स०४।। मिर्लेकुः सल्लेकः स्रुल्लेकः ।। विष्णोरुडुत्तमं ।। अंनपतेपुनस्त्वादित्याः ।। त्वंविचर्षणि ।।
।।३१।। यस्त्वाविरोचसे ।। अध्वरेषुस्रुष्टुतं ।। यस्त्वोदग्ने ।। प्रदेवंतंमर्जयंत ।। ।।आददेवाच
स्पतयउपयामगृहीतोस्यावायोअयंवांयावांप्रातर्युजोवयंवेनस्तंप्रत्नथायेदे
वास्त्रिंरशउपयामगृहीतोसिमूर्धानंमधुश्चेंद्राग्नीओमासोमरुत्वंतमिंद्रमरुत्वो
मरुत्वांन्महान्महान्वल्कदावाममदंब्येभिर्हिरण्यपाणिंरुक्तशर्मावृहस्पतिर्ह
रिरस्यग्नेउत्तिष्ठंतरणिरापप्रायस्त्वेयुष्टयेज्योतिष्मतीप्रयासायचित्तमातिष्ठंद्रु
मसाविसर्वस्यमहांत्सजोषावुडुत्वंधातोरुंहियस्त्वाषट्‌त्वारिंशत् ।।४६।। ।।
आददेयेदेवामहानुत्तिष्ठंत्सर्वस्यसंतुदुर्मित्राश्वतुःपंचाशत् ।।५४।। ।।आ
ददेविज्योतिषा ।। ।।छ।। ।।हरिःॐ ।। ।।छ।। ।।देवासुराःसंयत्ताआसंतेदेवा ।।३१।।

विजयमुपयंतोग्नौवामंवसुसन्यदधतेदमुनोभविष्यतियदिनोजेष्यंतीतितदग्निर्न्यका
मयततेनापाक्रामत्तद्देवाविजित्यावरुरुत्समानाअन्वायंतदस्यसहसादित्संतसो
रोदीद्यदरोदीत्तद्रुद्रस्यरुद्रत्वंयदश्र्वशीयततत॥ ॥रजतंहिरण्यमभवत्तस्मा
द्रजतंहिरण्यमदक्षिण्यमश्रुजंहियोबर्हिषिददातिपुरास्यसंवत्सराद्गृहेरुदं
तितस्माद्बर्हिषिनदेयंसोग्निरब्रवीद्भाग्यसान्यथवइदमितिपुनराधेयंतेकेवं
लमित्यब्रुवन्नृध्नवत्खलुसइत्यब्रवीद्योमद्देवत्यमग्निमादधाताइतितंपूषाध
त्ततेन॥२॥पूषार्ध्नोत्तस्मात्पौष्णाःपशवउच्यंतेतंत्वष्टाधत्ततेनत्वष्टार्ध्नोत्तस्मात्त्वा
ष्ट्राःपशवउच्यंतेतंमनुराधत्ततेनमनुरार्ध्नोत्तस्मान्मानव्यःप्रजाउच्यंतेतंधा
ताधत्ततेनधातार्ध्नोत्संवत्सरोवैधातातस्मात्संवत्सरंप्रजाःपशवोनुप्रजा

प्र०स०५ यंतेयएवंपुनराधेयस्यर्धिंवेद॥३॥ऋध्नोत्येवयोस्यैवंबंधुतांवेद्बंधुमान्भवति
३२ भागधेयंवाअग्निराहितइच्छमानःप्रजांपशून्यजमानस्योपदोद्रावोद्वास्यपुन
रादधीतभागधेयेनैवैनंसमर्धयत्यथोशांतिरेवास्यैषापुनर्वस्वोरादधीतैतद्वैपुन
राधेयस्यनक्षत्रंयत्पुनर्वसूस्वायामेवैनंदेवतायामाधायब्रह्मवर्चसीभवतिदर्भै
रादधात्ययातयामत्वायदर्भैरादधात्यद्भ्यएवैनमोषधीभ्योवरुध्याधत्तेपंचकपा
लःपुरोडाशोभवतिपंचवाऋतवऋतुभ्यएवैनमवरुध्याधत्ते॥४॥अशीयततन्ते
नवेददर्भैःपंचविंशतिश्च॥१॥ ॥परावाएषयज्ञंपशून्वपतियोग्निमुद्वासयते
पंचकपालःपुरोडाशोभवतिपांक्तोयज्ञःपांक्ताःपशवोयज्ञमेवपशूनवरुंधेवी
रहावाएषदेवानांयोग्निमुद्वासयतेनवाएतस्यब्राह्मणाऋतायवःपुरान्नमक्षन्पं ३२

त्त्यो याज्यानुवाक्याभवंतिपांक्तोयज्ञःपांक्तःपुरुषोदेवानेववीरंनिरवदायाग्निंपु
नरा॥१॥धत्तेशताक्षराभवंतिशतायुःपुरुषःशतेंद्रियआयुष्येवेंद्रियेप्रतितिष्ठतियद्वा
अग्निराहितोनर्ध्यतेज्यायोभागधेयंनिकामयमानोयदाग्नेयंसर्वंभवतिसैवास्य
र्धिःसंवाएतस्यगृहेवाक्सृज्यतेयोग्निमुद्वासयतेसवाचंसंसृष्टांयजमानईश्व
रोनुपराभवितोर्विभक्तयोभवंतिवाचोविधृत्यैयजमानस्यापराभावाय॥२॥विभ
क्तिंकरोतिब्रह्मैवतदकरुपांशुयजतियथावामंवसुविविदानोगूहतितादृगेव
तदग्निंप्रतिस्विष्टकृतंनिराहयथावामंवसुविविदानःप्रकाशंजिगमिषतितादृगेव
तद्विभक्तिमुक्त्वाप्रयाजेनवषट्करोत्यायतनादेवनैतियजमानोवैपुरोडाशःप
शवएतेआहुतीयदभितःपुरोडाशमेतेआहुती॥३॥जुहोतियजमानमेवाभि

यतःपृश्निभिःपरिगृह्णातिकृतयजुःसंभृतसंभारइत्याहुर्नसंभृत्याःसंभारानयजुः
कर्तव्यमित्यथोखलुसंभृत्याएवसंभाराःकर्तव्यंयजुर्यज्ञस्यसमृध्यैपुनर्निष्कृतो
रथोदक्षिणापुनरुत्स्यूतंवासःपुनरुत्सृष्टोनड्वान्पुनराधेयस्यसमृध्यैसप्ततेअग्ने
समिधःसप्तजिह्वाइत्यग्निहोत्रंजुहोतियत्रयत्रैवास्यन्यक्तंततः॥४॥एवैनमवरुं
धेवीरहावाएषदेवानांयोग्निमुद्वासयतेतस्यवरुणएवर्णयादाग्निवारुणमेका
दशकपालमनुनिर्वपेद्यंचैवहंतियश्चास्यर्णयात्तौभागधेयेनप्रीणातिनार्ति
मार्छतियजमानः॥५॥आपराभावायपुरोडाशमेतेआहुतीवतः॥षड्विंशश्च॥
॥२॥ ॥भूमिर्भूम्नाद्यौर्वरिणांतरिक्षंमहित्वा॥उपस्थेतेदेव्यदितेग्निमन्नादमं
नाद्यायादधे॥आयंगौःपृश्निरक्रमीदसनन्मातरंपुनः॥पितरंचप्रयंत्सुवः॥ ३३

त्रिꣳशाधामविराजतिवाक्पतंगायशिश्रिये॥प्रत्यस्यवहद्युभिः॥अस्यप्राणादपानत्यं
तश्चरतिरोचना॥व्यख्यन्महिषःसुवः॥यत्वा॥१॥क्रुद्धःपरोवपमन्युनायदवर्त्त्या॥सु
कल्पमग्नेतत्तवपुनस्त्वोद्दीपयामसि॥यत्तेमन्युपरोप्तस्यपृथिवीमनुदध्वसे॥आ
दित्याविश्वेतद्देवावसवश्चसमाभरन्॥मनोज्योतिर्जुषतामाज्यंविछिन्नंयज्ञꣳसमि
मंदधातु॥बृहस्पतिस्तनुतामिमंनोविश्वेदेवाइहमादयंतां॥सप्ततेअग्नेसमिधः
सप्तजिह्वाःसप्त॥२॥ऋषयःसप्तधामप्रियाणि॥सप्तहोत्राःसप्तधात्वायजंतिस
प्तयोनीरापृणस्वाघृतेन॥पुनरूर्जानिवर्तस्वपुनरग्नइषायुषा॥पुनर्नःपाहिविश्व
तः॥सहरय्यानिवर्तस्वाग्नेपिन्वस्वधारया॥विश्वप्स्नियाविश्वतस्परि॥लेकःसले
कःसुलेकस्तेनआदित्याआज्यंजुषाणावियंतुकेतःसकेतःसुकेतस्तेनआदित्या

॥प्र॰स॰५॥ आज्यंजुषाणावियंतुदिवंस्वाहाऽदितिर्देवजूतिस्तेनआदित्याआज्यंजुषाणावियंतु॥३॥ ॥५॥
॥३४॥ त्वाजिह्वाःसुमसुकेतुस्तेनत्रयोदशाच्च॥३॥ ॥भूमिर्भूम्नाद्यौर्वरिणेत्याहाशिषैवैनमाधे
त्तेसर्पावैजीर्यंतोमन्यंतसएतंकसर्णीरःकाद्रवेयोमंत्रमपश्यन्ततोवैतेजीर्णास्तनूरपा
घ्नतसर्पराज्ञियाऋग्भिर्गार्हपत्यमादधातिपुनर्नवमेवैनमजरंकृत्वाधत्तेथोपूतमेव
पृथिवीमन्नाद्यंनोपानमत्सैतं॥१॥मंत्रमपश्यन्ततोवैतामन्नाद्यमुपानमद्यत्सर्प
राज्ञियाऋग्भिर्गार्हपत्यमादधात्यन्नाद्यस्यावरुध्याअथोअस्यामेवैनंप्रतिष्ठितमा
धत्तेयत्वाक्रुद्धःपरोवपेत्याहापन्हुतएवास्मैतत्पुनस्त्वोद्दीपयामसीत्याहसमिंधएवै
नंयत्तेमन्युपरोप्तस्येत्याहदेवताभिरेव॥२॥एनंसंभरतिविवाएतस्ययज्ञश्छिद्य
तेयोग्निमुद्वासयतेबृहस्पतिवत्यर्चोपतिष्ठतेब्रह्मवैदेवानांबृहस्पतिर्ब्रह्मणैवय ॥३४॥

न्नꣳ संदधाति विच्छिन्नं यज्ञꣳ समिमं दधात्वित्याह संतत्यै विश्वे देवा इह मादयंता
मित्याह संतत्यैव यज्ञं देवेभ्योनुदिशति सप्त ते अग्ने समिधः सप्त जिह्वाः ॥३॥ इत्याह स
प्त सप्त वै सप्तधाग्नेः प्रियास्तनुवस्ता एवावरुंधे पुनरूर्जा सह रय्येत्यभितः पुरोडाश
माहुती जुहोति यजमानमेवोर्जा च रय्या चोभयतः परिगृह्णात्यादित्या वै अस्माल्लो
कादमुं लोकमायंते मुष्मिंल्लोके व्यतृष्यंत इमं लोकं पुनरभ्यवेत्याग्निमाधायैतान्
होमानजुहवुस्ते आर्ध्नुवंते सुवर्गं लोकमायन्यः पराचीनं पुनराधेयादग्निमादधीत
स एतान्होमांजुहुयाद्यामेवादित्या ऋद्धिमार्ध्नुवंतामेवर्ध्नोति ॥४॥ सैतं देवताभिर्
वजिह्वा एतान्पंचविꣳशतिश्च ॥४॥ ॥ उपप्रयंतो अध्वरं मंत्रं वोचेमाग्नये ॥ आरे अस्मे
च शृण्वते ॥ अस्य प्रत्नामनुद्युतꣳ शुक्रं दुदुह्रे अह्रयः ॥ पयः सहस्रसामृषिं ॥ अ

प्र०स०५
३५

ग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयं॥अपांꣳरेतांꣳसिजिन्वति॥अयमिहप्रथमोधा
यिधातृभिर्होतायजिष्ठोअध्वरेष्वीड्यः॥यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभु
वंविशेविशे॥उभावामिंद्राग्नीआहुवध्यै॥१॥उभाराधसःसहमादयध्यै॥उभादा
तारा विषांꣳरयीणामुभावाजस्यसातयेहुवेवां॥अयंतेयोनिर्ऋत्वियोयतोजातो
अरोचथाः॥तंजानन्नग्नआरोहाथानोवर्धयारयिं॥अग्नआयूंꣳषिपवसआसुवो
र्जमिषंचनः॥आरेबाधस्वदुच्छुनां॥अग्नेपवस्वस्वपाअस्मेवर्चःसुवीर्यं॥दधत्पोषं
रयिं॥२॥मयि॥अग्नेपावकरोचिषामंद्रयादेवजिह्वया॥आदेवान्वक्षियक्षिच॥
सनःपावकदीदिवोग्नेदेवाꣳइहावह॥उपयज्ञꣳहविश्चनः॥अग्निःशुचिव्रततमःशु
चिर्विप्रःशुचिःकविः॥शुचीरोचतआहुतः॥उदग्नेशुचयस्तवशुक्राभ्राजंतईरते॥ ॥३५॥

तवुज्योतीꣳष्युर्चयः॥आयुर्दाअग्नेस्यायुर्मे॥३॥देहिवर्चोदाअग्नेसिवर्चोमेदेहित
नूपाअग्नेसितनुवंमेपाह्यग्नेयन्मेतनुवाऊनंतन्मआपृणचित्रावसोस्वस्तितेपारमशी
येंधानास्त्वाशतꣳहिमाधुमंतःसमिधीमहिवयस्वंतोवयस्कृतंयशस्वंतोयशस्कृतꣳ
सुवीरासोअदाभ्यं॥अग्नेसपत्नदंभनंवर्षिष्ठेअधिनाके॥संत्वमग्नेसूर्यस्यवर्चसाग
थाःसमृषीणाꣳस्तुतेनसंप्रियेणधाम्ना॥त्वमग्नेसूर्यवर्चाअसिसंमामायुषावर्चसा
प्रजयासृज॥४॥आकुवध्येपोषꣳरयिंमेवर्चसासत्सदशाच॥५॥ ॥संपश्यामिप्रजाअ
हमिडप्रजसोमानवीः॥सर्वाभवंतुनोगृहे॥अंभस्थांभोवोभक्षीयमहस्थमहोवोभक्षीय
सहस्थसहोवोभक्षीयोर्जस्थोर्जंवोभक्षीयरेवतीरमध्वमस्मिंल्लोकेस्मिन्गोष्ठेस्मिन्क्ष
येस्मिन्योनाविहैवस्ततोमापगातबह्वीर्मेभूयास्त॥६॥सꣳहितासिविश्वरूपीरामूर्जा

॥प्र०स०५॥ विशागौपृत्येनारायस्पोषेणसहस्रपोषंवःपुष्यासंमयिवोरायःश्रयंतां॥उपत्वाग्नेदिवेदि
॥३६॥ वेदोषावस्तर्धियावयं॥नमोभरंतएमसि॥राजंतमध्वराणांगोपामृतस्यदीदिविं॥वर्ध
मानंस्वेदमे॥सनःपितेवसूनवेग्नेसूपायनोभव॥सचस्वानःस्वस्तये॥अग्ने॥२॥त्वं
नोअंतमः॥उतत्राताशिवोभववरूथ्यः॥तंत्वाशोचिष्ठदीदिवः॥सुम्नायनूनमीमहेस
खिभ्यः॥वसुरग्निर्वसुश्रवाः॥अछानक्षिद्युमत्तमोरयिंदाः॥ऊर्जावःपश्याम्यूर्जामा
पश्यतरायस्पोषेणवःपश्यामिरायस्पोषेणमापश्यतेडास्थमधुकृतस्योनामाविश
तेरामदः॥सहस्रपोषंवःपुष्यासं॥३॥मयिवोरायःश्रयंतां॥तत्सवितुर्वरेण्यंभर्गो
देवस्यधीमहि॥धियोयोनःप्रचोदयात्॥सोमानंस्वरणंकृणुहिब्रह्मणस्पते॥
कक्षीवंतंयऔशिजं॥कदाचनस्तरीरसिनेंद्रसश्चसिदाशुषे॥उपोपेन्नुमघवन्भू ३६

यइन्नुतेदानंदेवस्यपृच्यते॥परित्वाग्नेपुरंवयंविप्रꣳसहस्यधीमहि॥धृषद्वर्णंदिवे
दिवेभेत्तारंभंगुरावतः॥अग्नेगृहपतेसुगृहपतिरहंत्वयागृहपतिनाभूयासꣳसुगृह
पतिर्मयात्वंगृहपतिनाभूयाःशतꣳहिमास्तामाशिषमाशासेतंतवेज्योतिष्मतींतामा
शिषमाशासेमुष्मैज्योतिष्मतीं॥४॥भूयास्तस्वस्तयेग्नेपुष्यासंधृषद्वर्णमिकान्वत्रिꣳ
शच्च॥६॥ ॥अयज्ञोवाएषयोसामोपप्रयंतोअध्वरमित्याहस्तोममेवास्मैयुनक्त्यु
पेत्याहप्रजावैपशवउपेमंलोकंप्रजामेवपशूनिमंलोकमुपैत्यस्यप्रत्नामनुद्युतमि
त्याहसुवर्गोवैलोकःप्रत्नःसुवर्गमेवलोकꣳसमारोहत्यग्निर्मूर्धादिवःककुदित्याह
॥१॥ मूर्धानं॥एवैनꣳसमानानांकरोत्यथोदेवलोकादेवमनुष्यलोकेप्रतितिष्ठत्ययमिह
प्रथमोधायिधातृभिरित्याहमुख्यमेवैनंकरोत्युभावामिंद्राग्नीआहुवध्याइत्याहो

॥प्र०स०५॥ ॥३८॥ जोबलमेवावरुंधेयंतेयोनिर्ऋत्वियइत्याहपशवोवैरयिःपशूनेवावरुंधेषड्भिरुपतिष्ठते
षड्वै॥२॥ऋतवऋतुष्वेवप्रतितिष्ठतिषड्भिरुत्तराभिरुपतिष्ठतेद्वादशसंपद्यंतेद्वादशमासाः
संवत्सरःसंवत्सरएवप्रतितिष्ठतियथावैपुरुषोश्वोगौर्जीर्यत्येवमग्निराहितोजीर्यतिसं
वत्सरस्यपरस्तादग्निपावमानीभिरुपतिष्ठतेपुनर्नवमेवैनमजरंकरोत्यथोपुनात्येवोप
तिष्ठतेयोगएवास्यैषउपतिष्ठते॥३॥दमएवास्यैषउपतिष्ठतेयाच्ञेवास्यैषोपतिष्ठ
तेयथापापीयाञ्छ्रेयसआहृत्यनमस्यतिताद्दृगेवतदायुर्दाअग्नेस्यायुर्मेदेहीत्याहा
युर्दाह्येषवर्चोदाअग्नेसिवर्चोमेदेहीत्याहतनूपाअग्नेसितनुवंमेपाहीत्याह॥४॥त
नूपाह्येषोग्नेयन्मेतनुवाऊनंतन्मआपृणेत्याहयन्मेप्रजायैपशूनामूनंतन्मआपूरये
तिवावैतदाहचित्रावसोस्वस्तितेपारमशीयेत्याहरात्रिर्वैचित्रावसुरव्युष्ट्यैवाएतस्यै ॥३८॥

पुरा ब्राह्मणा अभैषुरिति पुष्टिमेवावरुंधे इध्मानस्त्वा शतं॥५॥ हिमा इत्याह शतायुः पुरु
षः शतेंद्रिय आयुष्येवेंद्रिये प्रतितिष्ठत्येषा वै सूर्मी कर्णकावत्येतया ह स्म वै देवा अ
सुराणां शततर्हांस्तृंहंति यदेतया समिधमादधाति वज्रमेवैतच्छतघ्नीं यजमानो भ्रा
तृव्याय प्रहरति स्तृत्या अछंबट्कारं संत्वमग्ने सूर्यस्य वर्चसागथा इत्याहैतत्वमसीदं महं
भूयासमिति वा वैतदाह त्वमग्ने सूर्यवर्चा असीत्याहाशिषमेवैतामाशास्ते॥६॥ मूर्धा
नंष द्वा एष उपतिष्ठते पाहीत्याह शतमहं षोडश च॥७॥ ॥ संपश्यामि प्रजा अहमि
त्याह यावंत एव ग्राम्याः पशवस्तानेवावरुंधे अंभस्थांभो वो भक्षीयेत्याहांभो ह्येता महस्थ
महो वो भक्षीयेत्याह महो ह्येताः सहस्थ सहो वो भक्षीयेत्याह सहो ह्येता ऊर्जस्थोर्जं वो
भक्षीयेति॥१॥ आहोर्जो ह्येता रेवती रमध्वमित्याह पशवो वै रेवतीः पशूनेवात्मन्रमय

प्र०स०५
॥३८॥

नःइहैवस्तेतोमापगातेत्याहध्रुवाएवैनाअनपगाःकुरुतइष्टकचिद्वाअन्योग्निःपशु
चिदन्यःसꣳहितासिविश्वरूपीरितिवत्समभिमृशत्युपैवैनंधत्तेपशुचितमेनंकुरुते
प्र॥२॥वाएषोस्माल्लोकाच्यवतेयआहवनीयमुपतिष्ठतेगार्हपत्यमुपतिष्ठतेस्मि
न्नेवलोकेप्रतितिष्ठत्यथोगार्हपत्यायैवनिह्नुतेगायत्रीभिरुपतिष्ठतेतेजोवैगायत्री
तेजएवात्मन्धत्तेथोयदेतंतृचमन्वाहसंतत्यैगार्हपत्यंवाअनुद्विपादोवीराःप्रजायं
तेयएवंविद्वान्द्विपदाभिर्गार्हपत्यमुपतिष्ठते॥३॥आस्यवीरोजायतऊर्जावःपश्याम्यू
र्जमापश्यतेत्याहाशिषमेवैतामाशास्तेतत्सवितुर्वरेण्यमित्याहप्रसूत्यैसोमानꣳस्व
रणमित्याहसोमपीथमेवावरुन्धेकृणुहिब्रह्मणस्पतइत्याहब्रह्मवर्चसमेवाव
रुन्धेकदाचनस्तरीरसीत्याहनस्तरीꣳरात्रिंवसति॥४॥यएवंविद्वानग्निमुपतिष्ठते ३९

परित्वाग्नेपुरंवयमित्याहपरिधिमेवैतंपरिदधात्यस्कंदायाग्नेगृहपतइत्याहयथाय
जुरेवैतच्छतंहिमाइत्याहशतंत्वाहेमंतानिंधिषीयेतिवावैतदाहपुत्रस्यनामगृह्णात्य
न्नादमेवैनंकरोतितामाशिषमाशासेतंतवेज्योतिष्मतीमितिब्रूयाद्यस्यपुत्रोजातस्या
त्तेजस्व्येवास्यब्रह्मवर्चसीपुत्रोजायतेतामाशिषमाशासेमुष्मैज्योतिष्मतीमितिब्रूया
द्यस्यपुत्रोजातस्यात्तेजएवास्मिन्ब्रह्मवर्चसंदधाति॥५॥ऊर्जंवोभक्षीयेतिप्रगार्हप
त्यमुपतिष्ठतेवसतिज्योतिष्मतीमेकांनत्रिंशच्च॥८॥ ॥अग्निहोत्रंजुहोतियद्देव
किंचयजमानस्यस्वंतस्यैवतद्रेतःसिंचतिप्रजननेप्रजननंहिवाअग्निरथौषधी
रंतगतादहतितास्ततोभूयसीःप्रजायंतेयत्सायंजुहोतिरेतएवतत्सिंचतिप्रैवप्रात
स्तनेनजनयतितद्रेतःसिक्तंनत्वष्ट्राविकृतंप्रजायतेयावच्छोवैरेतसःसिक्तस्य॥३॥

प्र०स०५ त्वष्टारूपाणिविकरोतितावृच्छौवैतत्प्रजायतएषवैदैव्यस्त्वष्टायोयजंतेबह्वीभिरुपति
३९ ष्ठतेरेतसएवसिक्तस्यबहुशोरूपाणिविकरोतिसप्रैवजायतेश्वश्वोभूयान्भवतियए
वंविद्वानग्निमुपतिष्ठतेहर्देवानामासीद्रात्रिरसुराणांतेसुरायद्देवानांवित्तंवेद्यमासी
त्तेनसह॥२॥रात्रिंप्राविशंस्तेदेवाहीनाअमन्यंततेपश्यन्नाग्नेयीरात्रिराग्नेयाःपशव
इममेवाग्निंस्तवामसनस्तुतःपशून्पुनर्दास्यतीतितेग्निमस्तुवंत्सएभ्यस्तुतोरात्रि
याअध्यहरभिपशून्निरार्जत्तेदेवाःपशून्वित्वाकामांअकुर्वतयएवंविद्वानग्निमु
पतिष्ठतेपशुमान्भवति॥३॥आदित्योवाअस्माल्लोकादमुंलोकमैत्सोमुंलोकंगत्वा
पुनरिमंलोकमभ्यध्यायत्सइमंलोकमागत्यमृत्योरबिभेन्मृत्युसंयुतइवह्ययं
लोकःसोमन्यतेममेवाग्निंस्तवानिसमास्तुतःसुवर्गंलोकंगमयिष्यतीतिसोग्निम ३९

स्तौत्सएनꣳस्तुतःसुवर्गंल्लोकमगमयद्यः॥४॥एवंविद्वानग्निमुपतिष्ठतेसुवर्गमेव
लोकमेतिसर्वमायुरेत्यभिवाएषोग्नीआरोहतियएनावुपतिष्ठतेयथाखलुवैश्रे
यानभ्यारूढःकामयतेतथाकरोतिनक्तमुपतिष्ठतेनप्रातःसꣳहिनक्तंव्रतानिसृज्यं
तेसहश्रेयाꣳश्चपापीयाꣳश्चासतेज्योतिर्वाअग्निस्तमोरात्रिर्यत्॥५॥नक्तमुपति
ष्ठतेज्योतिषैवतमस्तरत्युपस्थेयोग्नी३र्नोपस्थेया३इत्याहुर्मनुष्यायेन्वैयोहर
हराहृत्याथैनंयाचतिसइन्वैतमुपार्छत्यथकोदेवानहरहर्याचिष्यतीतितस्मा
न्नोपस्थेयोथोखल्वाहुराशिषेवैकंयजमानोयजतइत्येषाखलुवै॥६॥आहिताग्ने
राशीर्यदग्निमुपतिष्ठतेतस्मादुपस्थेयःप्रजापतिःपशूनसृजततेसृष्टाअहोरात्रे
प्राविशंतांछंदोभिरन्वविंदद्यछंदोभिरुपतिष्ठतेस्वमेवतदन्विच्छतिनतत्रजाम्यस्ती

त्याङ्कुर्योहिरहरुपतिष्ठतइतियोवाअग्निंप्रत्यङुपतिष्ठतेप्रत्येनमोषतियःपराङ्विष्वङुप्रजयापशुभिरेतिकवातिर्यङिवोपतिष्ठतनेनंप्रत्योषतिनविष्वङुप्रजयापशुभिरेति॥७॥सिक्तस्यसहभवतियोयत्खलुवैपशुभिस्त्रयोदशच॥९॥ ॥ममनामप्रथमंजातवेदःपितामाताचदधतुर्यदग्रे॥तत्वंबिभ्रहिपुनरामदैतोस्तवाहंनामबिभराण्यग्ने॥ममनामतवचजातवेदोवाससीइवविवसानौयेचरावन्न॥आयुषत्वंजीवसेवयंयथायुथंविपरिदधावहैपुनस्ते॥नमोग्नयेप्रतिविध्यायनमोनाधृष्टायनमःसम्राजे॥अषाढः॥३॥अग्निर्वृहहद्याविश्वजित्सहंत्यःश्रेष्ठोगंधर्वः॥त्वसितारोअग्नेदेवास्त्वामाङ्कतयस्त्वहविवाचनाः॥संमामायुषासंगौपत्येनसुहितमाधाः॥अयमग्निःश्रेष्ठतमोयंभगवत्तमोयंसहस्रसातमः॥अस्माअस्तुसुवीर्यं॥मनो ४०

ज्योतिर्जुषतामाज्यंविछिंनंयज्ञंसमिमंदधातु॥याइष्टाउषसोनिम्रुचश्चताःसंदधामि
हविषाघृतेन॥पयस्वतीरोषधयः॥२॥पयस्वद्वीरुधांपयः॥अपांपयसोयत्पयस्तेनमा
मिंद्रसंसृज॥अग्नेव्रतपतेव्रतंचरिष्यामितच्छकेयंतन्मेराध्यतां॥अग्निंहोतारमि
हतंकुवेदेवान्यज्ञियानिहयान्हवामहे॥आयंतुदेवाःसुमनस्यमानावियंतुदेवा
हविषोमेअस्य॥कस्त्वायुनक्तिसत्वायुनक्तुयानिघर्मेकपालान्युपचिन्वंति॥३॥
वेधसः॥पूष्णस्तान्यपिव्रतइंद्रवायूविमुंचतां॥अभिन्नोघर्मोजीरदानुर्यतआत्त
स्तदगन्पुनः॥इध्मोवेदिःपरिधयश्चसर्वेयज्ञस्यायुरनुसंचरंति॥त्रयस्त्रिंशत्
तंतवोयेवितत्निरेयइमंयज्ञंस्वधयाददंतेतेषांछिन्नंप्रत्येतद्दधामिस्वाहाघ
र्मोदेवाँअप्येतु॥४॥अषाढओषधयउपचिन्वंतिपंचचत्वारिंशच्च॥१०॥ ॥

प्र०स०५ वैश्वानरोनऊत्याप्रयातुपरावतः॥अग्निरुक्थेनवाहसा॥ऋतावानंवैश्वानरमृतस्य
४१ ज्योतिषस्पतिं॥अजस्त्रंघर्ममीमहे॥वैश्वानरस्यदंसनाभ्योबृहदरिणादेकःस्वप
स्ययाकविः॥उभापितरामहयन्नजायताग्निर्द्यावापृथिवीभूरिरेतसा॥पृष्टोदिविपृ
ष्टोअग्निःपृथिव्यांपृष्टोविश्वाओषधीराविवेश॥वैश्वानरःसहसापृष्टोअग्निःसनो
दिवासः॥१॥रिषःपातुनक्तं॥जातोयदग्नेभुवनाव्यख्यःपशुंनगोपाइर्यःपरिज्मा॥
वैश्वानरब्रह्मणेविंदगातुंयूयंपातस्वस्तिभिःसदानः॥त्वमग्नेशोचिषाशोशुचा
नआरोदसीअपृणाजायमानः॥त्वंदेवाँअभिशस्तेरमुंचोवैश्वानरजातवेदोमहि
त्वा॥अस्माकमग्नेमघवत्सुधारयानामिक्षत्रमजरंसुवीर्यं॥वयंजयेमशतिनं
सहस्त्रिणंवैश्वानर॥२॥वाजमग्नेतवोतिभिः॥वैश्वानरस्यसुमतौस्यामराजाहिकं ४१

भुवनानाम भिश्रीः॥ इतोजातो विश्वमिदं विचष्टे वैश्वानरोयतते सूर्येण॥ अवते हेडो
वरुणनमोभिरवयज्ञेभिरीमहे हविर्भिः॥ क्षयन्नस्मभ्यमसुरप्रचेता राजन्नेनांसि शि
श्रथः कृतानि॥ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमंश्रथाय॥ अथावयमादि
त्य॥ ३॥ व्रते तवानागसो अदितये स्याम॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्यवा
जिनः॥ सुरभिनो मुखाकरत्प्रण आयूंषि तारिषत्॥ आदधिक्राः शवसापंचकृष्टीः
सूर्य इव ज्योतिषापस्ततान॥ सहस्रसाः शतसा वाज्यर्वापृणक्तु मध्वासमिमा वचा
ंसि॥ अग्निर्मूर्धाभुवः॥ मरुतो यद्धवो दिवः सुम्नायंतो हवामहे॥ आतूनः॥ ४॥ उपगं
त्रिधातूनि तन॥ यावः शर्मशशमानाय संति दाशुषे यच्छताधि॥ अस्मभ्यं तानि मरुतो वियंत
रयिन्नो धत्त वृषणः सुवीरं॥ अदितिर्न उरुष्यत्वदितिः शर्मयच्छतु॥ अदितिः पात्वं

हसः॥मुहीमूषुमातरं॑सुव्रतानामृतस्यपत्नीमवसेहुवेम॥तुविक्षत्रामजरंतीमुरू
चीं॑सुशर्माणमदितिं॑सुप्रणीतिं॥सुत्रामाणंपृथिवींद्यामनेहसं॑सुशर्माणमदितिं॑
सुप्रणीतिं॥दैवींनावं॑स्वरित्रामनागसमस्रवंतीमारुहेमास्वस्तये॥इमां॑सुनावु
मारुहं॑शतारित्रां॑शतस्फ्यां॥अछिद्रांपारयिष्णुं॥५॥दिवाससहस्त्रिणंवैश्वानरा
दित्यव्रतौनौहसं॑सुशर्माणमेकान्नविं॑शतिश्च॥११॥ ॥देवासुराःपैराभूमिभूमिक
पत्रयंतःसंपश्याम्ययज्ञःसंपश्याम्यग्निहोत्रंममनामवैश्वानरएकादश॥११॥ ॥
देवासुराःकुध्यःसंपश्यामिसंपश्यामिनक्तमुपगंतनैकपंचाशत्॥५१॥ ॥छ॥
॥ ॥हरिःॐ॥ ॥संत्वासिंचामियजुषाप्रजामायुर्धनंच॥बृहस्पतिप्रसूतोयज
मानइहमारिषत्॥आज्यमसिसत्यमसिसत्यस्याध्यक्षमसिहविरसिवैश्वानु ४२

रंवैश्वदेवमुत्तूतशुष्मं सत्यौजाः सहोसिसहमानमसिसहस्वारातीः सहस्वाराती
यतः सहस्वपृतनाः सहस्वपृतन्यतः॥ सहस्रवीर्यमसितन्माजिन्वाज्यस्याज्यमसि
सत्यस्यसत्यमसिसत्यायुः॥१॥असिसत्यशुष्ममसिसत्येनत्वाभिघारयामितस्यते
भक्षीयपंचानांत्वावातानांयंत्रायधर्त्रायगृह्णामिपंचानांत्वर्तूनांयंत्रायधर्त्रायगृह्णा
मिपंचानांत्वादिशांयंत्रायधर्त्रायगृह्णामिपंचानांत्वापंचजनानांयंत्रायधर्त्रायगृ
ह्णामिचरोस्त्वापंचबिलस्ययंत्रायधर्त्रायगृह्णामिब्रह्मणस्त्वातेजसेयंत्रायध
र्त्रायगृह्णामिक्षत्रस्यत्वौजसेयंत्राय॥२॥धर्त्रायगृह्णामिविशेत्वायंत्रायधर्त्रायगृ
ह्णामिसुवीर्यायत्वागृह्णामिसुप्रजास्त्वायत्वागृह्णामिरायस्पोषायत्वागृह्णामि
ब्रह्मवर्चसायत्वागृह्णामिभूरस्माकंहविर्देवानामाशिषोयजमानस्यदेवानां

प्र०स०६
४३

त्वादेवताभ्योगृह्णामिकामायत्वागृह्णामि॥३॥सत्यायुरोजसेयंत्रायत्रयस्त्रिंᳪशाच्च॥
॥३॥ ॥ध्रुवोसिध्रुवोहंᳪसजातेषुभूयासंधीरश्चेत्तावसुविदुग्रोस्युग्रोहंᳪसजातेषुभू
यासमुग्रश्चेत्तावसुविदभिभूरस्यभिभूरहंᳪसजातेषुभूयासमभिभूरस्यभिभूरश्चेत्ता श्चेत्ता
वसुविद्युनज्मित्वाब्रह्मणादैव्येनहव्यायास्मैवोढवेजातवेदः॥इंधानास्त्वासुप्रजसः
सुवीराज्योग्जीवेमबलिहृतोवयंते॥यन्मेअग्नेअस्ययज्ञस्यरिष्यात्॥१॥यद्वास्कंदा
दाज्यस्योतविष्णो॥तेनहन्मिसपत्नंदुर्मरायुमेनंदधामिनिर्ऋत्याउपस्थे॥भूर्भुवः
सुवरुच्छुष्मोअग्नेयजमानायैधिनिशुष्मोअभिदासते॥अग्नेदेवेध्ममन्विध्ममंद्
जिह्वामर्त्यस्यतेहोतर्मूर्धन्नाजिघर्मिरायस्पोषायसुप्रजास्त्वायसुवीर्यायमनोसि
प्राजापत्यंमनसामाभूतेनाविशावागस्यैंद्रीसपत्नक्षयणी॥२॥वाचामेंद्रियेणावि ॥४३॥

शवसंतमृतूनांप्रीणामिसमाप्रीतःप्रीणातु ग्रीष्ममृतूनांप्रीणामिसमाप्रीतःप्रीणातु
वर्षाऋतूनांप्रीणामिताःमाप्रीताःप्रीणंतु शरदमृतूनांप्रीणामिसामाप्रीताप्रीणातु
हेमंतशिशिरावृतूनांप्रीणामितौमाप्रीतौप्रीणीतामग्नीषोमयोरहंदेवयज्ययाचक्षु
ष्मान्भूयासमग्नेरहंदेवयज्ययान्नादोभूयासं॥३॥दब्धिरस्यदब्धोभूयासममुं
दभेयमग्नीषोमयोरहंदेवयज्ययावृत्रहाभूयासमिंद्राग्नियोरहंदेवयज्ययेंद्रि
यन्नादोभू यावी[illegible]यासमिंद्रस्याहंदेवयज्ययेंद्रियावीभूयासंमहेंद्रस्याहंदेवयज्यया
जेमानंमहिमानंगमेयमग्नेस्विष्टकृतोहंदेवयज्ययायुष्मान्यज्ञेनप्रतिष्ठांगमेयं
॥४॥रिष्यात्सपत्नक्षयण्यन्नादोभूयासं॥ षड्विंशश्च॥२॥ ॥अग्निर्मादुरिष्टात्पा
तुसविताघशंसाद्योमेंतिदूरेरातीयतितमेतेनजेषं सुरूपवर्षवर्णएहीमान्भद्रां

प्र०स०६
४४

डुर्यः अभ्येहिमामनुव्रतान्युशीर्षाणिमृढ्वमिडएह्यदितएहिसरस्वत्येहिरंतिरसिरम
तिरसिसूनर्यसिजुष्टेजुष्टिंतेशीयोपहूतउपहवं॥१॥तेशीयसामेसत्याशीरस्ययज्ञ
स्यभूयादरेडतामनसातच्छकेयंयज्ञोदिवंरोहतुयज्ञोदिवंगच्छतुयोदेवयानःपंथा
स्तेनयज्ञोदेवाँअप्येतुस्मास्विंद्रइंद्रियंदधात्वस्मान्रायउतयज्ञाःसचंतामस्मा
सुसंत्वाशिषःसानःप्रियासुप्रतूर्तिर्मघोनीजुष्टिरसिजुषस्वनोजुष्टानः॥२॥अभि
जुष्टिंतेगमेयंमनोज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञंसमिमंदधातु॥बृहस्पतिस्त
नुतामिमन्नोविश्वेदेवाइहमादयंतां॥ब्रध्नपिन्वस्वददतोमेमाक्षायिकुर्वतोमेमोप
दसत्प्रजापतेर्भागोस्यूर्जस्वान्पयस्वान्प्राणापानौमेपाहिसमानव्यानौमेपाह्युदा
नव्यानौमेपाह्यक्षितोस्यक्षित्यैत्वामामेक्षेष्ठाअमुत्रामुष्मिँल्लोके॥३॥उपहवंजु ॥४४॥

ष्टान्त्स्वाषड्ढ्॥३॥ ॥बर्हिषोहंदेवयज्ययाप्रजावान्भूयासंनराशंसस्याहंदेवय
ज्ययापशुमान्भूयासमग्नेःस्विष्टकृतोहंदेवयज्ययायुष्मान्यज्ञेनप्रतिष्ठांगमेयम
ग्नेरहमुज्जितिमनूज्जेषंसोमस्याहमुज्जितिमनूज्जेषमग्नेरहमुज्जितिमनूज्जेष
मग्नीषोमयोरहमुज्जितिमनूज्जेषमिंद्राग्नियोरहमुज्जितिमनूज्जेषमिंद्रस्याहं॥१॥
उज्जितिमनूज्जेषंमहेंद्रस्याहमुज्जितिमनूज्जेषमग्नेस्विष्टकृतोहमुज्जितिमनूज्जेषंवा
जस्यमाप्रसवेनोद्ग्राभेणोदग्रभीत्॥अथासपत्नाँइंद्रोमेनिग्राभेणाधराँअकः॥उ
द्ग्राभंचनिग्राभंचब्रह्मदेवाअवीवृधन्॥अथासपत्नानिंद्राग्नीमेविषूचीनान्व्यस्य
तां॥एमाअग्मन्नाशिषोदोहकामाइंद्रवंतः॥२॥वनामहेधुक्षीमहिप्रजामिषं॥रोहि
तेनत्वाग्निर्देवतांगमयतुहरिभ्यांत्वेंद्रोदेवतांगमयत्वेतशेनत्वासूर्योदेवतांगमय

प्र०स०६॥ नुवित्तेमुंचामिरशनाविरश्मीन्वियोक्त्रायानिपरिचर्तनानिधत्तादस्मासुद्रविणंयच्चभ
॥४५॥ द्रंप्रणोब्रूताद्भागधांदेवतासु॥विष्णोःशंयोरहंदेवयज्ययायज्ञेनप्रतिष्ठांगमेयंसो
मस्याहंदेवयज्यया॥३॥सुरेतारेतोधिषीयत्वष्टुरहंदेवयज्ययापशूनांरूपंपुषेयंदे
ष्णीमेव समिधमादध्यात्॥ ॥अथ विवाह उच्यते॥ दंपत्योरनुकूले हनि वैवा
संगहस्नानः॥ पुण्याहं वाचइत्वा॥ गीतवाद्यादिभिः पुण्याभिः स्त्रीभिर्ब्राह्मणैश्च स
हितः॥ अनुहवमिति॥ ज्ञातेव शाकुने साम गाय सि ब्रह्मपुत्र इव सवनेषु शंस
ति॥ इत्यादि मंत्रान्वाचयेत्॥ विवाहागारमेत्य पादौ प्रक्षाल्याचं म्य प्राणाना
यम्य पतासु धर्मप्रजासंपत्सिध्यर्थं स्त्रियमुद्वह इति संकल्प्य॥ कंकणं यज्ञोप
वीतं धृत्वा॥ तथा॥ विवाहकर्ता प्रथमे विवाहे संकल्प्य सम्यक्सरबंधयेत्॥ ॥

या अभिग्या हिरणीः ॥ इति नमस्कारं देवताभ्यो कृत्वा कर्पादि परिमिलं गंधं दद्यात् ॥ अप्सर
:शुच यो गंधो गंधर्वेषु च यशः ॥ दैवो यो मानुषो गंधः समागंधः सुरभिर्मुखितां ॥
इत्यात्मानं गंधेनानुलिप्य ॥ इयमोषधे त्रायमाणा सहमाना सरस्वती ॥ सा मा हिर
ण्यवर्चसं ब्रह्मवर्चसिनं मा करोतु ॥ इति सुवर्णमणिमुदकपात्रे त्रिः प्रदक्षिणं परि
प्लाव्य ॥ अपाशो स्युरोमेमासं शारी ॥ शिवो मोप तिष्ठस्व दीर्घायुत्वाय शतशारदाय ॥
शतं शरद्भ्य आयुषे वर्चसे ॥ जीवात्वै पुण्याय ॥ इति माणवकं कंठे बध्वा ॥ बादरम
णिमप्येवं कृत्वा ॥ सव्ये पाणौ तूष्णीं बध्वा ॥ रेवतीस्त्वे सादि उपनयन वदुत्तरं वस्त्रं
धृत्वा ॥ तस्य वस्त्रस्य दशायाः करणाभरणद्वयं बध्वा ॥ दिव्यांज्याप्यादायाज्येनाभ्या
नयन् ॥ आयुष्यं वर्चस्यं सुवीर्यं रायस्पोषमौद्भिद्यं ॥ यदिदं हिरण्यं वर्चस्वज्जैत्रा
याविशतादि मां ॥ स्वाहा ॥ हिरण्याय इदं० ॥ उच्चैर्वाजि पृतनाजित् सत्रासाहं धनंज
यं ॥ सर्वाः समृद्धीर्ऋद्धयो हिरण्ये स्मिन् समाहिताः ॥ शुनमहं हिरण्यस्य पितु
स्वाहा ॥ हिरण्यायाइदं नमम ॥

त्रिंगा०
॥९१॥

विनामाग्रमेधं॥ तंमा हिरंण्यवर्चसंपूरुषुप्रियंकुरु॥ स्वाहा॥ हिरंण्याइदं०॥ प्रियं
मादेवेषुकुरु प्रियंमाब्रंह्मलोकुरु॥ प्रियंविश्येषुशूद्रेषुप्रियंराजसुमाकुरु॥ स्वा
हा॥ हिरंण्याइदं०॥ यातिरश्चीनिपद्यसेहं विधरणीइती॥ तांत्वाघृतस्यधारयायजे
संराधनेमहं स्वाहा॥ हिरंण्यायाइदं०॥ संराधिनेदेव्यैस्वाहा॥ संराधंन्यैदेव्याइदं॥
प्रसाधंनेदेवैस्वाहा॥ प्रसाधनैदेव्याइदं॥ संम्राजंचविराजंचाभिश्रीर्याचनोगृहे॥
लक्ष्मीराष्ट्रस्ययामुखेतयामासंसृजामसि॥ स्वाहा॥ हिरंण्यायाइदं०॥ तथा॥
देवतानुक्रमिणिकाया॥ हिरंण्यमायुष्यचतुष्टयस्यात्संराधनेपंचममंत्रकृपि॥
सैवोत्तरत्रापितदुत्तरतप्रसंधनीमंत्रपदाभिधेया॥ हिरंण्यमंत्राग्निरेवाथवायांधाता
दिमंत्रेषुसएवधाता॥ इतिकृत्वा॥ जयादिब्रंह्मविसर्जनांते॥ एवंकर्णाभरणंआयु
ष्याभिसृष्ट्वा भिर्दक्षिणेकर्णेबध्वा॥ एताभिरेवद्वितीयमाभरणंसव्येकर्णेबध्वा॥

सटि०
॥९१॥

स्वीकृत्य पश्चाद्विधानात्कृतं यज्ञोपवीतं खलु धारयेत्सः ॥ संकल्पानंतरं तस्य मुख्य
कालइति स्मृतः ॥ हस्तग्रहणकाले वाच तूष्णीं निशि वा भवेत् ॥ इति ॥ तदर्थं कन्यां
वृणीध्वमिति चतुरो वारान्प्रेषयित्वा ॥ प्रसुग्मंता धियसानस्य सक्षणि वरेभिर्वरां॥
अभिषु प्रसीदत ॥ अस्माकमिंद्र उभयं जुजोषति यत्सौम्यस्यांधसो बुबोधति ॥
अनृक्षरा ऋजवः संतु पंथा येभिः सखायो यंति नो वरेयं ॥ समर्यमा संभगो नो नि
नीयात्संजास्पत्यं सुयममस्तु देवाः ॥ इति द्वाभ्यां मंत्राभ्यां ताब्राह्मणान्वा अभिमं
त्रयेत् ॥ ते ब्राह्मणाः ॥ कन्यादातारं गत्वा ॥ वैश्वामित्राघमर्षणकौशिकेत्यार्षेयप्रव
रान्वितैर्न्वितस्य कौशिकगोत्रस्य माधवशर्मणो नप्त्रे ॥ वैश्वामित्राघमर्षणकौशिकत्रिया त्रि
रुषेयप्रवरान्वितकौशिकगोत्रस्य गोविंदशर्मणः पौत्राया ॥ वैश्वामित्राघमर्षणकौ मित्रा
शिकत्रियारुषेयप्रवरान्वितकौशिकगोत्रस्य विष्णुदेवशर्मणः पुत्राया ॥ वैश्वामि

॥७१॥ त्र्याघमर्षणकौशिकत्रियार्षेयप्रवरान्वितकौशिक।गोत्रस्यदामोदरशर्मणेवराय॥ ६॥॥
आंगीरसबार्हस्पत्यभारद्वाजत्रियार्षेयप्रवरान्वितभारद्वाजगोत्रां॥सावित्रिदायीकं
न्यांवृणीमहे॥इतिर्ब्राह्मणाब्रूयुः॥कंन्यादातादास्यमितिप्रत्युक्त्वा॥ख्वरःसमीपमाग
ते॥ततोमधुपर्कंकुर्यात्॥कथं॥दाताप्राणानायंम्य॥आगतमिमंवरंमधुपर्केण
पूजांकरिष्ये॥इतिसंकल्प्य॥उदग्गैंकूर्चंदद्यात्॥राष्ट्रभृतस्याचार्यासंदीमास्वाघो
षं॥॥इतिकूर्चमुपविशेत्॥दाताउदकमादाय॥आपःपाद्याइतिब्रूयुः॥वरःआपः
पादावनेजनेर्द्विषंतंनिर्दहंतुमे॥अस्मिन्कुलेब्रंह्मवर्चस्यसानि॥इत्युदकमभिमंत्र्य॥
पूर्वंदक्षिणंपादंदत्वा॥पादान्प्रक्षाल्यैतारंदातामुपस्पृश्य॥मयिमेहामयियशोमयी
द्रियंवीर्यं॥इत्यात्मानंप्रत्यभिमृशेत्॥दाता॥उपर्यध[illegible]स्थितास्यांसहसोद
कमृन्मयपात्रमादाय॥अर्हीणीयाआपः॥इतिब्रूयात्॥वरः॥आमागंन्यशसा ॥७१॥

वर्चसामसंसृजपयसातेजसाच ॥ तंमाप्रियंप्रजानांकुर्वधिपतिंपशूनां ॥ इत्यभिमंत्र्यअ
लौ ॥ दातावेकदेशोदकमानीयमानेसति ॥ विराजोदोहोसिविराजोदोहमशीयममप
द्यायविराज ॥ इतिजप्त्वा ॥ पुरस्तान्निनीया ॥ मानंशेषमुदकं ॥ समुद्रंवःप्रहिणोमि
स्वांयोनिमपिगच्छत ॥ अच्छिद्रःप्रजयाभूयासंमापरासेचिमत्पयः ॥ इत्यभिमंत्रयेत् ॥
तत्रदातावराय ॥ वस्त्रगोभूशय्यादीनियथाशक्त्यालंकारंदत्वा ॥ मधुसंसृष्टंदधिम
धुकांस्यपात्रेनिधाय ॥ वर्षीयसापिकांस्यपात्रेणापिनिधाय ॥ पूर्ववत्कूर्चाभ्यांसहगृ
हीत्वा ॥ मधुपर्कइतिब्रूयात् ॥ वरः ॥ त्रैविद्यायैयशोसियशसोयशोसिब्रह्मणोदी
प्तिरसि ॥ तंमाप्रियंप्रजानांकुर्वधिपतिंपशूनां ॥ इतिद्वाभ्यांमधुपर्कइत्यभिमंत्र्य ॥ अ
मृतोपस्तरणमस्यीत्यापःपीत्वा ॥ यन्मधुनोमधव्यंपरमंमन्नाद्यंवीर्यं ॥ तेनाहंमधुनो
मधव्येनपरमेणान्नाद्येनवीर्येणपरमोन्नादोमधव्यो[illegible]सानि ॥ इतिमधुपर्कप्रा

शिंगा० श्यां पुनः तूष्णीं द्विः प्राश्यामृतापिधानमसीत्यपः पीत्वाचामेत्॥ दानागोरिति ब्रूयात्॥ मदि
॥८२॥ श्वरः॥ गोरस्य पहनपाप्मापपाप्मानंजहि॥ गामभिमंत्र्य॥ नारायणशर्मणो मम च॥
गोविदशर्मणो मम च॥ इत्युक्त्वा॥ यज्ञो वर्धतां यज्ञस्य वृद्धिमनुवृद्धापचितिरस्यप
९ चितिं माकुं ~~धिपचितिपस्तु~~ पचितोऽहं मनुष्येषु भूयासं॥ गोर्धेनुभव्या माता रुद्राणां
दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः॥ प्रणु वोचं चिकितुषे जनाय मा
गामनागामदितिं वधिष्ट॥ पिबतूदकं तृणान्यत्तु॥ उपांशूक्त्वा मुत्सृजतेत्युच्चैरुक्त्वा॥
गां विसृजेत्॥ दानासिद्धमंनं भूतामिति ब्रूयात्॥ वरः॥ सा विराट्॥ तन्मा क्षायत स्य ते शी
यतां मह ऊर्जं धाः॥ इति शनैरुक्त्वा॥ ॐ कल्पयतेत्युच्चैर्ब्रूयात्॥ वरस्य यस्य यथा शाखा
तस्मस्वगृह्यमार्गेण॥ मधुपर्कप्रदानव्यमंन्यशाखेपिदान रितिप्रयोगपारिजाते॥ ८२॥
म्याकंन्यादान। पर्यंतेपि नाकुर्यात्स्वाशाखया॥ अपरेपरशाखं स्यादिति शातातेपोब्र वीत्॥

अथ कंन्यादानं ॥ पूर्वेद्युः ॥ कृताभ्युदेको दाता ॥ प्राङ्मुखः प्राणानायंम्य । ममसमस्तपा
पक्षयद्वारा इहजंन्मनिजंन्मांतरेषु बाल्ययचनवार्धिकेषु रहस्यप्रकारं च मनोवाक्कायक
र्मभ्यार्जितानाहत्तप्रकीर्णकानां कृतराशेवर्षसहस्रावसानेएकैककर्षावर्षापकर्षक्रमेणब्रं व
ह्मलोके निवाससिध्यर्थं गंगावालुकाभिः सप्तऋषिमंडलाभिपर्यंतं कृतराशीर्वर्षसह
स्रावसाने एकैकवालुकापकर्षक्रमेण सर्वराश्यपकर्षसंमितकालेब्रंह्मलोके निवास
सिध्यर्थं त्रिगुणीकृताग्निष्टोमवाजपेयातिरात्रिशतसहस्रलभ्यफलसिध्यर्थं मयास
हस्रश्रलभ्यफलसिध्यर्थं मयासहदशापूर्वेषांदशापरेषामद्स्यानां नरकादुत्तीर्यएकविं
शतिकुलपवित्रीकरणार्थं स्वगृह्योक्तविधानाः कंन्यादान । कल्पोक्तसमग्रफलसि
ध्यर्थं कंन्यादानं करिष्ये ॥ ॥ इतिसंकल्प्य ॥ प्राङ्मुखआसीनं वरंधादिभिरभ्यर्चा ॥
पुष्पाक्षतानग्रहीत्वा ॥ कंन्यां कनकसंपंनां कनकाभरणैर्युतां ॥ दास्यामि विष्णवे त्
भ्यं ब्रंह्मलोकजिगीषया ॥ कंन्येममाग्रतोभूयाः कन्येमेदेहपार्श्वतः ॥ कंन्येमेसर्वतोभूया

शिंगा०
॥ ७३ ॥

स्वदानान्मोक्षमाप्नुयात् ॥ विश्वंभराः सर्वभूताः साक्षिणः सर्वदेवताः ॥ इमां कन्यां
प्रदास्यामि पितॄणां तारणाय च ॥ इत्युच्चार्य ॥ वैश्वामित्राघमर्षणकौशिकत्रियार्
षेयप्रवरान्वितेय कौशिकगोत्रोद्भवाय ॥ माधवशर्मणः प्रपौत्राय ॥ एवं पुनः प्रवरमु
क्त्वा ॥ गोविंदशर्मणः प्रपौत्राय ॥ पुनः प्रवरमुक्त्वा ॥ विष्णुदेवशर्मणः पुत्राय ॥ पुनः प्रवर
मुक्त्वा ॥ यज्ञदेवशर्मणे वराय ॥ आंगीरसबार्हस्पत्यभारद्वाजत्रियार्षेयप्रवरान्वि
शर्मणः तेय भारद्वाजगोत्रोद्भवां ॥ नारायण प्रपौत्रीं ॥ पुनः प्रवरमुक्त्वा ॥ केशवशर्मणः प्रपौ
त्रीं ॥ पुनः प्रवरमुक्त्वा ॥ अच्युतशर्मणः पुत्रीं ॥ पुनः प्रवरमुक्त्वा ॥ भारद्वाजगोत्रां सावि
त्रीदायीं कन्यां तुभ्यमहं प्रजासहत्वकर्मभ्यः प्रतिपादयामीत्युदकपूर्वं दद्यात् ॥ वरः
कन्याहस्तं गृहीत्वा ॥ देवस्य त्वा सवितुः प्रसवे ॥ अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्र भद्दि
तिगृह्णामि ॥ राजा त्वा वरुणो नयतु देवि दक्षिणे प्रजापतये कन्यां ॥ तेनामृत ॥ ७३ ॥

त्वमश्यां ॥ वयोदात्रेमयोमह्यमस्त्वतःप्रतिगृहीत्रे कइदंकस्माअदात् ॥ कामः कामाय ॥
कामोदाता ॥ कामः प्रतिगृहीता ॥ कामंसमुद्रमाविशा ॥ कामेनत्वाप्रतिगृह्णामि
कामैतत्ते ॥ एषातेकामदक्षिणा ॥ उत्तानस्त्वांगीरसः प्रतिगृह्णातुलितिकन्याप्रतिगृह्णी
यात् ॥ दत्ता ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसो ॥ अनंतपुण्यफलदंमतः शांतिं
प्रयच्छमे ॥ इत्युक्त्वा ॥ कन्यादानसाद्गुण्यार्थंदक्षिणायदत्वा ॥ अनेनकन्यादानेनभग
वान्श्रीलक्ष्मीनारायणः सुप्रीतोवरदोभवत् ॥ इत्युक्त्वा ॥ धर्मार्थकामेषुनातिचरित
व्येतिर्वदेत् ॥ वरः नातिचरामित्युक्त्वा ॥ अग्निप्रतिष्ठापनंकुर्यात् ॥ इतिकन्यादानं ॥
ततः सुमुहूर्तेसती ॥ वरः कन्यांदृष्ट्वा ॥ चक्षुषीप्रतिसंहृत्यगृह्या ॥ अभ्रातृघ्नींवरुणापा
तिघ्नींबृहस्पते ॥ इंद्रापुत्रघ्नींलक्ष्मियंतामस्यैसवितुःसुव ॥ इतिवधूंदृष्ट्वा ॥
ॐ स्वा ॥ अघोरचक्षुरपतिघ्न्येधिशिवापशुभ्यःसुमनाःसुवर्चाः ॥ जीवसू
र्देवकामास्योनाशंनोभवद्विपदेशंचतुष्पदे ॥ इतिवधुसद्दृष्ट्वा ॥ अत्रवरव

विवाह० ॥ श्वो संकल्पयतावाभ्यां कर्माणि कर्तव्यानि प्रज्ञाभ्यो सादहलव्या इति संकल्पं
॥६२॥ कुरुतः ॥ ततो वरः ॥ अंगुष्ठनामिकाभ्यां गृहीत्वा ॥ इदमहं या त्वयि पतिघ्न्य
॥६५॥ लक्ष्म्यस्तां निर्दिशामि ॥ इति कन्यिकाया भ्रुवोरंतरेण दर्भेण संमृज्य ॥ प
श्चान्निरस्य सपउपस्पृश्य ॥ तथा चोक्तं ॥ गौद्राक्षसपेतकच्छेदनभेदन
खननदहननिरसनाघ्राणाभिमर्शनानि चकृत्वा ॥ अपउपस्पृशेदिति ॥ ।
जीवां रुदंति विमयंते अध्वरे दीर्घामनुप्रसितिं दीधियुर्नरः ॥ वामं पितृभ्यो य इ
दं समेरिरे मयः पतिभ्यो जनयः परिष्वजे ॥ ॥ इति रोदननिमित्ते सति जपेत् ॥
ततः ॥ युक्ष्व हि क्रूरमुदचं त्वापस्यै ब्राह्मणाः स्नपनं हरंत ॥ अवीरघ्नीरुद
चं त्वापः ॥ इति युग्मान्ब्राह्मणान् स्नानार्थेरकोप्यय प्रेषइत्वा ॥ अर्यम्णो अग्निं प्रयोगः ॥६३॥ ॥६४॥

पर्वणि क्षिप्रं प्रतीक्षंतां श्वश्र्वो देवराश्च ॥ इति कंन्यायाः शिरसि दर्भेंड्वं निधा
या ॥ वलयं पंचभिर्दर्भैः विंशत्यावेष्टनं तथा ॥ अंतर्दृढं शुक्लप्रोक्तं दर्भेंड्वमभिधीयते ॥
खेनसः खेरथः खेयुगस्य शचीपते ॥ अपालामिंद्र त्रिः पूर्त्व्यकृणोः सूर्यवर्चसं ॥ इति त
स्मिंक्षिप्रं बहिर्युगछिद्रं प्रतिष्ठाप्य ॥ शं ते हिरण्यं शमु शंत्वापः शं ते मेथी भवतु शं
युगस्य तृद्म ॥ शं त आपः शतपवित्रा भवंत्वथा पत्या तन्वं सं सृजस्व ॥ इति युगछि
द्रे हिरण्यं मंतर्धाय ॥ हिरण्यवर्णाः शुचयः पावकाः प्र चक्रमुर्हित्वावद्यमापः ॥ शतं पवि
त्रा वितता ह्यासु ताभिः स्त्वा देवः सविता पुनातु ॥ हिरण्यवर्णाः शुचयः पावका यासु जात
ः कश्यपो यास्वग्निः ॥ या अग्निं गर्भं दधिरे सुवर्णास्ता स्त आपः शं स्योना भवंतु ॥ या
सां राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानां ॥ या अग्निं गर्भं० ॥ भवंतु ॥ या
सां देवा दिवि कृण्वंति भक्षं या अंतरिक्षा बहुधा निविष्टाः ॥ या अग्निं गर्भं दधिरे सुवर्णास्ता० ॥
शिवेन त्वा चक्षुषा पश्यंत्वापः शिवया तनुवोपस्पृशंत त्वचं ते ॥ घृतश्चुतः शुचयो याः पा

॰शां॰गा॰ वकास्तास्तआपः शंस्योनाभवत्॥ इतिपंचभिर्मंत्रैः बध्वाशिरसिप्रोक्ष्य॥ परित्वागिर्व
णोगिरइमाभवंतुविश्वतः॥ वृद्धायुमनुवृद्धयोजुष्टाभवंतुजुष्टयः॥ इतिनवस्त्राभ्यांवधू प्रयोगः॥
॥८५॥ माच्छाद्य॥ मांगल्यतंतुनानेनमममजीवनहेतुना॥ कंठेबध्नामिसुभगेसाजीवशरदः
विवाह॰ शतं॥ इतिमांगल्यसूत्रंबध्वा॥ आशासानासौमनसंप्रजांसौभाग्यंतनूं॥ अग्नेरनु
व्रताभूत्वासंनह्येसुकृतायकं॥ इतियोक्त्रंबध्वा॥ तथाचोक्तं॥ मुंजमदर्भकृतं योक्त्रंद्वा
त्रिंशदंगुलिमितं॥ चतुर्विंशतिदर्भाभ्यांइ यथाकस्यलक्षणं॥ कपिलावाचनानिमंग
लाचारप्राप्तंकुर्यात्॥ तस्यायंप्रयोगोवरस्वांजलिनास्वपयसवध्वंजलौद्विरुपस्तीर्य
द्विस्तंडुलानोप्यद्विरभिघारयति॥ ततोवरांजलंवंन्यस्ताभ्यामेवतंडुलपयोभ्यामेवं
कृत्वावध्वंजलैरुपरिस्थाप्यसोदकंकलशमादायब्राह्मणैः सहकपिलांस्तारयन्दर ॰भट्टि॰
क्षिणाःपांतुबहुधेयंचास्तु॥ पुण्यंवर्धतांशांतिरस्तुपुष्टिरस्तुमतुष्टिरस्तुवृद्धिरस्तु
॥८५॥

अविघ्नमस्त्वायुष्यमस्त्वारोग्यमस्तु स्वस्तिशिवंकर्मास्तु० ॥ प्रजापतिः स्त्रिया यशः ॥ मुष्क
योरदधात्सपं ॥ कामस्य तृप्तिरमानंदं ॥ तस्याग्नेभाजयेहमा ॥ मोदः प्रमोद आनंदः ॥ मु
ष्कयोर्निहितः सपः ॥ सृत्वेव कामस्य तृप्याणि ॥ दक्षिणानां प्रतिग्रहे ॥ मनसश्चित्तमा
कूतिं ॥ वाचः सत्यमशीमहि ॥ पशूनां रूपमंनस्य ॥ यशः श्रीश्रयतां मयि ॥ यथाहम
स्या तृपं स्त्रियै पुमान् ॥ यथा स्त्री तृप्यति पुंसि प्रिये प्रिया ॥ एवं भगस्य तृप्याणि ॥ यज्ञस्य का
म्यः प्रियः ॥ ददामीत्यग्निर्वदति ॥ तथेति वायुराहतत् ॥ हंतेति सत्यं चंद्रमाः ॥ आदित्यः सत्यमोम
ति ॥ आपः स्तत्सत्यमाभरंन् ॥ यशो यज्ञस्य दक्षिणां ॥ प्रजामे कामः समृध्यतां ॥ इति दं
पत्योरन्योन्यं शिरसि तंडुलानापतः ॥ एवं त्रिः ॥ द्वितीयपर्याये वधूस्वतंडुलपयो
ध्य भ्यां पूर्ववदंजलिं कृत्वा ॥ पशवो मे कामः समर्मेतामि सामानावपतः ॥ तृतीयपर्या
ये तंडुलपयसी संसृष्टं पूर्ववत्कृत्वा ॥ यज्ञो मे कामः समृध्यतामिति ॥ तंडु

॰शांगा॰
विवाह॰
॥७८५॥

लानावपनः॥ चतुर्थपर्याये तु शमीमेवं कुर्यात्॥ सर्वो मे कामः समृध्यतां॥ अत्र
कंकणसूत्रं धारयेत्॥ तथा॥ संकल्पानंतरे तस्य मुख्यकालइति स्मृतः॥ प्रयोगः॥
हस्तग्रहणकाले वा चतुर्थी निशि वा भवेत्॥ इति तथा॥ विश्वेत्तानेत्यचांपुंसांब
ध्नीयाद्दक्षिणेकरे॥ अथ वामकरे स्त्रीणा हृत्सामेतियं मंत्रयति॥ तथा वरः॥ कन्या
दक्षिणहस्तेगृहीत्वा॥ पूषात्वेतानयतु हस्तगृह्या॰ श्विनौत्वाप्रवहतां रथेन॥ गृहा॰
न्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमावदासि॥ इति वधूमग्निसमीपमानये
त्॥ ॥वधूर्यदि रजस्वला स्यात्॥ किं कुर्यादित्यत आह विवाहे वितते तंत्रे होमकाल उ
पस्थिते॥ कन्यामृतुमतीं दृष्ट्वा कथं कुर्वंति याज्ञिकाः॥ स्नापयित्वा तु तां कन्यामर्चयि
त्वा यथाविधिः॥ युंजानमाहुतिं हुत्वा ततस्तंत्रं प्रयोजयेत्॥ विवाहहोमे प्रक्रां ॰भट्टि॰
ते यदि कन्या रजस्वला॥ त्रिरात्रं दंपती स्यातां पृथक्शय्यासनाशनैः॥ चतुर्थेह ॥७८५॥

निर्संस्नातोतस्मिन्नग्नोपयाविधिः॥विवाहहोमंकु॥र्वीताभिद्यादिस्मृतिसंग्रहः॥त्रिरात्रंदंपः
स तीस्यातांसहशेय्यांनाविति॥स्मृत्यर्थसारे॥प्रकृतिमन्तुसरामः॥अग्नेःपश्चाद्दक्षिणतो
वधूमुपविश्य॥स्वयमुत्तरउपविश्य॥एवंप्रधानहोमादिषट्सुनित्यं॥तथा॥हिरण्यकेश
व्यतिरिक्तकानांप्रधानहोमादिषुषट्सुनित्यं॥शाखाविभेदात्तुनसंशयोत्रतिष्ठेवधूर्द
८ क्षिणतोरस्येति॥एतेषट्होमः॥प्रधानहोमोपदंतादिहोमःप्रवेशहोमश्चविवाहशेषः॥
अंतस्तुसंम्यघ्नतमस्तुसंगएतेषुशाम्यःसवदंतीतिज्ञइति॥स्थालीपाकश्चेति॥एवमुप
साद्रुपविश्य॥वरःप्राणानायम्य॥ममविवाहप्रधानहोमंकरिष्यइतिसंकल्पंकुर्यात्॥त
थाचापस्तंबः॥श्रुतिस्मृतिप्रचोदितंकरिष्येयदातदा॥स्वकर्मयत्तदादितोयदासुगुरुंव
देत्॥एवंसंकल्प्य॥अग्निप्रज्वलनादिपात्रप्रयोगांते॥वध्वंजलिहोमविधानदर्वीद्विती
यदर्वीसहलाजधान्यं॥उत्पार्यपात्रेणसहप्रणीताइध्मंचशांम्याःसहलाजभस्मः॥तथा॥आ
ज्यभागांते॥वरउपस्थाय॥सोमःप्रथमोविविदेगंधर्वोविविदउत्तरः॥तृतीयोअग्निष्टेपतिः

७६

० विवाह०

स्तुरीयस्तेमनुष्यजाः॥ सोमोऽददद्गंधर्वाय गंधर्वोऽददद्ग्नये॥ रयिंच पुत्रांश्चादादग्निर्मह्यमथो मो
इमां॥ इतिप्रासीनं वधूमभिमंत्रयते॥ तथाउत्तराभ्यां॥ सोमः प्रथम इत्युपयमासीनाम
भिमंत्रयते॥ द्विति॥ गृभ्णामि ते सुप्रजास्त्वाय हस्तं मया पत्या जरदष्टिर्यथासः॥ भगो अर्य
मा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः॥ तेह पूर्वे जनासो यत्र पूर्वमवो हिताः॥ मूर्ध
न्वान्यत्र सौभ्रवः पूर्वो देवेभ्य आतपत्॥ सरस्वति प्रेदमव सुभगे वाजिनीवति॥ तां त्वा वि
श्वस्य भूतस्य प्रगायामस्यग्रतः॥ यस्मिन्प्रादिशः सर्वादिशोनुपवमानः॥ हिरण्यहस्त
एरंमः सत्वामन्मनसं कृणोतु॥ इत्यासीनायाः कन्यकाया उत्तानं दक्षिणं पाणिं सां
गुष्ठमवाचीनेन स्वदक्षिणपाणिना गृह्णीयात्॥ एकमिषे विष्णुस्त्वान्वेतु॥ द्वे ऊर्जे
विष्णुस्त्वां न्वेतु॥ त्रीणि व्रताय चत्वारि मायोभवाय विष्णुस्त्वांन्वेतु॥ पंच पशुभ्यो विष्णुस्त्वांन्वेतु॥ ० प्रयोगः
षड्रायस्पोषाय विष्णुस्त्वांन्वेतु॥ सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वांन्वेतु॥ ७६
इत्यग्नेरुत्तरतः॥ प्राङ्मुखीं वा वधूं दक्षिणपादेन सप्तपदानि क्रमइत्वा॥ सखा

सखा सप्तपदा भव सखायौ सप्तपदा बभूव सख्यं ते गमेयं सख्यात्ते मा योषं सख्यान्मे मा यो
ष्ठाः॥ समयाव संकल्पावहै संप्रियौ रोचिष्णू सुमनस्यमानौ॥ इषमूर्जमभि संवसा
नौ सं नौ मनांसि सं व्रता समु चित्तान्याकरं॥ सा त्वमस्यमूहममूहमस्मि सा त्वं द्यौ
रहं पृथिवी त्वं रेतोहं रेतोभृत्वं मनोहमस्मि वाक्त्वं सामाहमस्म्यृक्त्वं सा मामनुव्र
ता भव पुंसे पुत्राय वेत्तवे श्रियै पुत्राय वेत्तव एहि सूनृते॥ इति सप्तपदे जपः॥ सब्र
ह्माग्नेः प्रदक्षिणं कुर्यात्॥ तथा॥ सोमायाद्याहुतीः पूर्वं सब्रह्माग्नेः प्रदक्षिणं लाजानां होमका
ले तु ब्रह्माप्येको बहिः प्रविशेत्॥ लाजानां होमकाले तु यमो मृत्युश्च तिष्ठति॥ दंपत्यो रक्षणा
र्थाय ब्रह्माप्येको बहिः प्रविशेत्॥ इति तलः॥ पूर्ववदुपविश्य॥ बध्वा मन्वारब्धायां॥ सोमाय
जनिविदे स्वाहा॥ सोमाय जनिविदे इदं०॥ गंधर्वाय जनिविदे स्वाहा॥ गंधर्वाय जनिविदे
इदं०॥ अग्नये जनिविदे स्वाहा॥ अग्नये जनिविदे इदं०॥ कंन्यला पितृभ्यो यती पतिलोक

मदीक्षाम दास्थस्वाहा॥ वध्वैसूर्यायाइदं॥ प्रेतो मुंचाति नामुतः सुबद्धाम मुतस्करत्॥ यथेह
विवाह० मिंद्र मीढ्वः सुपुत्रा सुभगासति स्वाहा॥ इंद्राय मीढुषइदं॥ इमांत्वमिंद्र मीढ्वः सुपुत्रां सुभगां कृ प्रयोगः
॥८८॥ णु॥ दशास्यांपुत्राना धेहिपतिमेकादशं कृधि॥ इंद्राय मीढुषे इदं०॥ अग्निरैतु प्रथमो देवताना स्वाहा
ं सो स्यैप्रजां मुंचतु मृत्युपाशात्॥ तदयं राजा वरुणोनुमन्यतां यथेहं स्त्रीपौत्रमघं न रो
दात्॥ स्वाहा॥ अग्नीवरुणाभ्यां०॥ इमामग्निः स्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घ
मायु॥ अशून्योपस्था जीवितामस्तु माता पौत्रमानंदमभिप्रबुध्यतामियं स्वाहा॥ अग्नये
गार्हपत्यायाइदं०॥ मा ते गृहे निशिघोष उत्थादन्यत्र त्वद्रुदत्यः संविशंतु॥ मा त्वं विकेशिरा
आवधिष्ठा जीवपत्नी पतिलोके विराजपश्यंती प्रजां सुमनस्यमानां॥ स्वाहा॥ सूर्याया
इदं॥ द्यौस्तेपृष्ठं रक्षतु वायुरूरू अश्विनौ च स्तनं धयंतं सविताभिरक्षतु॥ आवाससः प
रिधानाद्बृहस्पतिर्विश्वेदेवा अभिरक्षंतु पश्चात्॥ स्वाहा॥ दिवे वायवे अश्विभ्यां सवित्रे ब शिंगा० ॥८८॥

हस्पतये विश्वेभ्यो देवेभ्य इदं० ॥ अप्रजास्तां पौत्रमर्त्युं पाप्मानमुत वाघं ॥ शीर्ष्णः
स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुंचामि पाशं स्वाहा ॥ सूर्यायावध्वा इदं० ॥ इमं मे वरुण०
राचके स्वाहा ॥ वरुणायाइदं० ॥ तत्वायामि० प्रमोषीस्वाहा ॥ वरुणायाइदं० ॥ त्वंनो अग्ने
प्र० मुमुग्ध्यस्मत्स्वाहा ॥ अग्नीवरुणाभ्यां० ॥ सत्वंनो अग्ने० एधिस्वाहा ॥ अग्नीवरुणाभ्यां
त्वमग्ने अयासि० भेषजं स्वाहा ॥ अग्नयेअयस इदं ॥ १ ॥ अत्रोद्देशस्याग देवतानुक्रमणि
कारिका ॥ सोमादिमंत्रेषु यथोपदेशं त्रिषु नरात्रौ० पि वधूस्तत्सप्तधी ॥ प्रेतादिमं
त्रद्वयमिंद्रमीढ्वस्त्वदुत्तरे ग्निर्वरुणेन सार्धं ॥ सोमं तरे गार्हपत्य संज्ञाः सूर्या
वधूस्यादपि मेति मंत्रे ॥ आलोक्य मंत्रास्तथ वाक्यलिंगं नान्यागतिस्या
दिति मे मनीषा ॥ द्यौर्वीयरुरश्विनौः पश्चात्सविता च बृहस्पतिः ॥ वि
श्वेदेवा यति घोस्ते ततः सूर्यावधूपरे ॥ वरुणेनं तरे मंत्र क्रमेनतत्परतो
द्वयोः ॥ अग्निश्च वरुणश्चैव त्वमग्नेग्निः प्रकीर्तिताः ॥ इति षोडशान्य

हुतीर्हुत्वा ॥ आतिष्ठेममश्मानमश्मेव त्वं स्थिरा भव ॥ अभितिष्ठ पृतन्यतः सहस्व पृ
तनायतः ॥ इत्यग्नेरुत्तरतो वधूमश्मानमास्थाप्य ॥ वध्वंजलावुपस्तीर्य ॥ द्विर्लाजा
नोप्याभिघारयेत् ॥ तस्या भ्राता लाजानावपतीत्येके ॥ जमदग्नीनां तु त्रिरावापः ॥ य
थाविधिरत्नकारिकाः ॥ वध्वंजलावुपस्तीर्य लाजानोप्याभिघारयेत् ॥ त्रिर्जामद
ग्न्याश्चापो द्विरन्येषामिति स्थितिरिति ॥ लाजाहोमस्य दर्वीहोमत्वाद्वध्वंजलिसंमार्गो
नास्ति ॥ आपूर्वोहोमविमुक्तत्वात् ॥ वपदर्वीहोमः ॥ अश्माव वध्वंजलिसंमार्गो ना
स्ति ॥ इयं नार्युपब्रूते कुल्यान्यावपंतिका ॥ दीर्घायुरस्तु मे पतिर्जीवातु शर
दः शतं स्वाहा ॥ वध्वा इदं ॥ इत्यासीन एव वरो वध्वंजलिना वामपार्श्वेन
लाजान् कुर्यात् ॥ तथा ॥ अंजल्यग्रेन होतव्यं तथैवांजलिभेदनः ॥ अंज
लिर्वामपार्श्वेन लाजाहोमो विधीयते ॥ इति हुत्वा ॥ तुभ्यमग्रे पर्यवहन्त्सू

र्यौवहलुना सह ॥ पुनः पत्निभ्यो जायांदाग्नेप्रजयासह ॥ पुनः पत्नीमग्निरदादायु
षासहवर्चसा ॥ दीर्घायुरस्यायुःपतिर्जीवातुशरदःशतं ॥ विश्वउत्तत्वयावयंधार
उदंन्याइव ॥ अतिगाहेमहिद्विषः ॥ इत्युभावग्निंप्रदक्षिणीकृत्वा ॥ आतिष्ठेममश्मा
नमितिवधूमश्मानमास्थाप्य ॥ एवंवदुपविश्य ॥ वंधध्वंजलावुपस्तीर्या ॥ लाजाने
ध्याभिघार्य ॥ अर्यमणंनुदेवंकंन्याअग्निमयक्षत ॥ सइमांदेवोअध्वरःप्रेतोमुंचति
नामुतःसुबद्धामभुतःस्करत्‌ ॥ स्वाहा ॥ अर्यम्णेअग्नयइदं० ॥ इतिपूर्ववध्धुत्व ॥
तुभ्यमग्रइतितिसृभिः ॥ प्रदक्षिणमग्निंकृत्वा ॥ आतिष्ठेममश्मानमास्थाप्य ॥ पूर्ववउप
विश्य ॥ वध्वंजलावुपस्तीर्यआदिकृत्वा ॥ त्वमर्यमाभवसियत्कनीनांनामस्वधावस्व
र्यंबिभर्षि ॥ अंजंतिवृक्षंसुधितिंनगोभिर्यदंपतीसमनसाकृणोषिस्वाहा ॥ अ
र्यम्णेरमितिहुत्वा ॥ तुभ्यमग्रइतितिसृभिःप्रदक्षिणमग्निंकृत्वा ॥ पूर्ववउपविशेतु ॥
तत्रदेवताक्रमितिकारिका ॥ जलाहोमेवधूराद्येत्वर्यमाग्निर्द्वितीयके ॥ तृतीयेत्व

१न

विवाह० र्ममेवस्यादयाग्न्याग्नेग्नेरेवच॥ केचित्लाजाहोमलिष्टं होममिच्छंति॥ तदासमीचीनं॥ ला
॥८१॥ जाहोमस्यदर्वीहोमत्वात्॥ तथाचापस्तंबः॥ आसीनोदर्विहोमांजुहोतीति॥ ततोजाया
दिब्रह्मविसर्जनांते॥ वधूमुत्तरतउपवेश्य॥ प्रत्वामुंचामिवरुणस्यपाशाद्येनत्वाबध्नात्सवि
तासुकेतः॥ धातुश्चयोनौसुकृतस्यलोकेस्योनंमेसहपत्याकरोमि॥ इमंविष्याभिवरु
णस्यपाशंयमबध्नीतसवितासुशेवः॥ धातुश्चयोनौसुकृतस्यलोकेरिष्टांत्वासहपत्याकृ
णोमि॥ इतियोक्त्रंविसृज्य॥ इममग्निंनित्यंधारयेत्॥ इतिविवाहहोमसमाप्तः॥ अथय
ग्निरौपासनात्पूर्वंयद्यनुगच्छेत्॥ तत्रकिंकुर्यात्॥ तत्राह॥ स्वेनसहतिलाजाहोमांकुर्यात्॥
तथाचापस्तंबः॥ उद्वाहोपासनात्पूर्वमनलेशांतियागतः॥ युगलाज्जांतरंकर्मकृत्वाशेषंस
मापयेत्॥ इतियद्युपनयनेत्रिरात्रात्पूर्वंविवाहोपासनोक्रमात्पूर्वंचतुर्थहोमात्पूर्वं॥ दहना
दूर्ध्वंअस्थिसंचयनात्पूर्वंजातकर्मणिकृते॥ दशरात्रात्पूर्वंतदग्नौशांतिगतेसति॥ त प्रयोग०
द्दोषपरिहारार्थंतदग्न्युत्सवनंकरिष्यइसंकल्प्य॥ तद्भस्मंशंनोदेवीरित्यभिरवेद्यास्मिंन् ॥८१॥

भस्मनि॥ अयंतेयोनिरित्विसमिधंप्रताप्य॥ आजुह्वानउद्बुध्यस्वाग्ने॥ इतिद्वाभ्यांमंत्रा
लौकीकाग्नावाधाय॥ नत्रायस्त्रिंत्तार्थगोब्राह्मणायदघात्॥ अग्निप्रज्वलिनाघाज्य
संस्कारांतंकृत्वास्रुक्स्रुवोसमृज्याग्निंपरिषिच्य॥ अयाश्चाग्ने० केषनं स्वाहा॥ अग्न
येअयसइदं०॥ अग्निर्होता॥ वानापेर्हवनः श्रुनस्वाहा॥ अग्नयेपंचहोत्रेइदं।०॥ आत्म
एएकहोता॥ भूयस्वाहा॥ एकहोत्रेइदं०॥ अग्निर्द्विहोता॥ अग्नयेद्विहोत्रेइदं०॥ पृ
थिवीत्रिहोता॥ पृथिव्येत्रिहोत्रेइदं०॥ अंतरिक्षंचतुर्होता॥ अंतरिक्षंचतुर्होत्रेइदं०
वायुःपंचहोता॥ वायवेपंचहोत्रेइदं०॥ चंद्रमाःषष्ठोता॥ चंद्रमसेषष्ठोत्रेइदं॥ अंन्नंस
प्तहोता॥ अंन्नायसप्तहोत्रेइदं।०। द्यौरष्टहोता॥ दिवेष्टहोत्रेइदं०॥ आदित्योनवहोता॥
आदित्यायनवहोत्रेइदं०॥ प्रजापतिर्दशहोता॥ प्रजापतयेदशहोत्रेइदं०॥ मनोज्योति
र्जुषतामाज्यं०॥ घृतेनःस्वाहा॥ मनसेज्योतिषइदं०॥ यंन्मआत्मनः॥ अग्नयेजातवे
दसेइदं०॥ भूरग्नयेचपृथिव्येचमहतेचस्वाहा॥ अग्नयेपृथिव्येमहसेइदं०॥ भुवोव

यवेचांतरिक्षायचमहतेचस्वाहा॥ वायवेअंतरिक्षायमहतइदं०॥ सुवरादित्यायचदिवेच
महतेचस्वाहा॥ आदित्यायदिवेमहतइदं०॥ भूर्भुवःसुवःश्चंद्रमसेचनक्षत्रेभ्यश्च
दिग्भ्यश्चमहतेचस्वाहा॥ चंद्रमसेनक्षत्रेभ्योदिग्भ्योमहतइदं०॥ अनाज्ञातत्रयात्॥ अ
ग्नयइदमितिवहुत्वा॥ भूःस्वाहा॥ अग्नयइदं०॥ भुवःस्वाहा॥ वायवइदं०॥ सुवःस्वा
हा॥ सूर्यायइदं०॥ भूर्भुवःसुवस्वाहा॥ प्रजापतयइदं०॥ इमंमेवरुणतत्वायामि॥
रा द्वैवेणायाइदं०॥ यछिद्धिनेयत्किंचेदं०॥ पुनर्वीणइदं०॥ त्रयःस्त्रिंशंतंतुंतन्वंतुद्बुध्यस रा
स्वाग्ने॥ त्रयाणमग्नये॥ तंतुमतेतिहुत्वा॥ यत्रतंत्रशेषंसमापयेत्॥ तथाचोक्तं॥ ॥
औपासनाग्नौचविवाहवह्नौशावानलेसूतकपातकेच॥ शांतिकेनैचोपहतेचशा
न्तोदेवीरित्यद्भिरवोक्ष्यभस्मतस्मात्सरोप्यसमिध्ययंतामाजुहानउद्बुध्यस्वपदद्व
येच॥ लोकस्यानलेतांसमिधिंप्रताप्यदद्यात्दर्कांचमनोवपूर्णं॥ अथपत्रिपंचपंहोना

चब्राह्मणएकहोतादश ॥ मनस्वतीचमिंदाचमहव्याहृतयस्तथा ॥ अनंतरमनाज्ञातंत्र्या
हृत्यप्रणवादिकाः ॥ वारुण्यस्त्वंतुमस्याश्चनथा तंत्रंप्रयोजयेत् ॥ इतिग्रौपासनाग्निरन
नुगहेत् ॥ तथाउक्तप्रायश्चित्तंकृत्वा ॥ प्राणानायम्य ॥ ममविछिन्नस्यौपासनाग्नेः पुनः
संधानहवनाख्यंकरिष्यइतिसंकल्प्य ॥ श्रोत्रियागारादग्निमाहृत्य ॥ स्थंडिलेविधिनाग्निं
प्रतिष्ठाप्य ॥ परिस्तीर्यद्व्यान्यस्थाल्यौप्रोक्षणस्रुवा वितिपात्राणयासाद्याः प्रोक्षिणीः स
ंस्कृत्याज्यसंस्कारांतंकृत्वा ॥ स्रुक्स्रुवौसमन्त्याग्निंपरिषिच्य ॥ स्रुवेंतुगृहीतमाज्यंकृ च
त्वा ॥ अयाश्चाग्नेस्यनभिशस्ति० मेषजं स्वाहा ॥ अग्नयेअयसइदं० ॥ स्रुवेणाज्यमादाय ॥
भूर्भुवःसुवः स्वाहा ॥ प्रजापतयेतिहुत्वाग्निंपरिषिंचयेत् ॥ इतिपुनःसंधानविधिः ॥ प्रश्न
तमनुसराम: ॥ विवाहहोमानंतरंगृहप्रवेशहोमार्थंस्वग्रामप्रतिगच्छतोर्दंपत्योर्मार्गम
ध्येयदिश्मशानादीनिव्यतिक्रमेणहोमभांडाग्निनेशाकटभंगेएवमादीनिभिन्नेषुसस्युन
तद्दोषपरिहारार्थंयत्रेवयव्याहृतादिहोमंकुर्यात् ॥ तत्रदंपतीउपविश्य ॥ यदृतेचिदभि:

 ग्निषः॥पुनस्वाहा॥इड्डायाइदं॰॥इड्डामग्ने॰ पृथुत्वस्मैस्वाहा॥अग्नयेइदं॰॥ इमंमेव
 रुणतत्वायामित्वन्नोअग्नेसत्वंनोअग्नेत्वामग्नेअयासि॥इतिसप्तवत्यापूर्णाहुति
ंहुत्वा॥जयादिब्रह्मविसर्जनांतंकुर्यात्॥तत्रदेवतानुक्रमिणकारिका॥आद्येस
हिंद्रामघवात्रिष्टावग्निर्द्वितीयेकथितास्तुशेषाः॥इतिग्रहनादिहोमः॥ अथगृ
हप्रवेशहोमः॥उदुत्तरमारोहंतीव्यस्यंतीपृतन्यतः॥मूर्धानंपत्युरारोहप्रजयाचवि
राड्भवा॥संम्राज्ञीश्वशुरेभवसंम्राज्ञीश्वश्र्वांभवा॥ननांदरिभसंम्राज्ञीभवसंम्रा
ज्ञीअधिदेविषु॥स्नुषाणांश्वशुराणांप्रजायाश्चधनस्यच॥पतीनांचदेवृणांच
सजातानांविराड्भव॥इतिवधूमभिमंत्र्य॥संकाशयामिवहतुंब्रह्मणागृहेरघोरेण
चक्षुषामैत्रेण॥पर्याणद्धंविश्वरूपंयदस्यांस्योनंपतिभ्यःसविताकृणोतुतत्॥इ
तिस्वगृहान्वधूंदर्शयित्वा॥शर्मवर्मेदमाहरास्यैनार्याउपस्तिरे॥सिनीवालिप्रजाय

नाम्नियंभगस्यसुमनाअसन्॥इतिस्वगृहमध्येलोहितंचर्मानडुहंप्राचीनग्रीवमुत्तर
लोमानिस्तीर्य॥गृहान्भद्रान्सुमनसःप्रपद्येवीरघ्नीवीरवतःसुवीरान्॥इरांवहतोघृ
तमुक्षमाणास्तेष्वहंसुमनाःसंविशामि॥इतिपत्नींगृहप्रवेशयन्वाचयित्वा॥
स्वगृहस्येशानदेशेपत्नींदक्षिणतउपवेश्य॥स्वयमुत्तरतआसीनःप्राणानायम्य॥न
वोढ्यावध्वासहगृहप्रवेशहोमंकरिष्यइतिसंकल्प्य॥अग्निप्रतिष्ठापनाद्याज्यभागां
तेन्वारब्धायां॥आगन्गोष्ठंमहिषीगोभिरश्वैरायुष्मत्पत्नीप्रजयास्वर्वित्॥बह्वीं
प्रजांजनयंतींसुरत्नेममग्निंशतहिमाःसपर्यात्॥स्वाहा॥अग्नयइदं०॥
अयमग्निर्गृहपतिःसुसंसत्पुष्टिवर्धनः॥यथाभगस्याभ्यांददद्रयिंपुष्टिमथोप्र
जांस्वाहा॥अग्नयेगृहपतयइदं०॥प्रजायाआभ्यांप्रजापतइन्द्राग्नीशर्मयच्छतं॥
यथैनयोर्नप्रमीयातांउभयोर्जीवतोःप्रजाःस्वाहा॥इंद्राग्निभ्यामिदं०॥तेनप्लुतेन

ह विषायमाप्यायतांपुनः॥जायांयावस्मा अस्रावासस्ता॑ रसेनाभिवर्धतां॑ स्वाहा॥
इंद्राग्निभ्यामिदं०॥अभिवर्धतांपयसाभिराष्ट्रेणवर्धतां॥रैयासहस्रपोषसेमौस्ता
वनपक्षितौ॥स्वाहा॥इंद्राग्निभ्यामिदं०॥इहैवस्तंमाव्योष्टंविश्वमायुर्व्यश्नुतं॥मह्य
इंद्रस्वस्तयेस्वाहा॥इंद्रायेदं०॥ध्रुवैधिपोष्यामयिमह्यंत्वादाद्बृहस्पतिः॥मया
पत्याप्रजावतीसंजीवशरदःशतं स्वाहा॥बृहस्पतयइदं०॥त्वष्टाजायामजनयत्त्वष्टा
अस्यैत्वांपतिंत्वष्टासहस्रमायूंषिदीर्घमायुःकृणोतुमां॑ स्वाहा॥त्वष्ट्रइदं०॥भैंइमं
मेवरुणेनत्वायामित्वंनोअग्नेभसखांनोअग्नेत्वमग्नेअयासि॥इतित्रयोदशहोमान्याहु
तीर्हुत्वा॥जयादिब्रह्मविसर्जनांते॥तत्रदेवतानुक्रमणिकाकारिकाः॥प्रवेशहोमेप्रथ
मेग्निरेव।तीयकेग्निर्गृहपत्यभिरव्ययः॥प्रजापतइतिमंत्रेणत्रिष्विंद्राग्निप्रकी र्तिता॥
इंद्रोबृहस्पतिस्त्वष्टाइहेतित्रमशास्त्रिषु॥इहगावःप्रजायध्वमिहस्वाइहपूरुषाः॥

इहोसस्रदक्षिणोरायस्पोषोनिषीदतु॥ इति चर्मण्यायुगपदुपविश्य॥ वरमुत्तरतआस
सीनः पुंप्रसूतायाजीवपुत्रायाः पुत्रंवध्वाके॥ सोमेनादित्याबलिनः सोमेनपृथि
वीदृढा॥ अथोनक्षत्राणामेषामुपस्थेसोमआधिता॥ इति तंपुत्रमुपवेश्य॥ प्र
स्वस्थंप्रेयंप्रजयाभुवनेशोचेष्ट॥ इति तस्मैफलानिप्रदाय॥ इहप्रियंप्रजयातेस
मध्यतामस्मिन्गृहेगार्हपत्यायजागृहि॥ एनापत्यातन्वं१ संसृजस्वाथाजी
रियं व्रीविदथमावदासि॥ सुमंगलीवधूरिमां१ समेतपश्यत॥ सौभाग्यमस्यैदत्वायाथा
स्तंविपरेतन॥ इति त्र्यृचा॥ नक्षत्रोदयपर्यंतंतूष्णींमौनीभूत्वा॥ नक्षत्रोदयेसति॥
प्राचीमुदीचींवादिशमुपनिष्क्रम्य॥ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवमसिध्रुवतःस्थि
तः॥ त्वंनक्षत्राणांमेथ्यसिसमांपाहिपृतन्यतः॥ इति वध्वैध्रुवंदर्शयित्वा॥ सप्त
ऋषयः प्रथमांकृत्तिकानामरुंधतींयेध्रुवतां१ हनेयुः॥ षट्कृत्तिकामुख्ययो

गंवहंनियमस्माकमेधत्त्वहमि॥ उप्मावस्यरुंधनीं चदर्शइत्वा॥ इतिगृहप्रवेशहोमसमा
प्तः॥ गृहप्रवेशहोमानंतरंयदाअरुंधतीवसिष्ठदर्शनंभवन्ति॥ तदास्थालीपाकं
कृत्वा॥ नवनाडिकाभ्यां॥ पूर्वंऔपासनंकुर्यात्॥ नवनाडिकाभ्यांऊर्ध्वंस्थालीपाकं
चेत्॥ परेद्युः॥ सायंकालऔपासनंकुर्यात्॥ अयमुख्यपक्षः॥ इतिगृह्यभाष्य
कारेणोक्तं॥ केचिदेवंवर्णयंति॥ रात्रिंत्रेधाविभज्य॥ पूर्वभागेस्थालीपाकंकृत्वौप
सनंकुर्यात्॥ द्वितीयभागेस्थालीपाकएव॥ तृतीयभागेस्थालीपाकमपिनकुर्यात्॥
इतितन्नः॥ गार्ग्यया॥ त्रेधाकृत्वायामिनीपूर्वभागेस्थालीपाकोनित्ययुक्तेविवाहः॥
स्थालीपाकोनैवनित्यद्वितीयेनैवस्थालीनैवनित्यतृतीये॥ इतिअयंगौणपक्षः॥
एवंत्रिस्तपक्षद्वयेस्येकपक्षमवलंब्यस्थालीपाकंकुर्यात्॥ वरमुत्तरतआसीनःप्रा
णानायम्य॥ एतांवधूरग्नेपस्थालीपाकोनुयाजयिष्ये॥ अस्यमंत्रारब्धायां॥ वर

एवञ्जुहुतीत्यर्थः ॥ इतिसंकल्प्य ॥ चरुं अपहृत्वाभिघार्यप्राचीमुदीचीमंवोद्वास्याभि
घार्याग्नेः पश्चान्निदध्यात् ॥ अथविधिरत्नकारिकाः ॥ अपहृत्वाभिघार्योदगुद्वास्याभि
घारयेत् ॥ सोकार्येणापरेणाग्निंहविरार्ज्यंचसादयेत् ॥ इति ॥ एवंकृत्वाग्निप्रज्वलनाद्या
ज्यभागान्तंकुर्यात् ॥ तत्रमुखाहुतिः ॥ इति–कृत्वास्रुच्युपस्तीर्याचरुमध्याद्द्विरवदायाभि
घार्यपत्न्याभंन्वारब्धायां ॥ अग्नयेस्वाहेतिमध्येहुत्वा ॥ सामिधामिध्मसंनहनंवा
ग्नौप्रहृत्य ॥ दर्व्यापरिधीननक्तिपात्रप्रयोगयुक्तदर्व्याणिदर्व्यामभ्यज्यस्रुवेम
ध्यमूलेऽजनक्तिमूलांजनेदक्षिणंपाणिमधःकुर्यात् ॥ इवांत्रः ॥ अपिवाद्भिः ॥
तथा ॥ दर्व्यामनक्त्यग्रमथेतरस्यामध्यंसमूलंत्रिराहापिवाद्भिः ॥ इत्येवंबर्हिः ॥ सम
जनंकृत्वा ॥ किंचित्तृणमपदायपाणिभ्यांदर्व्यांप्रतिष्ठाप्यकृतदेवताउद्दिश्याग्निंप्र
९९ हृत्या ॥ त्रिरुपघात्रित्वंप्रहरतित्रिरंगुल्यांनिर्भृत्याग्निमभिमंत्रयेत् ॥ एवंसर्वचरुतंत्रे

शांगापद्धृ०
षु कुर्यात् ॥ लाजाहोमं विनायत्र चाघोषधिविधिर्भवेत् ॥ बर्हिः समंजनं तत्र गागेयस्य
॥८४॥ न चेत् ॥ इति तथाग्निमुपस्पृश्य मध्यमं परिधिं प्रहृत्यैनरो प्रहरं न् ॥ उत्तरार्ध्यस्याग्रमं
गारेषोपोह्य परिधीनग्निमंभ्य जुहुद्यां स्रुवं निधाय स्रुसंस्रुवाभ्यां विश्वेभ्यो देवेभ्यः स
ंस्रावभागेभ्यः इदमिति हुत्वा ॥ उत्तरपरिषेचनादिं कृत्वा शेषं चरुणा सर्पिष्मता ब्रह्माणं भो
जइत्वा वधूवरामंत्र्यारंभणीये ऽष्टिमपचितायं वृषभं दद्यात् ॥ इति स्थालीपाकः ॥
सायंप्रातरतरूर्ध्वं हस्तेन तंडुलैर्यवैर्वा द्वे आहुती जुहुयात् स्थालीपाकवद्देवनं सौ
रीपूर्वाहुतिः प्रातरुभयतः परिषेचनं कुर्यात् ॥ अग्ने त्वं नो अंतमः ० ॥ उरुष्या णो अघायतः
समस्मात् ॥ इत्युपस्थाय ॥ स्वस्ति श्रद्धां ॥ इत्यग्निं प्रार्थ्य ॥ प्रवरसहितं नमः स्कुर्यात् ॥
हुताहविषः किंचित्फूलिमादाय बृहत्साम तिलकं ललाटे धृत्वा ॥ चतुर्थीहोमादूर्ध्वं तमग्निं भर्ता सं
धारयेत् ॥ एवं सायं होमं हुत्वा ॥ भार्यासह क्षुत्क्षामवेवकं बहुलादोस्वपेत् ॥ नरवद्ध्वादोश स्थालीपाक
यीत ॥ स्थालीपाकप्रभृति त्रिरात्रं दंपत्योः रधः शयनं ब्रह्मचर्यं क्षारलवणवर्जनमेक ॥८५॥
रात्रौ

शैय्यासनेशय्यायांतयोरंतरेण ॥ नैयग्रोधमोदुंबराश्वत्थपाक्षं वा दं ग ढ डं गं धलिप्तं सू
७॥ त्रेणपरिवीतंनिधायब्रह्मचर्येणतपेत् ॥ तथा ॥ गृहप्रवेशहोमांतेपालाशसमिधावापि ॥ सु
मंगलीरितिमंत्रेणद्वयोर्मध्येविनिक्षिपेत् ॥ यदिचतुर्थहोममध्येपौर्णमास्यांप्राप्नुवंति ॥
तदाकेषांचिन्मतमवलंब्यतस्यांपौर्णमास्यामन्वारंभणीयांकृत्वाप्रतिपदिस्थालीपाकं
कुर्यात् ॥ चतुर्थहोममध्येतुप्राप्यतेयद्यपिपौर्णिमा ॥ पक्षस्ययागः नकर्तव्यं अन्वाधानपु
रःसरं ॥ इति ॥ अन्वारंभणीयांप्रयोगः ॥ प्रातरौपासनंहुत्वा ॥ प्राणानायम्य ॥ ममप
र्वणिस्थालीपाकप्रारंभाधिकारसिध्यर्थं अन्वारंभणीयेनस्थालीपाकेनसघे
यक्ष्ये ॥ तत्राग्निरग्नाविष्णूसरस्वतीसरस्वानग्निर्भगिनीचप्रधानदेवतास्विष्टकृदंगदेवता
व्रीहिमयश्चरुर्द्रव्यमितिसंकल्प्य ॥ चरुंश्रपयित्वाग्निप्रज्वलनाद्याज्यभागांते ॥ सरस्वत्यै
स्वाहा ॥ सरस्वत्यैस्वाहेतिद्वेआहुतीर्हुत्वा ॥ स्रुच्युपस्तीर्यचरुमध्याद्विरवदायाभिघा
र्यविशिष्टंचरुमभिघार्याग्नयेस्वाहा ॥ अग्नयेइदं ॥ अग्नाविष्णुभ्यांस्वाहा ॥ अग्नावि

ष्टुभ्याभिदं०॥ सरस्वत्यैस्वाहा॥ सरस्वत्याइदं०॥ सरस्वतेस्वाहा॥ सरस्वतेइदं०॥ अग्नयेभगि
नेस्वाहा॥ अग्नयेभगिनेइदं०॥ स्विष्टकृदर्थं स्विष्टचरुमभिघार्य॥ स्रुच्युपस्तीर्यसकृदव
दायाभिघार्याग्नेस्विष्टकृतेस्वाहेत्युत्तरार्धपूर्वार्धेहुत्वा॥ अग्नयेस्विष्टकृतेस्वा इदं०॥ यथा
विधिरत्नकारिका:॥ अभिघार्यततः स्विष्टकृद्धविः प्रत्यभिघारयेत्॥ प्रधानहोमेषुबहुष्वं
ते प्रत्यभिघारयेत्॥ इति॥ एताश्चवाहुतीर्जुहुयात्॥ अत्रपरिधिप्रहरणंनास्ति॥ स्मार्ता
न्वारंभणीयाः॥ प्रयोगसरण्यां॥ अंन्वारंभणीयायामूलकारिका॥ अग्निस्तद्वागाग्नास्वहि
तश्चविष्णुः सरस्वतीयेवत्तथासरस्वान्॥ अग्निर्भगिनीस्विष्टकृदग्निरेवानुक्रमेण
देवीश्चक्रुतेजयादीन्॥ अन्वारंभणीयाः॥ अंन्वाधाने॥ पर्वणिप्रातरौपासनंहुत्वा
प्राणानायंम्यपौर्णमासेनाग्नेयस्थालीपाकेनैश्वायक्ष्ये॥ तत्राग्निप्रधानदेवतास्विष्टकृदं
गदेवताव्रीहियवंचरुद्रव्यं॥ अंन्यतरस्मिन्कालउपवत्स्यामिब्रह्मचर्यंकरिष्यइतिसंक
ल्प्य विद्युदसिविद्युमेपाप्मानमम्रतात्सत्यमुपैमीत्यपउपस्पृशेत्॥ अमावास्यामप्येवं॥

तत्रमावास्येतिविशेषः॥ इत्यन्वाधानं॥ अथप्रतिपद्धोमः॥ प्रतिपदिप्रातरौपासनंकृत्वा॥ चरु
ंआपद्वास्थालीपाकंसर्वंकुर्यात्॥ अथदर्शपक्षेदक्षिणानास्तिकिंतुपूर्णपात्रंदक्षिणा॥
अष्टमुष्टिर्भवेत्किंचित्चत्वारिपुष्कलं॥ पुष्कलानिचचत्वारिआढकःपरिकीर्तिताः॥ आढका
नांतुचत्वारिपूर्णपात्रंसउच्यते॥ इतिप्रतिपद्धोमः॥ अग्निहोत्रिकविधानं॥ अग्निहोत्रिको
विधिस्यात्तस्यायंप्रयोगः॥ चरुंपक्त्वाग्निंपरिस्तीर्यचरुणास्रुचंपूरयित्वाभागत्रयंकृत्वा
अग्नयेस्वाहेत्येकंभागंकुत्वातच्छेषंपाग्नेःपश्चाद्बर्हिषि॥ ओषधीभ्यःइदंनममेतिनिमृज्य
अग्नयेस्विष्टकृतेस्वाहेतिद्वितीयभागंकुत्वातच्छेषंदक्षिणतोभूम्यांपितृभ्यःइदंनममेति
प्राचीनावीतीनिमृज्याग्निंपरिषिच्य॥ तृतीयभागंकिंचित्प्राश्याचम्यादंष्टैत्योस्रप्य॥ शे उ
षंभक्षयित्वाहस्तंनिर्लिह्याचामेत्॥ नाहंप्रथमपर्वण्यपिप्रतिपद्धोमोपक्रमंकुर्यात्॥ त
थाग्रहपक्षेतो॥ उपरागोधिमासोवायदिप्रथमपर्वणि॥ नतत्रारंभणंकुर्यान्मौढ्येवा
गुरुशुक्रयोः॥ तथा॥ गुरुशुक्रयोर्यदिमूढेग्रहणेचंद्रसूर्ययोः॥ मलिम्लुचेक्षयदापुष्यमान्वा

रंभणिमिष्यते॥ इतिएवमादिनिमित्ताभावेसति॥ यदिप्रथमंपर्वातिपातयइति॥ तदाविप्र
ष्टेष्टिंकुर्यात्॥ आद्यतिपन्नेस्वपौर्णमासेविप्रष्टइष्टिदर्शयथाज्ये॥ प्रशौवसंवत्सरम
प्रयुक्तमाग्रयणेष्टिंशरदन्तयेच॥ विप्रष्टेष्टिप्रयोगः॥ प्राणानायंम्यप्रथमपर्वातिप्र
तिपद्धोमाकारणप्रायश्चित्तार्थं विप्रष्टेष्टिंकरिष्ये॥ तत्राग्निरिंद्रदेवतासोमःप्रधानदेवता
स्विष्टकृदंगदेवताव्रीहियवमयंचरुद्रव्यमितिसंकल्प्य॥ चरुंश्रपयित्वाग्निप्रतिष्ठापना
द्यग्निमुखांते॥ अग्नयेस्वाहा॥ अग्नयेइदं०॥ इंद्रायस्वाहा॥ इंद्रायइदं०॥ सोमायस्वा
हा॥ सोमायाइदं०॥ अग्नयेस्विष्टकृतेस्वाहा॥ अग्नयेस्विष्टकृतेइदं०॥ इतिचर्वाहुतीर्हु
त्वा॥ जयादीन्हुत्वा॥ बर्हिःसमंजनंकुर्यात्॥ परिधिप्रहरणमाकृत्वा॥ ततोन्वारंभणीयं
कृत्वा॥ प्रतिपद्धोमंकुर्यात्॥ तथाविप्रष्टेष्टिकारिका॥ आग्नेयमैंद्रसौम्यंचकल्पयेत्
चरुमीदृशं॥ अग्नयेचतथेंद्रायसोमायस्विष्टकृत्पुनः॥ हावयेदिध्मतंत्रेणविप्रष्टेष्टिज
यादिकं॥ इति॥ इतिश्रुतिश्च॥ योयज्ञविप्रष्टस्यात्स्मात्एताम्निष्टिंनिर्वपेदिति॥ इतिवि ॥८६॥

मोषहिं ॥ कृतमनुसरामः ॥ एवंचतुर्थहोमादग्नमाग्नावंतदूर्ध्वा समिध्यासनिवासम
मारोपयेत् ॥ अयंतेयोनिर्ऋत्वियइतिहोमांतेसमिध्यग्नंसमारोप्य ॥ होमकाले ॥
आज्जुह्वानःसुप्रतीकःपुरस्तात् ॥ उद्बुध्यस्वाग्नइतिद्वाभ्यांलौकिकाग्नौसमिधधिं
निधायोपासनंकुर्यात् ॥ यद्वा ॥ यातेअग्नेयज्ञियातनूस्तयेह्यारोहेत्यात्मानमितिहो
मांतेदक्षिणहस्तंअग्नौप्रतितप्य ॥ आत्मनिधाय ॥ उष्माणमंतःप्रवेश्यात्मनिसमा
प्य ॥ पुनर्होमकाले ॥ उपावरोहजातवेदइत्यंतःप्रविष्टमग्निमूर्ध्वमुत्क्रम्यलौकिका
ग्नावुपारोह्य ॥ औपासनंकुर्यात् ॥ अक्षतामेधमादाय ॥ सम्यग्वायुनिगृह्यच ॥ मंत्रमु
क्त्वाहस्तवह्नि ॥ धमग्नौविनिक्षिपेत् ॥ अथचतुर्थीहोमः ॥ स्थालीपाकप्रपन्न त्रिरात्रंदंप
त्योरधःशय्याब्रह्मचर्यक्षारलवणवर्जनमेकशेयासनेचतुर्थीमपररात्रेशैय्यायां ॥ दं
पत्योर्मध्येविहितंदंडं ॥ उदीर्ष्वातोविश्वावसोनमसेडामहेत्वा ॥ अन्यामिच्छप्रफर्व्यं सं
जायापत्यासृज ॥ उदीर्ष्वातःपतिवतीह्येषाविश्वावसुंनमसागीर्भिरीट्टे ॥ अन्यामि

षपिलषदंव्यत्का॥ सैनेभागोननुषानस्यविद्धि॥ इतिद्वाभ्यांदं उमुत्थाप्य॥शयन
स्थानादन्यत्रप्रक्षाल्यनिधाय॥ वरमुत्तरआसीनः॥प्राणानायम्य॥ममविवा
हशेषंकरिष्यइतिसंकल्प्य॥अग्निप्रतिष्ठापनाद्याज्यभागांते॥ स्रुचमाज्यमादाय॥
अग्नेप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसिब्राह्मण॥स्त्वानाथकामः प्रपद्येयास्यांप
तिघ्नीतनूः प्रजाघ्नीपशुघ्नीलक्ष्मघ्नीजारघ्नीमस्यैताकृणोमिस्वाहा॥ अग्नयइदं०॥
वायोप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसि०॥ कृणोमिस्वाहा॥वायवइदं०॥आदि
त्यःप्रायश्चित्ते० कृणोमिस्वाहा॥आदित्यायइदं०॥ प्रजापतेप्रायश्चित्ते०॥ कृणो
मिस्वाऽहा॥ प्रजापतयइदं०॥ प्रसवश्चोपयामश्चकाटश्चार्णवश्चधर्णसिश्चद्रविणं
चभगश्चांतरिक्षंचसिंधुश्चसमुद्रश्च॥ सरस्वांश्चविश्वव्यचाश्चतेयंद्विष्मोयश्चनोद्वे
ष्टितमेषांजंभेदध्मस्वाहा॥ प्रसवादिभ्योदेवताभ्यइदं०॥ मधुश्चमाधवश्च ०भट्टि०
शुक्रश्चशुचिश्चनभश्चनभस्यश्चेषश्चोर्जश्चसहश्चसहस्यश्चतपश्चतपस्यश्चते ८६

पंद्विष्मोयश्चनोद्वेष्टितमेषांजंभेदध्मःस्वाहा॥वध्यादिभ्योदेवताभ्यइदं०॥चित्तं
चाचित्तिश्चाकूतंचाकूतिश्चविधीतंचाधीतिश्चविज्ञातंचविज्ञानंचनाम
चक्रतुश्चदर्शश्चपूर्णमासश्चतेयंद्विष्मोयश्चनोद्वेष्टितमेषांजंभेदध्मः
स्वाहा॥चित्तादिभ्योदेवताभ्यःइदं०॥तत्रोद्देशत्यागकारिकाः॥अग्नि
र्वायुस्तथादित्यःप्रजापतिरितिक्रमात्॥होमेविवाहशेषस्यत्वेषे
षुचदेवताः॥प्रसवादिषुमंत्रेषुदेवताःप्रसवादयः॥हुत्वा॥जयादिवं
लाविसर्जनांनांते॥अत्रकारिका॥हस्तेनादायसंपातानाज्यंकिंचित्पृ
थक्पृथक्॥नकुर्यात्स्रुक्स्रुवोद्वाभ्यांहस्तेनजुहुयाद्बुधः॥अग्नेःप
श्चात्प्राङ्मुखींपत्नीमुपवेश्य॥तस्याःशिरसिआज्यशेषाद्धस्तेन॥

८८ ज्यमादाय ॥ भूः स्वाहा भुवः स्वाहा सुवः स्वाहा ओं स्वाहा ॥ इति चतुर्भिः स्रुवपांलिष्ठं
॥ त्रिंगा ॥ नाज्यं निनयेत् ॥ अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतं ॥ इ
ह प्रजामिह रयिं रराणः प्रजायस्व प्रजया पुत्रकाम ॥ इति वधूर्वरं पश्येत् ॥ इह प्र
जामिह रयिं रराणः प्रजायस्व प्रजया पुत्रकामा ॥ अपश्यं त्वा मनसा दीध्याना
ं स्वायां तनू ऋत्व्ये नाधमानां ॥ उप मामुच्चा युवतिर्बभूयाः प्रजायस्व
प्रजया पुत्रकामे ॥ इति वरो वधूं दृष्ट्वा ॥ समंजंतु विश्वे देवाः समापो हृदयानि नौ ॥
सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ॥ इत्याज्यशेषेण हृदयदेशौ संमृ
ज्य ॥ प्रजापते तन्वं मे जुषस्व त्वष्टर्देवेभिः सह साम इंद्र ॥ विश्वैर्देवै राति ॥ भाद्दि ॥
भिः संरराणः पुंसां बहूनां मातरः स्याम ॥ आ नः प्रजां जनयतु प्र ८८

त्रापराजसायसमनङ्कुर्यमा ॥ अदुर्मंगली: पतिलोकमाविशशंनोभवद्विपदेशंचतुष्प
दे ॥ तांपूषंछिवतमामेरयस्वयस्यांबीजंमनुष्यावपंति ॥ यानऊरूउशतीविश्रयाते
यस्यामुशंत: प्रहरामशेपं ॥ इतितिस्रोजपित्वा ॥ आरोहोरुमुपबर्हस्वबाहुंपरिष्व
जस्वजायांसुमनस्यमान: ॥ तस्यांपुष्यतुमिथुनौसयोनीबह्वींप्रजांजनयंतौसरे
तसौ ॥ आइयारंण्यायश्वात्राभंथसुरूषपुरुषेणशक्र: ॥ तदेतौमिथुनौसयोनिबह्वींप्रजय
स्तेनेहगच्छतं ॥ अहंगर्भमदधामोषधीष्वहंविश्वेषुभुवनेषंत: ॥ अहंप्रजाअजनयंपि
तृणामहंजनिभ्यो अपरीषुपुत्रान् ॥ पुत्रिणेमाकुमारिणाविश्वमायुर्व्यश्नुतं ॥ उभाहिरंण्य
पेशसावीतिहोत्राकृतद्वसूदशस्यंताम्हनायकं ॥ शमुघोरामशरंहतादेवेषुकृण्उतोदुव: ॥
इतिसमावेशनेजपेत् ॥ इतिविवाहहोमशेष: ॥ हृदयसंमार्गहोम: ॥ कथ्यते ॥ वध्वापित्रादि
कन्नीत्रिरात्रंदंपत्योब्रह्मचर्यंचरित्वाचतुर्थेहनितिष्यनक्षत्रेप्राणानायम्य ॥ दंपत्योहृदयसंमा
र्गहोमंकरिष्यइतिसंकल्प्य ॥ दंपत्योरोपासनाग्नौचरुंश्रपयित्वा ॥ अग्निप्रतिष्ठापनाद्यग्नि

शिंगा० मुखांते॥ प्रातरग्निंप्रातरिंद्रꣳहवामहेप्रातर्मित्रावरुणाप्रातरश्विना॥ प्रातर्भगंपूषणंब्रह्म पा॰दि॰॥१
॥८९॥ णस्पतिंप्रातःसोममुतरुद्रꣳहुवेमस्वाहा॥ अग्नींद्रमित्रावरुणाश्विनेभगायपूषणेब्रह्म
णस्पतयेसोमायरुद्रेभ्यः इदं०॥ प्रातर्जितंभगमुग्रꣳहुवेमवयंपुत्रमदितेर्योविधर्ता॥ आ
ध्रश्चिद्यंमन्यमानस्तुरश्चिद्राजाचिद्यंभगंभक्षीत्याहस्वाहा॥ भगायइदं०॥ भगप्रणेतर्भग
सत्यराधोभगेमांधियवमुदवददन्नः॥ भगप्रणोजनयगोभिरश्वैर्भगप्रनृभिर्नृवंतस्यामस्वा
हा॥ भगायइदं०॥ उतेदानींभगवंतस्यामोतप्रपित्वउतमध्येअह्नां॥ उतोदितामघवन्त्सूर्यस्य
वयंदेवानाꣳसुमतौस्यामस्वाहा॥ भगायइदं०॥ भगएवभगवाꣳअस्तुदेवास्तेनवयंभगवंत
स्याम॥ तंत्वाभगसर्वइज्जोहवीमिसनोभगपुरएताभवेहस्वाहा॥ भगेभ्यःइदं०॥ समध्वराये
षसोनमंतदधिक्रावेवशुचयेपदाय॥ अर्वाचीनंवसुविदंभगंनोरथमिवाश्वावाजिनआव
हंतु॥ स्वाहा॥ भगेभ्योवाजिभ्यः॥ अश्वावतीर्गोमतीर्नउषासोवीरवतीःसदमुच्छंतुभद्राः॥
घृतंदुहानाविश्वतःप्रपीतायूयंपातस्वस्तिभिःसदानः॥ स्वाहा॥ मंत्रोक्तदेवताभ्यइदं॥
अग्नयेस्विष्टकृतेस्वाहा॥ अग्नयेस्विष्टकृतइदं०॥ तत्रदेवतानुक्रमणिकारिकाः॥ अ ॥८९॥

॥श्री॥ ॥बोप्पण स्तरीप्रयोगस्समाप्तः॥
॥श्रीवेंकटेशायनमः॥ चिदंबरार्पणमस्तु॥

॥१॥ श्रीगणेशायनमः॥ ॥अथाग्निमुखं॥ ॥अथगार्ह्याणिकर्माणि
प्राङ्मुखोदर्भेष्वासीनोदर्भान्धारयमाणः॥प्राणानायम्यदेशकालौ
संकीर्त्य॥अमुककर्मकरिष्ये॥इतिसंकल्प्य।उपलिप्यशुचौदेशेरत्निमा
त्रंसिकताभिःस्थंडिलंचतुरस्रंकृत्वातस्योपरितंडुलैःपिष्टेनवाप्रादेश
मात्रंचतुरस्रंकृत्वांगुष्ठानामिकाभ्यांसमिधंदर्भंवागृहित्वासंलग्नमुद्
दक्षिणालाआरभ्योदक्संस्थाःप्राचीस्तिस्रोलेखाल्लिखित्वावाची
नेनपाणिनाभ्युक्ष्य॥भूर्भुवःसुवरोमित्यग्निंप्रतिष्ठाप्य॥अवोक्ष
णशेषतोयंप्रागुदग्वोत्सिच्यान्यदुदकमानीय॥यथापरिस्तरणादि ॥२॥
हि॥प्रागुदग्वाग्निंदध्यादग्न्यानयनपात्रेवाद्रेकृत्वैतलधार्येनावि

घलेग्निमिध्मालंकृत्य ॥ चत्वारिश्रृंगात्रयो॰मुखः ॥ इति ध्यात्वा ॥ स
मंत्रमग्निंपाणिनापरिसमूह्य ॥ अवाद्भुष्टिप्रकारेणपर्युक्ष्य ॥ अग्न
येनमः ॥ हुतवहायनमः ॥ हुताशनेनमः ॥ कृष्णवर्त्मनेनमः ॥ देव
मुखायनमः ॥ सप्तजिंहायनमः ॥ वैश्वानरायनमः ॥ जातवेदसेन
मः ॥ इत्येतेर्नामेभिः पूर्वतःप्रभृति प्रदक्षिणाकारमष्टदिक्षु ध्यायत
नमलंकृत्यालंकारणादूर्ध्वं प्रागादिप्रदक्षिणारंदक्षिणोत्तरैरुत्तराध
रैः प्रागुदगग्रैः षोडशद र्भैरग्निंप्रतिदिशंपरिस्तरणाति ॥ दक्षिणाः
प्रागग्रैः पित्रियेषूत्तरेणाग्निंद्वादशदर्भांसमूस्तीर्य ॥ तेषुदेवपात्रा
णिद्वंद्वंन्यंचिदर्व्याज्यस्थाल्यौप्रोक्षणपूर्णपात्रे ध्मः स्रुवावित

॥२॥ पाठक्रमेण ॥ दक्षिणाभ्यां हस्ताभ्यामादाय प्रक्षनक्ष्यनं तर्गर्भौ समावच्छि
न्नाग्रौ द्वौ दर्भौ तरुणं काष्ठं वा लर्धौ यच्छिन्नात्ति न नखेनाप उपस्पृश्य ॥ पवित्रं कुर्या
त्समित्पवित्रे प्रादेशमात्रे तद्द्विगुणमभिध्मं त्रिगुणाः परिधाय इति पवित्र
समिदिध्मपरिधिपरिमाणं ॥ पवित्रमद्भिः सम्मृज्योत्ताने प्रोक्षणपात्रे निधा
यप्रो[illegible] ध्यापरेणाग्निं पवित्रांतर्हिते पात्रे पआनिय विवाहचौलसीमंतक्षा
ध्यायं बलकर्मणि स्नानगोदनसंधाने आज्यसंस्कारमंतरे अप आनीयो
त्तानयोर्हस्तयोरंगुष्ठोपकनिष्ठिकाभ्यां मुदगग्रे गृहीत्वा प्राचीरुत्पूय पा
त्राण्युत्तानानि कृत्वा ध्मं चाविस्रस्योत्ताने नाप्रोक्ष्यापरेणाग्निं पवित्रांत
र्हिते पूर्णपात्रे प आनीय पूर्ववदुत्पूय समं प्राणेभ्यो हृत्वोत्तरेणाग्निं द्वादश
दर्भेषु सादयित्वाष्टदर्भैः प्रच्छाद्यो त्रिदर्भैर्वस्नाथैदक्षिणतो मेखला ॥२॥

निषाद्य तदभावे ब्रह्मायतने ॥ ब्रह्मन्ब्रह्मासि नमस्ते ॥ ब्रह्मन्ब्रह्मणे ॥ इति ब्रह्मा
सनं दत्वा ॥ आज्यं विकाप्य विलिनमप्य ग्नावधिश्रित्यापरेणाग्निं परिस्तरणाद्ब
हिः पवित्रांतर्हितायामाज्यस्थाल्यामाज्यं निरूप्योत्तरेणाग्निं परिस्तरणाद्बही
चौंगारान्निरूह्य तेष्वधिश्रित्य ज्वलतेकदर्भाग्रं वद्यायद्वदर्भाग्रैः प्रछिद्य प्रक्षा
ल्यप्रत्यस्य पुनरेकज्वलद्दर्भान्त्रिः पर्यग्निकृत्वोदगुद्वास्या निरूढांगारानग्निम
व्यौत्लेन पर्याग्निकरणोल्मुकं तच्छोषं बर्हिर्निरूढांच्च लत्रैवयोश्च येदंगारा
न्प्रत्यूह्योदगग्राभ्यां पवित्राभ्यां पुरस्तादारभ्य पश्चान्नीत्वा पुरस्ता
समाप्तिरेवं त्रिरुत्पुय पवित्रग्रंथिं विस्त्रस्याद्भिः संस्पर्श्य प्रागग्रमग्नौ प्रहर
ति ॥ ॥ ६९ ॥ ॥ दर्भैः सह स्रुवं दक्षिणेन हस्तेनादाय वमेन कुशं युग
पत् ॥ प्रतितप्य ॥ वा प्रक्कनिष्ठानामिकसंधौ अंगुष्ठेन गृहीत्वा ॥ तस्योप
रि स्रुवमग्रे रंतरतोभ्याकारं सर्वतो बिलमभिमृशेन्मूलादारभ्य मूलं दंडं

॥३॥ ।मालिकृमेण धारयित्वा अुह्म मग्नेरलरतो न्याकारं प्राचीमध्ये बर्हिषुलः प्र
तीचीमूलै र्इडमिलिकृमेण स्रुवस्थादर्भैरेवसमस्य ॥ नसंस्पृष्टमसंस्पृष्टे
नस ऽस्य श्रीयति ॥ पुनः प्रतिलप्य ॥ प्रोक्ष्यदर्भेषुसादयति ॥ दर्भानद्भिः
संऽस्पर्श्योग्नो प्रहृत्य ॥ परिस्तरणादंतः परिधिन्परिदधाति ॥ स्फ विष्टप
श्चादुदगग्रमपरीयाऽसंदीर्घंमध्यपरिधेरुपरिदक्षिणातः प्रागग्रमानिष्ठऽ
ह्रस्वंमध्यमपरिधेरधस्तादुत्तरतः प्रागग्रऽसमिद्वयहस्तेनमध्यमारि
धिमुपस्पृश्य ॥ पुरस्तादूर्ध्वे आघारसमिधावादधायाग्नेप्यामेकामिलरा
मीरान्या ।पित्रियेषु मध्यमपरिधिर्दक्षिणागतस्या ऋवेणाज्यमादायेध्मा
धरूणि सिक्त्वा ॥ अदितेनुमन्यस्व ॥ दक्षिणतः प्राचीनं अनुमतेनुमन्य
स्व ॥ पश्चादुदीचीनं ॥ सरस्वतेनुमन्यस्व ॥ उत्तरतः प्राचीनं ॥ देवसवि ॥३२
तः प्रसुव ॥ समंततोग्निं परिषिंचति ॥ पित्रियेषु तूष्णीं ऽ समंतमेवा
प्रदक्षिणमेकाऽसमग्रीधमिध्मसंनहनं चा पास्यासनाकिंचिदुत्थाय ॥

नटस्थ ब्राह्मणो ःसह ॥ अस्मिनुहोमेइ ध्मा मा धास्य ॥ इदमग्ने ॥ आधा
स्य ॥ इत्यनुज्ञा नोपविश्य ॥ हस्तौ प्रक्षाल्य तूष्णीमिध्ममादधाति ॥ प्रजापतय
इदं ॥ स्रुवेणाज्यमादाय ॥ स्रुचि गृहीत्वैव स्रुवेषु स्रुचि होमेषु पुनरादायो
त्तरं परिधिसंधिमन्ववहृत्य ॥ प्रजापतिं मनसा ध्यायन् ॥ दक्षिणा प्राचम्
ऊर्ध्वं संततं ज्योतिष्मत्यग्नौ समवाणी ध्मकाष्ठानि सऊं स्पर्शयन् स्वाहाकारम्पा
घास्यति ॥ प्रजापतय इदं ॥ स्रुचीध्मासीनो दक्षिणं परिधिसंधिमन्ववह
यैदमनसा ध्यायन्प्राचमुदय च पूर्ववदाघारयति ॥ इन्द्राय इदं ॥ प्रागु
चम्पाज्यभागौ स्रुचा जुहोति ॥ अग्नये स्वाहा ॥ अंतरपूर्वदेशे ॥ अग्नये
इदं ॥ सोमाय स्वाहा ॥ दक्षिणापूर्वदेशे ॥ सोमायेदं ॥ समं पूर्वेणा यथो
पदेशं प्रधानाहु[illegible]ालिर्हुत्वा ॥ पास्तसाभिप्रकोहा प्रदयकद्राय नोभि चस
योऽभिइदं ॥ अपउपस्पृश्य ॥ स्रुवेण चित्तौ दीऊं स्रयादशाज्यायान ब्भिरादीन

॥५॥ ष्टादशाज्यानानु ॥ ऋतताषाडादींद्वाविं॰शतीराष्ट्रभृतः प्राजापत्याव्याहृतीर्विहृता॥
यदस्य कर्मणो ऽत्यरीरिचमितिसौविष्टकृतीमित्येकं पञ्चुहोति ॥ जीवपितृकस्यपितृपर
स्मापदलोपो जीवत्पितामहस्यैतत्पर लोपो जीवत्पितामहस्य तद्ध्योमलो
पः ॥ प्राचीनावीतिनामाहुतिं जुहुयादेतत्कर्मसमृद्ध्यर्थं जयादिहोमं करि
ष्ये ॥ इतिसंकल्प्य ॥ चित्तं च स्वाहा ॥ चित्तायेदं॰ ॥ चित्तिश्च स्वाहा ॥ चित्त्याइ
दं॰ ॥ आकूतं च स्वाहा ॥ आकूतायइदं ॥ आकूतिश्च स्वाहा ॥ आकूत्यैइदं॰ ॥
॥४॥ विज्ञातं च स्वाहा ॥ विज्ञातायइदं॰ ॥ विज्ञानं च स्वाहा ॥ विज्ञानायइदं॰
॥६॥ मनश्च स्वाहा ॥ मनसेइदं॰ ॥७॥ शक्वरीश्च स्वाहा ॥ शक्वर्यैइदं॰ ॥ ८॥ ॥५॥
दर्शश्च स्वाहा ॥ दर्शायइदं॰ ॥९॥ पूर्णमासश्च स्वाहा ॥ पूर्णमासायइदं॰
॥१०॥ बृहच्च स्वाहा ॥ बृहतइदं॰ ॥११॥ रथंतरं च स्वाहा ॥ रथंतरायइदं॰ ॥१२॥

प्रजापति र्यामिंद्राय वृष्णेप्राय छाद्रुग्रः पृतनाज्येषु तस्मै विशः समनमंतस
र्वाः सउग्रः सहिहव्यो बभूवस्वाहा ॥ प्रजापतयइदं ॥१३॥ अग्निर्भूतानामधिपति:
समावत्वस्मिं न्ब्रह्मन्न स्मिन्क्षत्रेस्या मासिष्यस्यां पुरोधायामस्मिं न्कर्मन्न
स्यां देवहूत्यां स्वाहा ॥ अग्नये भूतानामधिपयेइदं ॥१॥ इंद्रो ज्येष्ठानामधि
पतिः स० हूत्यां स्वाहा ॥ इंद्राय ज्येष्ठानामधिपतयइदं ॥२॥ यमः पृथिव्या
मधिपतिः सम० स्वाहा ॥ यमाय पृथिव्याधिपतयेइदं ॥३॥ वायुरंतरिक्ष
स्याधिपतिः स० स्वाहा ॥ वायवे अंतरिक्षस्याधिपतयेइदं ॥४॥ सूर्यो दि
वोधिपतिः स० स्वाहा ॥ सूर्याय दिवोधिपतये तेइदं ॥५॥ चंद्रमा नक्षत्रा
णामधिपतिः स० स्वाहा ॥ चंद्रमसे नक्षत्राणामधिपतयेइदं ॥६॥ बृहस्पतिर्ब्रह्मणो
धिपतीः स० स्वाहा ॥ बृहस्पतये ब्रह्मणोधिपतयेइदं ॥७॥ मित्रः सत्यानाम

॥ ५ ॥ धिपतिः स॰ स्वाहा ॥ मित्रायसत्यानामधिपतयेइदं॰ ॥८॥ वरुणापामधिपतिः
स॰ स्वाहा ॥ वरुणायअपामधिपतयेइदं॰ ॥९॥ समुद्रः स्रोत्यानामधिपतिः
स॰ स्वाहा ॥ समुद्रायस्रोत्यानामधिपतयेइदं॰ ॥१०॥ अन्नं साम्राज्याना
मधिपतितन्मावतस्मिन्वे॰ स्वाहा ॥ अन्नायसाम्राज्यानामधिपतिने
इदं॰ ॥११॥ सोमओषधीनामधिपतिः सम्मा॰ स्वाहा सोमायओषाधी
नामधिपतयेइदं॰ ॥१२॥ सविताप्रसवानामधिपतिः स॰ स्वाहा ॥ सवि
त्रेप्रसवानामधिपतयेइदं॰ ॥१३॥ रुद्रः पशूनामधिपतिः स॰ स्वाहा ॥ रु ॥ ५ ॥
द्रायपशूनामधिपतयेइदं॰ ॥१४॥ अपउपस्पृश्य ॥ त्वष्टारूपाणामधिपतिः स॰ स्वा
हा ॥ त्वष्ट्रेरूपाणामधिपतयेइदं॰ ॥१५॥ विष्णुः पर्वतानामधिपतिः सम्मावत्स्वाहा ॥

विष्णवे पर्वतानामधिपधिपतये इदं० ॥१६॥ मरुतो गणानामधिपतयस्ते मावन्त्व
स्मिन्ब्र० स्वाहा ॥ मरुद्भ्यः गणानामधिपतिभ्यः इदं० ॥१७॥ पितरः पितामहाः परेव
रे तास्ततामहा इह मावन्त ॥ अस्मिन्० स्वाहा ॥ पितृभ्यः पितामहपरेभ्यो वरेभ्य
स्ततेभ्यो स्ततामहेभ्यः इदं० ॥ जीवपितृकश्चेत् ॥ पिताम्य हा वरे ततामहा इह
मावन्त अस्मिन्० ॥ पितामहेभ्यो वरेभ्यस्ततामहेभ्यः इदं० ॥१८॥ अपउपस्पृश्य ॥
ऋताषाडृतधामाग्निर्गंधर्वस्तस्यौषधयोप्सरस ऊर्जो नाम स इदं ब्रह्म क्षत्रं पा
तु ताइदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा ॥ ऋतासहे ऋत धाम्ने अग्नये गंधर्वाये
इदं० ॥ ताभ्यः स्वाहा ॥ औषधीभ्यो प्सरोभ्यः ऊर्ग्भ्य इदं० ॥२१॥ सꣳहितो विश्वा
सामा सूर्यो गंधर्वस्तस्य मरीचयो प्सरस आयुवो नाम स इदं ब्रह्म क्षत्रं पातु ता
इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा ॥ सꣳहितो विश्वसाम्ने सूर्याय गंधर्वाय इदं० ॥

ताभ्यः स्वाहा ॥ मरीचिभ्योप्सरोभ्य आयुभ्य इदं ॥ २ ॥ सुषुम्नः सूर्यरश्मिश्च
॥ ६ ॥ न्द्रमा गंधर्वस्तस्य नक्षत्राण्यप्सरसो बेकुरयो नाम स० स्वाहा ॥ सुषुम्नाय सूर्यरश्म
ये चंद्रमसे गंधर्वाय इदं ॥ ताभ्यः स्वाहा नक्षत्रेभ्योप्सरोभ्यः बेकुरीभ्यः इदं ॥ ३ ॥
भुज्युः सुपर्णो यज्ञो गंधर्वस्तस्य दक्षिणा अप्सरसस्तवा नाम स इदं स्वाहा ॥ भुज्यवे
सुपर्णाय यज्ञाय गंधर्वाय इदं ॥ ताभ्यः स्वाहा ॥ दक्षिणाभ्योप्सरोभ्यस्तवाभ्यः इदं ॥ ४ ॥
प्रजापतिर्विश्वकर्मा मनो गंधर्वस्तस्य ऋक्सामान्यप्सरसो वह्नयो नाम स० स्वाहा ॥ प्रजा
पतये विश्वकर्मणे मनसे गंधर्वाय इदं ॥ ताभ्यः स्वाहा ॥ ऋक्सामेभ्योप्सरोभ्यो
वह्निभ्यः इदं ॥ ५ ॥ इषिरो विश्वव्यचा वातो गंधर्वस्तस्यापो अप्सरसो मुदा नाम
स० स्वाहा ॥ इषिराय विश्वव्यचसे वाताय गंधर्वाय इदं ॥ ताभ्यः स्वाहा ॥ अ ॥ ६ ॥
द्भ्योप्सरोभ्यो मुदाभ्यः इदं ॥ ६ ॥ भुवनस्य पते यस्य त उपरि गृहा इह च ॥
स नो रास्वाज्यानिं रायस्पोषं सुवीर्यं संवत्सरीणां स्वस्तिं स्वाहा ॥

भुवनस्पतयेइदं॰।।७।।परमेष्ठ्याधिपतिर्मृत्युर्गंधर्वस्तस्यमप्सरसोवोनामस॰।।
स्वाहापरमेष्ठिनेअधिपतयेमृत्यवेगंधर्वायइदं॰।।ताभ्यःस्वाहा।।विश्वस्मअ
प्सरोभ्योभूभ्यःइदं॰।।८।।सुक्षितिःसुभूतिर्भद्रकृत्सुवर्वान्पर्जन्योगंधर्वस्तस्य
विद्युतोप्सरसोरुचोनामस॰स्वाहा।।सुक्षितयेसुभूतयेभद्रकृतेसुवर्वतेप
र्जन्यायगंधर्वायइदं॰।।ताभ्यःस्वाहा।।विद्युद्भ्योप्सरोभ्योरुग्भ्यःइदं॰।।९।।दूरे
हेतिरमृडयोमृत्युर्गंधर्वस्तस्यप्रजाअप्सरसोभीरुवोनामस॰स्वाहा।।दूरे
हेतयेअमृडयमृत्यवेगंधर्वायइदं॰।।ताभ्यःस्वाहा।।प्रजाभ्योप्सरोभ्यो
भीरुवोनामरुभ्यःइदं॰।।१०।।चारुःकृपणकाशीकामोगंधर्वस्तस्याधयोप्सरसःशोच
यंतीर्नामस॰स्वाहा।।चारवेकृपणकाशिनेकामायगंधर्वायइदं॰।।ताभ्यः
स्वाहा।।आधिभ्योप्सरोभ्यःशोचयंतीभ्यःइदं॰।।११।।सनोभुवनस्यपतेय
स्यतउपरिगृहाइहच।।उरुब्रह्मणेस्मैक्षत्रायमहिशर्मयच्छस्वाहा।।[illegible]

सनो॰ वनस्पतये ब्रह्मण इदं॰ ॥१२॥ प्रजापते नत्वदेता॰न्यो णा॰स्वाहा ॥ प्रजापतये
॥७॥ इदं॰ ॥१३॥ भुः स्वाहा ॥ अग्नये इदं॰ ॥ भुवः स्वाहा ॥ वायव इदं॰ ॥ सुवः स्वाहा ॥ सूर्याय
इदं॰ ॥ भुर्भुवः सुवः स्वाहा ॥ प्रजापतय इदं॰ ॥ यदस्य कर्मणो त्यरीरिचं यद्वान्यूनमि
हाकरं ॥ अग्निष्टत्स्विष्टकृद्विद्वान्सर्वं स्विष्टं॰ सुहुतं करोतु स्वाहा ॥ अग्नये स्वि
ष्टकृत इदं॰ ॥१४॥ अत्राषाढ्यत्र न पार्यायविभागो भुवनस्य पतय इति पर्य्याया
णां समाप्तिः ना भ्यः स्वाहेत्युत्तरान्तिम सूत्रविरोधात् सर्वत्र न मम इदं॰ ब्रह्म
त्रं पातु नाइदे ब्रह्मक्षत्रे पान्तु ता स्मै स्वाहेत्य नुषंगस्ता भ्यः स्वाहेत्यन्वानेयालुस
हुलौ मंत्रौ हुत्वा च ॥ दर्व्यां परिधीनक्तावेनपश्चिमतौ दवे निधाय तस्यचोत्तरतो द्वि
तीय दर्वी बर्हिरादाय ॥ तदग्र दर्व्याम क्त्वा समूलं बर्हिर्मध्यं द्वितीयदर्व्यां मूलं तृत्ती
दक्षिणं पाणिम्यध्य कुर्याद्विवात्रिस्त्व ग्रमपदाय ॥ दक्षिणोत्तराभ्यां बर्हिर्दर्व्यां ॥७॥
प्रतिष्ठाप्य ॥ सव्यं करमपास्य नीचहस्तेन बर्हिरग्र मग्नौ प्रहृत्यन्यच॰ हस्तं प

यावद्यंजलिनाग्निरुक्षिप्तंसर्वंबर्हिप्रस्यपास्त एगमपिप्रहरति ।। त्रिरंगुल्यानिदिश्य ।। आग्नमभिमं
त्र्य ।। भूमिमुपस्पृशेत् ।। मध्यमंपरिधिंप्रहृत्यैतरोप्रहरंनुतरार्धस्याग्राग्नमंगगारेषूपोहति ।। परिधी
नभिमंत्र्याधारसंमिधौप्रहृत्य अङ्गुष्ठाच्छ्रुवेन्निधाय ।। विश्वान्देवानुदिश्य सं स्रावेण जुहोति ।।
विश्वेभ्यो देवेभ्यस्वाहा ।। विश्वेभ्यो देवेभ्यः संस्रावभागेभ्यः इदं ।। अस्मिन्प्रकृतेकर्मणि
ज्ञानाज्ञानिकृतदोषनिर्हरणार्थमनाज्ञातं पुरुषसंमितो यत्पाकत्रेति कर्मान्तरेलकर्मणिपर्या
सप्रायश्चित्तार्थं त्वंनोअग्नेसत्वंनोअग्नेइतिस्वरक्षरपदवर्णविलतलोपप्रायश्चित्तार्थमाभिर्गीर्भि
रितिवाङ्गियमलोपप्रायश्चित्तार्थंमिदंविष्णुस्त्रेधाचक्रमितिसर्वेपिघातप्रायश्चित्तार्थंपु
नस्त्वादित्याइतित्र्यऋचिक्ष्माद्यप्रायश्चित्तार्थंयद्विद्वांसइतिसमस्तदोषभयाद्युपद्रव
निर्हरणार्थंत्वमग्नेअयास्ययन्तद्रस्यास्तिदागकणानोनाजातवेदः सदितिसर्वप्राय
श्चित्तार्थंभुर्भुवःसुवरित्येतैर्मंत्रैराज्याहुतिस्रुवेणहोष्यामि ।। ६ ।। अनाज्ञातंयदाज्ञातं यज्ञस्यक्रि
तेमिथु ।। अग्नेतदस्यकल्पयत्वंहिवेत्थयथातथं स्वाहा ।। अग्नयेइदं ।। १ ।। पुरुषसंमितो
यज्ञोयज्ञः पुरुषसंमितः अग्नेतदस्यकल्पय० तथं स्वाहा ।। अग्नयेइदं ।। २ ।। यत्पाक

॥८॥ त्रामनसादीनदक्षानयज्ञस्यमंन्वतेमर्त्यासः॥ अग्निष्ट्धोताक्रतुविद्विजा
नंयजिष्ठोदेवाँ२ ऋतुशोयजातिस्वाहा॥ अग्नयेइदं॥ ३॥ त्वंनोअग्नेवरुण
स्यविद्वांदेवस्यहेडोवयाससीष्ठाः॥ यजिष्ठोवंह्नितमः शोशुचानोविश्वा
द्वेषाँ२सिप्रमुमुध्यस्मत्‌॥ स्वाहा॥ अग्नीवरुणाभ्यामिदं॥ सत्वंन्नो
अग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ॥ अवयक्ष्मनोवरुणँ२र
राणोवीहिमृडीकँ२सुहवोनएधिस्वाहा॥ अग्निवरुणाभ्यांइदं॥ त्वंनो
अग्नेअयास्ययासंन्मनसाहितः॥ अयासंन्हव्यमोहिषेयानोधेहिभे
षजं२स्वाहा॥ अग्नयेइदं॥ ६॥ प्रजापतेनत्वदेता॰न्यीणा२स्वाहा॥ प्रजापतय
इदं॥ ७॥ आशिर्गीभिर्यदतोनवनमाप्यायमहरिवोवर्धमानः॥ यदास्तोत
भ्योमहिगोत्राकुजासिभुयिष्ठभाजोअधतेस्यामस्वाहा॥ इन्द्रायहरिवतइ ॥८॥

दं०॥८॥ इदं विष्णुर्विचक्रमे त्रेधानिदधेपदं॥ समूढमस्यपाꣳसुरेस्वाहा॥ श्री
विष्णवइदं०॥९॥ त्रियंबकं आमहे सुगंधिंपुष्टिवर्धनं॥ उर्वारुकमिवबंधना
न्मृत्योर्मुक्षिय्यमामृतात्स्वाहा॥ त्रियंबकायदं०॥१०॥ पुनस्त्वादित्यारुद्रावं
सवः समिंधतांपुनर्ब्रह्मणोवसुनीथयज्ञैः॥ घृतेनत्वंतन्वंवर्धयस्वस
त्यासंतुयजमानस्यकामास्वाहा॥ अग्नयेसुनीथायेदं०॥११॥ यद्विद्वाꣳ
सोयदविद्वाꣳसोमुग्धाः कुर्वंतिचिज्जः॥ अग्निर्मातस्मादेनसः श्रद्धादेवी
चमुंचतुꣳस्वाहा॥ अग्नयेश्रद्धादेव्याइदं०॥१२॥ अस्कांद्यौः पृथिवीं॥ अ
स्कान्नृषभोयुवागाः॥ स्कंन्नेमाविश्वाभुवनास्कन्नोयज्ञः प्रजनयतु॥ अस्का
नजनिप्राजनिअस्कंन्नाज्जायतेवृषा॥ स्कंन्नात्प्रजनिषीमहिस्वाहा॥ ॥

।

॥ ९ ॥ स्कंन्नादिभ्योदेवताभ्यइदं॥१३॥यंम्नआत्मनोमिंदाभूदग्निस्तत्सुनरा
हाजातवेदाविचर्षणिःस्वाहा॥मिंदादिभ्योदेवताभ्यइदं॥१४॥यतइंद्र
भयामहेततोनोअभयंकृधिमघवंछग्धितवत्तन्नऊतयेविद्विषोविम्र
धोजहिस्वाहा॥इंद्रायमघवतइदं॥१५॥स्वस्तिदाविशस्पतिर्वृत्रहा
विम्रधोवशी॥वृषेंद्रःपुरएतुनःस्वस्तिदाअभयंकरस्वाहा॥इंद्राया
भयंकरायेदं॥१६॥गणानांत्वागणपतिꣳहवामहेकविंकवीनामुपम
श्रवस्तमं॥ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूतिभिःसीदसा
दनꣳस्वाहा॥गणाधिपतयइदं॥१७॥जातवेदसेसुनवामसोममरातीय
यतोनिदहातिवेदः॥सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः॥९
स्वाहा॥जातवेदसइदं॥१८॥ब्रंह्मप्रतिष्ठामनसोब्रह्मवाचोब्रंह्मयज्ञा

नाऽहविषामाज्यस्य ॥ अतिरिक्तंकर्मणोयच्चहीनंयज्ञःपर्वणिप्र ॥ तिरंन्ने
तिकल्पयंत्स्वाहा ॥ कृताकुरेतुदेवांत्स्वाहा ॥ ब्रह्मणेइदं० ॥ १९ ॥ आश्राविलमत्या
श्राविलंवषट्कृतमस्यन्नृत्तंचयज्ञे ॥ आरतिरिक्तं० ॥ देवांत्स्वाहा ॥ ब्रह्मणेइदं० ॥ २० ॥
यद्वोदेवातिपादयानिवाचाचित्प्रयतंदेवहेडनं ॥ अरायोअस्माँऽअभिदुच्छुनाय
तेन्यत्रास्मिंन्मरुतस्तंनिधेतनस्वाहा ॥ अग्नीमरुद्भ्यःइदं० ॥ २१ ॥ भूर्भुवःस्व
स्वाहा ॥ प्रजापतयइदं० ॥ २२ ॥ अदितेन्वमँऽस्थाः ॥ पूर्ववदुत्तरंपरिषिच्य ॥ अपरे
णाग्निंप्रणीताआसाद्यापआनीयतूष्णींऽहस्तेनप्रागादिपंचदिक्षुत्क्षिच्य ॥
शिरसिमार्जइत्वापालियांजलोभूशेषंनिनीयब्रह्मणेदक्षिणांदत्वापरिस्त
रणमुत्तरेविसृजेत् ॥ छ ॥ अग्निमुखप्रयोगंसमाप्तः ॥ सरबंधप्रयोगः ॥

प्राणानायम्य॥ तत्कर्मांगभूतं सरबंधं करिष्ये इति संकल्प्य॥ कांस्यपात्रे तंडुला
निक्षिप्य॥ तंडुलोपरि द्वादशांगुलायामात्रिवृत्कृतकार्पाससूत्रद्वयेन संयुक्तं कं
॥१०॥ बलसूत्रद्वयं पुष्पाणि फलानि अग्निहोत्रस्य रक्षां हरिद्रां च निक्षिप्य॥ तत्पात्रं स्ववर
स्य पुरतो निधाय॥ चषकाख्यां सब्रह्मकूर्चं गव्यं हरिद्रादिमंगलद्रव्याण्यादायापो हि
ष्ठेति तिसृभिर्हिरण्यवर्णा इति तिसृभिः॥ पवमानः सुवर्जन इत्यनुवाकेन विष्णो
नुकमित्यनुवाकं शेषेण रक्षोहणं वलगहनमित्यादि प्रकृतिः सामान्यं तेनानुवाकेन॥ वा
महाँ इन्द्रो वज्रबाहुरित्याद्यापाप्मानमित्यंतेनानुवाकेन सोमा इन्द्र इत्यनुवाकेनाग्नि
रायुंषि पवस इति पंचभिः श्वेतो प्रोक्ष्य॥ समाहितं ततं तुनं गुष्ठापकनिष्ठिका भ्यां पात्रस्थ
हरिद्रया भस्मना वा त्र्यंबकमंत्रेण मंत्रावृत्त्या त्रिरुन्मृज्य ततो वरस्य दक्षिणहस्तेन मुष्टि ॥१
मा पात्रस्थ तंडुलासंगृह्य मुष्टिं पात्रमेव कृत्वा॥ तटस्थ ब्राह्मणेन वा॥ विश्वेतालेस

वनेषुप्रवाच्यायास्वकर्थम घवंमिद्दमुच्यते॥पारावतंयपुरूसंभुतकःस्वपार्श्वणेज्ञरभाय
ऋषिबंधवे॥इत्यस्यादक्षिणेकरेकंकणंसार्द्ध कंबंधये॥वीन धागहीततंडुलेपात्र
स्यवामाकरे॥ब्रह्मसामक्षत्रमद्धधवाशियंत्रिष्टुभौजः शुभितमुग्रवीरं॥इन्द्रसोमे
नपंचदशेनमध्यामिदेवातेनसगरेणरक्षतिकंकणंबध्वाभयत्रयंथेकपरिलला
टेस्वतारक्षांविनिक्षिपेत्सतुष्यांमिशिमेदृनिवादृस्नानिंत्यासंपर्वबल्लत्वा॥कंक
तेनकंकलोद्योमलीनकंकलः॥द्वाविंतिपुषीइति स्याअदृष्टाअलिप्सेताइति
मंत्रेणकंकणंमोनयांस्यघरक्षांलुनकदाचन॥मेरक्षास्थिराकृत्वादेवचं
गछकंकणेति॥पुराणंच॥देवसंनिधोमोनयेपदुपायनेतुब्रह्मसोम
येतिबंधयेत्तुयोमिवमोवर्षादिनरकमिममपरेसोनमोक्तोन॥श्राध
इतिसरबंधनसमाप्तः॥ ॥अथगर्भाधानंकेतुस्नानायांस्त्रीया

विष्णोश्च विष्णुश्च सर्वे चिंतते प्रजापतिः ॥ पुरतः प्रस्तरस्थाने तूष्णीमासादयन्ततः ॥
पूर्णपात्रं ततस्तस्य आप आनीय मार्जयेत् ॥ हस्तेनामंत्रकं तत्र प्रागादिषु च पंचसु ॥
दिक्षु संमार्जनं कृत्वा तच्छेषमवनौ क्षिपेत् ॥ भूयिष्ठमेव तत्तोयं शिरसि प्रोक्षयेत्पु
तः ॥ भार्याया अंजलौ शेषं निनीय प्रयतो द्विजः ॥ ब्रह्मणे दक्षिणं दत्वा तन्मुखाद्यस्य
स्वशक्तितः ॥ इति श्रीपंजलेशिंगैयसूरिविरचितायां प्रयोगपद्धतौ अग्निमुखं ज
यादिश्च समाप्तः ॥ श्रीविरूपाक्षाय नमः ॥ अथ गर्भाधानं उच्यते ॥ ऋतुस्नातायां शु
भेहनि दंपती मंगलस्नातौ भूत्वा ॥ रात्रौ पुण्याहं वाचयित्वा ॥ पत्नीं दक्षिणत उपवेश्य ॥
स्वयमुत्तरत आसीनः ॥ प्राणानायम्य ॥ विशिष्टायां शुभतिथौ ॥ मम पत्न्याः गर्भाधानं
[illegible] करिष्य इति संकल्प ॥ तथा ॥ संस्कारकस्तु सर्वत्र तिष्ठेदुत्तरतः सदा ॥ संस्कार्यः ॥
पुरुषो वापि ॥ स्त्री वा दक्षिणतः सदा ॥ इयं च व्यवस्था भणीति कपर्दिप्रमुखैरिह ॥ स्मार्तक

(२७ मेसुसर्वत्र तस्माद्देवंहि कारयेदिति॥ तस्मादेवं कृत्वा॥ विष्णुर्योनिं कल्पयतु त्वष्टा रूपा
णि पिंशतु॥ आसिंचतु प्रजापति धाता गर्भं दधातु ते॥ गर्भं धेहि सिनीवालि गर्भं
धेहि सरस्वति॥ गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ॥ हिरण्ययी अरणी यं निर्मंथतो
अश्विना॥ तं ते गर्भं हवामहे दशमे मासि सूतवे॥ यथेयं पृथिवी मही तिष्ठंती गर्भ
मादधे॥ एवं तं गर्भमाधत्स्व दशमे मासि सूतवे॥ यथा पृथिव्यग्निगर्भा द्यौर्यथेंद्रेण ग
र्भिणी॥ वायुर्यथा दिशां गर्भ एवं गर्भं दधातु ते॥ विष्णोः श्रेष्ठेन रूपेणास्यां नार्यां गवीन्यां॥ पुमा
ंसं गर्भमाधेहि दशमे मासि सूतवे॥ नेजमेष परापत सुपुत्रः पुनरापत॥ अस्यै मे पुत्रकामायै ग
र्भमाधेहि यः पुमान्॥ यस्य योनिं प्रति रेतो गृहाण पुमान्पुत्रो धीयतां गर्भे अंतः॥ तं माता दशमा
सो बिभर्ति स जायतां वीरतमः स्वानां॥ आ ते गर्भो योनिमेतु पुमान्बाण इवेषुधिं॥ आ वीरो जायतां
पुत्रस्ते दशमास्यः॥ करोमि ते प्राजापत्यमा गर्भो योनिमेतु ते॥ अनूनः पूर्णो जायतामश्लोणो (२७

प्रपितामहपितामहपितरः॥ गोत्राः॥ नारायणगोविंदमाधवशर्मणः॥ नांदीमुखाः॥
पित्राचिद्धीतः॥ पुमांस्ते पुत्रो नारि तं पुमाननुजायतां॥ यानि भद्राणि बीजान्यृषभा जनयंति नो॥
तानि भद्राणि बीजान्यृषभा जनयंति नः॥ तैस्त्वं पुत्रान्विंदस्व सा प्रसूर्धेनुका भव॥ कामः सम
ध्यतां मह्यमपराजितमेव मे॥ यं कामं कामये देव तं मे वायो समर्धय॥ इत्येतैर्मंत्रैः॥ पत्नी
मभिमंत्रिय॥ तया संभोगं कृत्वा॥ तदानीमाभ्युदैकं कर्म कर्तव्यमफलत्वात्॥ परेद्युराभ्युदे
कं कुर्यात्॥ तथा॥ गर्भाधाने विवाहे च पुंसवने जातकर्मणि॥ नामोपाकर्मस्नानेषु व्रतेषु च समा
पने॥ ब्राह्मणान्भोजयेदत्यैवाचयेदाशिषस्तथा॥ सीमंतोन्नयने चैव अन्नप्राशननिचौल
योः॥ उपायने च गोदाने आद्यश्वेवं विशेषतः॥ इति किंच॥ विवाहे कन्यकायाश्च वरस्यापि
गृहे पिवा॥ नांदीश्राद्धं तु पूर्वेद्युर्वरस्य स्मृतिशासनं॥ अन्यत्र॥ सर्वाधिकारकर्मभ्यः पूर्वेद्यु
सद्य एव च॥ ब्राह्मणान्भोजयेदिष्टो हिरण्येनोदकेन च॥ इति कपर्दिभ्यः॥ प्राणानायम्य॥ म
मपत्न्या गर्भाधानांगभूतं॥ आभ्युदैकं करिष्ये॥ तत्र वेदताः॥ प्रपितामहपितामहमात
रः॥ काश्यपगोत्राः॥ नांदीमुखाः॥ सत्यवसुसंज्ञिका विश्वेदेवाः अन्नद्रव्यं श्राक ल्यकाकि

धिरिति ॥ संकल्प्य यदि पार्वणं कुर्यात् ॥ तर्हि पार्वणविधिरिति संकल्प्य ॥ मंडले
कृत्वा ॥ सत्यवसुसंज्ञिका विश्वेदेवा इदं वां पाद्यं ॥ प्रपितामहिपितामहिमातरः ॥ गोत्राः ॥ इदं वां पा
द्यं ॥ प्रपितामहिपितामहिपितरः ॥ इदं वां पाद्यं ॥ मातुः प्रपितामह मातुः पितामह मातामहाः ॥
पत्निकाः ॥ गोत्राः ॥ उभाभ्यां इदं वां पाद्यं ॥ द्वयोर्द्वयोः पादान्प्रक्षाल्य सर्वान् प्राङ्मुखानुपवेश्य ॥
सत्यवसुसंज्ञिकानां इदमासनं ॥ प्रपितामहिपितामहिमातॄणां ॥ इदमासनं ॥ प्रपितामह
पितामहिपितॄणां ॥ इदमासनं ॥ मातुः प्रपितामह मातुः पितामह मातामहाः सपत्नीकानां ॥ इ
दमासनं ॥ द्व योर्द्वयोः ॥ दक्षिणं एवासनं कृत्वा ॥ चर्येत् ॥ सत्यवसुसंज्ञिकानां मर्चइत्वा ॥ य
थाविधिः ॥ उपायने च गोदाने आदावेव विशेषतः ॥ विश्वेवा सत्यवसू अर्चइत्वा ॥ यथाविधिः ॥
मातुश्राधं तु पूर्वं स्यात् पितॄणां तदनंतरं ॥ ततो मातामहानां तु वृद्धिश्राधं त्रयं स्मृतं ॥
नांदीमुखे विवाहे च प्रपितामहपूर्वकं ॥ नामसंकीर्तयेद्विद्वानन्यत्र पितृपूर्वकं ॥

अस्मद्रूपं तिलांदर्भान्‌ पसव्यं तथैव च ॥ नांदीश्राद्धं त्यजेद्विद्वान्‌ वृद्धिश्राद्धं तु
सर्वदः ॥ एभ्य एव पितादद्यात्तेभ्यो दद्यात्स पितकः ॥ इति कपर्दी ॥ एवमर्चयित्वा ॥ ब्राह्म
णान्‌ भोजयेत्‌ ॥ यदि पार्वणं कुर्यात्‌ ॥ तर्हि दध्याक्षतबदरीफलमिश्रोदनपार्वणं कु
र्यात्‌ ॥ स्वधां वाचयिष्य इत्युपस्थाने स्वाहां वाचयिष्य इत्युक्ता ॥ इडा देवहूर्मनुर्यज्ञनीः ॥ ड्रो
भायेपितरो नुमदन्तु ॥ इत्यादि जपेत्‌ ॥ एतत्सर्वथास्मच्छन्दवस्वादिरूपतिलदर्भास्व
धाकारप्राचीनावीति ॥ वर्जं कुर्यात्‌ ॥ तथा ॥ अस्मद्रूप तिलांदर्भान्‌ पसव्यं तथैव च ॥
नांदीश्राद्धं त्यजेद्विद्वान्‌ वृद्धिश्राद्धं तु सर्वदेति ॥ यदि जीवपितृकस्यात्तर्हि पितुः प्रपिता
महादिभ्यो दिश्यां कुर्यात्‌ ॥ तथा ॥ एभ्य एव पितादद्यात्तेभ्यो दद्यात्स पितकः ॥ इति ग
र्भाधानसमाप्तः ॥ अथ पुंसवनमुच्यते ॥ पत्न्या गर्भे व्यक्ते सति ॥ तृतीये मासि शु
भलग्ने पुण्यनक्षत्रे ज्योतिर्विदुक्तपुण्यनक्षत्रे वा सीमंतेन सह वा कुर्यात्‌ ॥ तथा ॥ कारि
कावृत्तौ ॥ व्यक्ते गर्भे द्विजातीनां कुर्यात्पुंसवनक्रियां ॥ तद्दिने शुभे लग्ने सीमंतेन स

२९

ब

हापिवा॥कृत्वापुंसेनं पश्चात्सीमंतस्तत्रक्रमात्॥इति॥अयमेवमुख्यपक्षः॥
त्रिविस्वामिमतत्॥व्यक्तेगर्भेपुंसवस्यात्स्पन्दमेवान्वनीयके॥एवंमुख्यकाल
स्यसप्ताष्टमचतुर्थकाः॥सीमंतस्यास्यकालेवाजायतेपुंसवंयदी॥एव
त्गृह्यभाष्यकारसंमतं॥इति॥प्रकृतमनुसरामः॥तत्रपूर्वेद्युराभ्युदैकं
कृत्वा॥किंच॥सर्वेर्धिकमेकमेध्यः पूर्वेद्युःसघृएववा॥ब्राह्मणान्भोजये
दृष्टौहिरण्यनांदिनेनवेति॥ततोमंगलनौभूत्वापुण्याहंवाचयित्वोपस्कृत्वा
धा॥लीदक्षिणतउपवेश्यास्वयमुत्तरतःओंसीनःप्राणानायम्या॥ममपत्न्याः
प्रथमेगर्भसंस्कारद्वारासर्वेगर्भसंस्कारार्थंपुंसवनाख्यंकर्मकरिष्ये॥
इतिसंकल्प्या॥दंपतीकंकणंधारयेतां॥कथं॥विश्वेत्तातेसवनेषुप्र

२९

वाच्या।। याव कृथं मघवन्निंद्रस्त्वं तं ते।। पारावतं यत्पुरुसंभृतं वसुस्यपावृणोः शारभा

यत्रृषिबंधवे।। इति पुरुषो दक्षिणहस्तेन धारयेत्।। बृहत्साम क्षत्रभृद्वृहद्धृष्टिय्यं

त्रिष्टुभोजः शुभितमुग्रवीरं।। इंद्रस्तोमेन पंचदशेन मध्यमिदं वातेन सगरेण र

क्ष।। पत्न्याः वामकरे स्त्रीणां।। बृहत्सामेति बंधनं।। विवाहमौंजीस्नानेषु पुंस

सीमंतयोरपि।। स्नाताभिषेके चौलेषु सरबंधो विधीयते।। एवमुक्तेषु मंत्रेषु दंप

त्योः सरबंधनं।। मौंजीबंधो रवस्थ्यवे मुनिभिः प्र रिकीर्तितः।। प्रक्षाल्या

ल पसीसूत्रं पवमानादिमंत्रकैः।। पात्रं तं तु सं रपूर्णं निदध्याद्यादतः परं।। इती।। सनक्ष

त्रे च सावेच कांचनेन कृतेन वा।। स्थूलमुक्ताफलस्यैतन्माल्यं वस्त्रेर्रलंकृतं।। इति

कंकणं धृत्वा।। उक्तप्रकारेण स्थंडिलं कृत्वा।। औपासनाग्निं प्रतिष्ठाप्य।। दर्व्या

ज्यस्थाल्यावित्ति।। षट्पात्राणि प्र पुंज्याफलसहितवटशा रवोदषदुप ले

श्रौ०गा० स्वनन्नु तव-स्त्रे ॥ सकृत्स्रपुंज्यातु ॥ प्रोक्षणपात्रादिसंस्काराद्याज्यभागांतिकृ
३० त्वा ॥ स्रुचाज्यमादाय ॥ धातादद्रातु नो रयि । मीशानो जगतस्पतिः ॥ स नः पू
र्णेन वावनत्स्वाहा ॥ धात्र इदं ॥ धाता प्रजाया उत राय ईशे धातेदं विश्वं भुवनं
जजान ॥ धाता पुत्रं यजमानाय दाता तस्मा उ हव्यं घृतवद्विधेम स्वाहा ॥ धात्रे ॥
धाता ददातु नो रयिं प्राचीं जीवातुमक्षितां वयं देवस्य धीमहि सुमतिं सत्य
राधसः ॥ स्वाहा ॥ धात्रे० ॥ धाता ददातु दाशुषे वसूनि प्रजाकामाय मीढु
षे दुरोणे ॥ तस्मै देवा अमृताः संव्ययंतां विश्वेदेवासो अदितिः सजोषाः स्वाहा ॥
धात्र इदं ॥ यस्त्वा हृदा कीरिणा मन्यमानो मर्त्यं मर्त्यो जोहवीमि ॥ जातवेदो
यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम् ॥ स्वाहा ॥ अग्नये इदं ॥
यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनं ॥ अश्विनं स पु

त्रिलं धीरवंतं सोमं नन्न २ रयिंन शतेस्व वीरिं ॥ स्वाहा ॥ अग्नयेइदं ॥ त्वेसुपुत्र श
वसो वृत्रं न्का॰ मकानय: ॥ नत्वामिंद्रातिरिच्यते स्वाहा ॥ इद्रायाइदं ॥ उक्थ्य उक्थे
सोम इंद्रं ममादन्नीथे नीथे मघवानं २ सुतास: ॥ यदीं २ सबाध: पितरंन पुत्रा: समानद
क्षा अवसे हवंते स्वाहा ॥ इंद्राय इदं ॥ इति देवतानुक्रमैकायां ॥ धातादि मंत्रे पुस एव ता
धाताय स्या द्वे ये ग्नि स्तत उत्तरत्र ॥ द्वयेन वे दिं द्रष्टु इति प्रसिध्द इति ॥ आज्यावा
ज्याहुती कुर्त्वा ॥ मध्यमं परिधिमग्नौ प्रहृत्य दक्षिणोत्तरै: परिधिमग्नौ प्रहरेत् ॥
उत्तरपरिधि उत्तरार्धमंगारेषु पोह्य परिधिनभिमंत्र्य आधार समिधौ प्रहृत्य ॥
स्त्रुचि स्त्रुवस्याग्रं निधाय ॥ ज्याकुर्त्वा ॥ विश्वेभ्यो देवेभ्य: सं२स्त्राव भागेभ्य: ॥ सं२स्त्रा
वभाग इदं न मम इति त्यागं कृत्वा ॥ ब्रांह्मणो दक्षिणां दत्वा ॥ विसृज्य ॥ अनुद्धृतर
जसा कुमार्या फठ्ठसहित वटस्याखा प्रेषयित्वा ॥ वस्त्रे शनि धायां गुष्ठतर्जनी

श्रिं.ग. ध्यांगृहीत्वाग्नेः पश्चात्पत्नीमुत्तानां रम्युखं कृत्वा ।। पुंसुवनमसीत्यनेन पञ्चषापत्न्या द
२१ क्षिणेन नासिकाछिद्रे रसं निनयति पत्नीं तरसा गर्भपर्यन्तं गिरयति ।। कर्मणः पुण्या
हं वाचयित्वा ।। नं कृत्वा ।। अभ्युदैकं कुर्यात् ।। इति पुंसवनं समाप्तम् ४ ।। ।। अथ सीमंतो
नयनमुच्यते ।। गर्भो स्थिति प्रथमात् षष्ठाष्टमे वा सीमंतोनयनं कुर्यात् ।। त
था ।। याज्ञवल्क्यः ।। षष्ठाष्टमे वा सीमंतो मास्येते जातकर्म च ।। ग्रंथांतरे सम
प्ता वै च तु मासोपि गृह्यते ।। एतत् सीमंतसकृदेव ।। न प्रतिगर्भं ।। तथाह हारीतः ।।
सकृत्संस्कृता संस्कारं ।। सीमंतेन स्त्रियो यदा ।। अयं गर्भप्रसुप्ते स सर्वसंस्कृतो भवे
त् ।। एतदष्टममासादूर्ध्वं न कर्तव्यं नवमे मासि सूतकागारप्रवेशस्यात्स्विहितत्वा
त् ।। अकृतसंस्कारा यदि प्रसूयेत तदा गृहीतपुत्रा संस्कर्तव्याः ।। तथा च सत्यव्रतः ।।
।। स्त्री यदा संस्कारा प्रसूयेत कथंचन ।। गृहीतपुत्र विधिवदेतत् संस्कारमर्हति ।। २१

०॥ आपस्तंबः॥ अस्य कार्यो द्वयं वापि बंह्वोवायस्य पत्नं नः॥ सीमंतं पुंसवनं चैव संस्
कृत्यो विधीयते॥ इति तस्य प्रयोगः॥ शुभेहनि दंपती मंगलस्नानौ कृत्वा पुण्याहं
वाचइत्वा॥ प्रातरौपासनं कृत्वा॥ प[illegible]त्नीद[illegible]क्षिणतउपवेश्याद्दंपती मंगलस्ना ग
नौ कृत्वा पुण्यावाचइत्वा॥ स्वयमुत्तरत आसीनः प्राणानायम्या॥ मम पत्न्याः प्र
थमगर्भसंस्कारद्वारा सर्व[illegible]र्भसंस्कारार्थं॥ सीमंताख्यं कर्म करिष्य इति संकल्प्य॥
उभौ कंकणे हुष्ट्वा॥ अभ्युदैकं कृत्वा पूर्ववदौपासनाग्निं प्रतिष्ठाप्य॥ दर्व्याज्यस्था
ल्या विलिषटपात्राणि प्रयुज्य॥ विरूढयवान्मालिकां कृत्वा लीमौदुंबरस्त्रासादर्भ
पुंजी लञ्छ्रश्च प्रयुंज्यादाज्यभागांतं कृत्वा॥ पत्नीमन्वारब्धायां पुंसवनोक्तक्र
मेण॥ धाताददातु नो रयिमिति च तस्रः क्षिप्रस्वाहृदाकीरिणोति च तस्रभिः
प्रतिमंत्रमष्टौ वाज्याहुतीर्हुत्वा॥ जयादि प्रंलखिसर्जनांतेऽग्नेः पश्चात्सती

प्राङ्मुखमुपवेश्यपत्न्याःशलल्यात्रिभिःपुंजीलैरौदुंबरशलाटुनाच॥भूर्भुवःस्
३२ वोराकामहꣳसुहवाꣳसुष्टुतीहुवेशृणोतुनःसुभगाबोधतुत्मना॥सी
व्यत्वपःसूच्याछिद्यमानयाददातुवीरꣳशतदायमुक्थ्यं॥यास्तेराकेसु
मतयःसुपेशसोयाभिर्ददासिदाशुषेवसूनि॥ताभिर्नोअद्यसुमनाउ
पागहिसहस्रपोषꣳसुभगेरराणा॥इतिपत्न्याःसीमंतमूर्ध्वमुन्नीय
यालेगायतमितिवीणागाथिनौसꣳशास्ति॥तौगायेयातां॥सोमएवन
इति॥सोमएवनोराजेत्याहुर्ब्राह्मणीःप्रजाः॥विवृत्तचक्रआसीनास्तीरे
णयमुनेतव॥इत्यस्योस्थानेसमीपनदीनिर्देशंकुर्यात्॥नदीनिर्देशंगा
येयातां॥अथपत्नीकंठेविरूढयवमालिकांनिधाय॥नक्षत्रोदयपर्यंतं ३२
दंपतीमौनिनौऋचालिष्ठेतां॥नक्षत्रोदयेसतिप्राचीमुदीचींवादिशमु

थ

पनिष्क्रम्या ।। वत्सस मंन्त्रस्य भूर्भुवः स्वरिति जपित्वा वाचं विसृजेत ।। इति । सी
मंतोंनयनं ।। अथ जातकर्मविधि ।। अ बार्हस्पत्य संहितायां ।। अथातः संप्रवक्ष्या
मि जातकर्मक्रियाशुभं ।। जातस्य विघ्ननाशाय निरोगत्वाय सर्वदा ।। दीर्घायुत्वा
य वा स्यैव सर्वसंपत्सम क्षये ।। जन्मनो स्याशुभस्यायोगा विनाशाय चिं
शोधनः ।। ब्रह्माण्डपुराणे ।। जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते ।। जाते कर्म
नथाकुर्याद्वाहूमप्युरयचसः ।। भांडूराभ्ते कृतानापुंसो जातकर्म विधीयते ।।।
व मंत्र प्राशनं कार्यं हिरण्य मधुसर्पिषां ।। दिवस्परीति यद्भूमेरापश्चा सं कुलितं
था ।। बहूनामपि मंत्रेण सर्वमन्यत्पृथग्भवेत् ।। जावापः ।। जन्मनोनंतरं कार्यं जात
कर्म यथाविधिः ।। देवादनी नैकालेंच दत्ता ते स्तूतकेन्तवेत् ।। विष्णुधर्मोत्तरे ।। अच्छिं
ने नाभ्यां कर्तव्यं श्राद्धं वै पुत्रजन्मनि ।। अशुचौ परमेकार्यं अथान्वानि पथात्म
क्षिः ।। इति स्यक्रमः ।। कुमारे जाते सति ।। अस्य कुमारस्य जातकर्म करि
त

२२ थ इति संकस्या ॥ दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः ॥ तृती
यमप्सु नृमणा अजस्रमिंधान एनं जरते स्वाधीः ॥ विद्मा ते अग्ने त्रेधा त्रयाणि
विद्मा ते धाम विभृता पुरुत्रा ॥ विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आ
जगंथ ॥ समुद्रे त्वा नृमणा अप्स्वंतर्नृचक्षा ईधे दिवो अग्न ऊधन् ॥ तृतीये
ग त्वा रजसि तस्थिवांसमपामुपस्थे महिषा अवर्धन् ॥ अक्रंददग्निः स्तनयन्निव द्यौः
क्षामा रेरिहद्वीरुधः समंजन् ॥ सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना
भात्यंतः ॥ उशिक्पावको अरतिः सुमेधा मर्तेष्वग्निरमृतो नि धायि ॥ इयर्ति
धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन् ॥ विश्वस्य केतुर्भुवनस्य
गर्भ आ रोदसी अपृणाज्जायमानः ॥ वीळुं चिदद्रिमभिनत्परायञ्जना यदग्नि
मयजन्त पंच ॥ श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगो २६
पाः ॥ वसोः सूनुः सहसो अप्सु राजा वि भात्यग्र उषसामिधानः ॥ यस्ते अद्य कृ

ण वद्भद्रशो चेपु यं देव धत्तन वं तम ग्ने प्रतरं नय प्रतरा वस्यो अच्छा ॥ भि द्युम्नं देवभ
क्तं यविष्ठा ॥ आ तं भज सौश्रवसेष्वग्न उक्थ उक्थ आ भज शस्यमाने [illegible] ॥
प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनदद्दुज्जनित्वैः ॥ त्वाम ग्ने यजमाना
अनु द्यून्विश्वा वसू नि दधिरे वार्याणि ॥ त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमु
शिजो विववृः ॥ दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः ॥ अग्निरमृ
तो अभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः ॥ इत्येतेनानुवाकेन [illegible] हिरण्यमभि
मंत्रिय ॥ अस्मिन्नहं सहस्रं पुष्याम्येधमानः स्वे वशे ॥ अनेन यजुषा हिरण्यमंक
उपवेश्य ॥ अंगादंगात्संभवसि हृदयादधिजायसे ॥ आत्मा वै पुत्रनामासि स
जीव शरदः शतं ॥ अश्मा भव परशुर्भव हिरण्यमस्तृतं भव ॥ पशूनां त्वा हिंका
रेणाभिजिघ्राम्यसौ ॥ कार्तिक ॥ इति श्रोत्र मंत्राभिमंत्रिया ॥ एताभ्यामेव मंत्राभ्यां
शिरो मूर्धन्यवघ्राय ॥ इमौ मंत्रौ दक्षिण कर्णो जपति ॥ अस्माभवे मैत्र्यासो
त्र

॥ शंगास्थानेतत्रजन्मनक्षत्रनामसंबुध्यानिर्दिशति॥ कृत्तिकारोहिणमार्गशीर्षार्द्रापुन
३४ र्वसोस्तिष्याश्लेषमाघफाल्गुनफाल्गुनहस्तचैत्रस्वातीविशाखानुराधज्येष्ठमू
लाषाढश्रावणश्रविष्ठशतभिषक्प्रोष्ठप्रोष्ठपदरेवताश्वयुजापभरणेतिवा॥ इ
तिनक्षत्रनामनिर्देशः॥ तथा॥ संग्रहकारिका॥ पारेवमत्येविबुद्धिरादौ मातेकुमा
रस्यवशात्तवायुज्य॥ एतेषुनामलोकपरस्तलोन्यसमौरदीर्घसविसर्गइष्यति॥ इति प्रो
ष्ठति॥ मेधांतेदेवः सवितामेधांदेवीसरस्वती॥ मेधांमेअश्विनौदेवावाधत्तांपु
ष्करस्रजा॥ त्वयिमेधांत्वयिप्रजांत्वय्यग्निस्तेजोदधातु॥ त्वयिमेधांत्वयिप्रजांत्व
यीन्द्रइन्द्रियंदधातु॥ त्वयिमेधांत्वयिप्रजांत्वयिसूर्योभ्राजोदधातु॥ इत्यादिकेनाभिमंत्राप्यां
ष्टाङ्कर्णेवाधा॥ सुवर्णधृतंतमुक्तंमधुकुमारंसकृत्वाप्राशयित्वा॥ सेनियेतानिरन्न प्राह
तैलाद्देहोमंचाभिवरुणा [illegible] स्यपशान्॥ अनागसंब्रह्मणेत्वाकरोमि [illegible] वेतेद्यावा ३४
पृथिवीउभेइमे॥ शंतेअग्निःसहाद्भिरस्तुशंद्यावापृथिवीसहौषधीभिः॥

शमंतरिक्षं सह वातेनानु ते शं तेच नस्सः प्रदिशो भवंतु ॥ यादेवीः श्चतस्रः प्रदिशो
वातपत्नीरभिसूर्यो विचष्टे ॥ तासांत्वाजरस आदधामि प्रयक्ष्म एतु निरृतिं
पराचैः ॥ अवोचि यक्ष्माद्दुरितादवर्त्यै द्रुहः पाशान्निरृत्यै चोदमोचि ॥ अहा अर्तिम
विदत्स्योनमप्यभूद्भद्रे सुकृतस्य लोके ॥ सूर्यमृतं तमसो ग्राह्या यद्देवा अमुंचं
नसृजंव्येनसः ॥ एवमिमं क्षेत्रियाज्जामिशंसाद्द्रुहो मुंचामि वरुणस्य पाशात् ॥
इति पंचमंत्रैः कुमारं सकृत्प्राशयित्वा ॥ भूस्वाहा भुवः स्वाहा सुवस्वाहा होंः स्वाहा ॥ इति
दधिमिश्रमाज्यं कांस्यपात्रे सकृत्प्राशयित्वा ॥ शेषमद्भिः संसृज्य गोबंधस्थाने निनीय ॥
मातेकुमारं रक्षोवधीन्माधेनुरत्यासारिणीः ॥ प्रियाधनस्य भूयाएधमाना स्वेवशे ॥
गृहे । इति मातुरंके कुमारमाधाय ॥ अयं कुमारो जरां धयतु दीर्घमायुः ॥ यस्मै त्वं स्तनं प्र
प्याय आयुर्वर्चो यशो बलं ॥ इति कुमारं मातुर्दक्षिणस्तनं प्राशयित्वा ॥ यद्भूमेर्हृदयं दिवि
चंद्रमसि श्रितं ॥ तदुर्विपश्यमाहं पौत्रमघं रुदं ॥ यत्ते सुशीमे हृदयं दिवि चंद्रम

शिंगा॰ वेदाहं तन्मेज्ञापतो ॥ वेदामतस्यनेर्भव यंमाहंपौत्रमघंरुदं ॥ इतिकुमारंमूर्ध्नावभिमृ
२५ श्य ॥ नामयति नरुदति यत्रवयंवदामसियत्रचाभिमृशामसि ॥ इति तत्र संविष्टं कुमा
रमुपस्पृश्य ॥ आपः सुप्तेषु जाग्रत रक्षांसि इतोनिरितो नुदध्वं ॥ इति शिशोः शिरः स
मीपे उदकुंभं निधाय ॥ तत्राग्निं प्रतिष्ठाप्य ॥ परिस्तीर्य फलीकरणमिश्रान् सर्षपा
नंजलिना सकृदवदाय ॥ तिष्ठं जुहुयात् ॥ अयं कलिं पतयंतं श्वानमिवोद्धृतं अ
जावासिनामिव मरुतः पर्याध्वं स्वाहा ॥ मरुद्भ्यः इदं ॥ शेषं हुत्वा तच्छेषण स्वाहा
मरुद्भ्यः ॥ इति द्वितीयां हुत्वा ॥ पुनरप्यंजलिनादाय ॥ शंडेरघः शौंडिकेर उलूखलः ॥
च्यवनो नश्यतादितः स्वाहा ॥ मरुद्भ्यः इदमिति पूर्ववद्धुत्वा ॥ स्वाहा ॥ मरुद्भ्यः
स्वाहा मरुद्भ्यः इतिद्वे ॥ पुनरंजलिनादाय ॥ अयः शंडो मर्क उरुवीर उलूखलः ॥
च्यवनो नश्यतादितः स्वाहा ॥ मरुद्भ्यः इदमिति पूर्ववद्धुत्वा ॥ पुनरंजलिनादाय ॥ के मदि
शिनीश्वलोमिनीः खजापोजोपकाशिनी ॥ अपेत नश्यतादितः स्वाहा ॥ म २५

तो

रुद्रस्य: इदमिति ५ पूर्ववद्धुत्वा ।। पुनरंजलिनादाय ।। मिश्रवाहसः कौबेरकारक्षोराजे
न प्रेषिता: ।। ग्रामंडू सुजान यौगधंतीत्वं वौफलिनाकृतांस्वाहा ।। मरुद्भ्य: इदमि
ति ६ पूर्ववद्धुत्वा ।। पुनरंजलिनादाय ।। एना भ्रतेनांना हृीनेत्स्यमंत्रेस्नणस्पुत्र: ।।
तानग्नि: पर्यसरत्तानिंद्रस्तान्ब्रहस्पति: ।। नानहं वेदब्राह्मणा: प्रमशान: कुटदंता
न्विकेशालंबनस्तानास्वाहा ।। पूर्वदिषा ।। नपितृसुचैश्राव्यकर्णक: ।। मानीत्तघ रि
न्यासर्पतिग्रामेमिथुरमिघंतीघंनोफुलिनाकृतांस्वाहा ।। मरुद्भ्य: पूर्ववद्धुत्वा
।। पुनरंजलिनादाय ।। निशीथ्याचारिणीप्रच्छितेकुलं ।। यास्वपंतंबोधयतितस्य
विजानायामन: ।। तास्स्वसालंकृष्ववर्त्मनेक्को भानंडूहृदयं यकृत् ।। अग्नेअक्षीलि
निर्दहस्वाहा ।। अग्नये ६ इदं ०।। स्वाहा ।। अग्नयेइदं ।। इतिद्विर्जुहुयात् ।। इत्सम्बा
वाज्याहुतीस्तिष्ठंषिजुहुयात् ।। देवतानुक्रमिणकायां: ।। ज्ञानम्नहोमेमरुतम्न
स। सामाद्येषुपञ्चादपिचाष्टमेग्निरिति ।। ततोऽहिरण्येनाभ्युदेकंकुर्यात् ।। ततो

शिगा० ग्रहापात्रान् प्रविष्टे प्रविष्टे तूष्णीमग्नौ फलीकरणमिश्रान् सर्षपानावपनेति संज्ञा
२९ स्ति ॥ एवं तेपि तथा कुर्युः ॥ सूतनिकेर्गमपर्यन्तं प्रतिदिनं सायंकालि मिसाद्दं कुर्यात् ॥
इति जातकर्मविधिः ॥ अथ नामकरणं ॥ तत्र विधिः ॥ तथा ॥ भविष्योत्तरपुराणे जात
प्र कर्मदिने कार्यं गुह्यके वै नाम दैवत् ॥ प्राशनं कर्तव्यं दिने षेकादशे दिषु ॥ धर्मशास्त्रे ॥ म
नीषिति गृह्यपरिशिष्टात् ॥ त्रिविधं नाम विख्यातं नक्षत्रं गुह्यमेव च ॥ व्यावहा
रिकं चेति धर्मक्तिः ॥ इति नामकरणकालः ॥ इति भविष्योत्तरपुराणे ॥ नामधेयं
द्वैत दशम्यां तु ॥ केचिद्दिपार्थिवा ॥ द्वादश्यामपरे रात्रौ मुनिपुङ्गव तथापरे ॥ अष्टादशेऽह
नि तथा वदंत्यन्ये मनीषिण इति ॥ तत्कालातीतदिनानि शो[illegible] ध्यं ॥ तथ विष्णु
धर्मोत्तरे ॥ अथवाप्याग वश्रेष्ठदिने पूततलक्षणे ॥ मद्विधेषु च ऋक्षेषु नाम ॥ कर्मवि
धीयत इति ॥ केचिन्मासाह्ना मापि कुर्यादित्याहुः ॥ प्रकृतमनुसरामः ॥ जन्मप्र कद्धि
त्ये कादशेऽहनि मातापितरौ उपविश्य ॥ पुंण्याहं वाचयित्वा ॥ प्राणानायम्या ॥ २९

ममपुत्रस्यनामकर्म करिष्य इति वा करिष्य इति संकल्प्य ॥ शिशु मार्गशीर्षादि मासेषु यस्मि
न्मासि जातानाः ॥ तन्मासेनामपूर्वं दत्वा ॥ पश्चादिष्टानादद्यात् ॥ मा~सनामादि
कानि ॥ कृष्णोनंतोच्युतश्चक्री वैकुंठोथजनार्दनः ॥ उपेंद्रो यज्ञपुरुषो वासुदेवस्त
था हरिः ॥ योगीशः पुंडरीकाक्षो मासनामान्यनुक्रमात् ॥ इत्येतेषु नामसु एकं
दत्वा ॥ ~शुमहेश्वरनामासि इत्यादि समासान्तमेकं नाम दद्यात् ॥ कुमार्यस्तद्धितं ॥
~समासान्तं नामादद्यात् ॥ अभ्युदैकं कुर्यात् ॥ इति नामकरणं ॥ पितासर्व
दाप्रवासादेत्य ॥ अंगादंगात्संभवसि हृदयादधिजायसे ॥ वेदोवैपुत्रनामासि स
जीव शरदः शतं ॥ अश्माभव परशुर्भव हिरण्यमस्तृतं भव ॥ पशूनां त्वा हि
करेणाभिजिघ्रामि महेश्वरनामन् ॥ ॥ इति दक्षिण्यां पुत्रमभिमंत्र्य ॥ तस्य मू
र्धानमवघ्राय ॥ अग्निरायुष्मान्स वनस्पतिभिरायुष्मांस्तेन त्वायुषायुष्मंतं करो
मि ॥ सोम आयुष्मान्स ओषधीभिरायुष्मांस्तेन त्वायुष्मंतं करोमि ॥ यज्ञ

शि.ग. ०॥ आयुष्मांत्सदक्षिणाभिरायुष्मतेनत्वापुषा युष्मतं करोमि ॥ देवा आयुष्मंतस्तेऽमृतेना यु
३८ ष्मंतस्तेनत्वा पुषयुष्मंतं करोमि ॥ पंच मंत्रान् पुत्रस्य दक्षिणे कर्णे जपति ॥ सर्वस्मा
दात्मनः संभूतासि सजीवशरादः शतं ॥ इति पुत्रमभिमंत्रयेत् ॥ इति नामकर्म ॥
विरूपाक्षाने गति ॥ अथ अन्नप्राशनं ॥ जन्मप्रभृति षष्ठमे मासि पूर्वेद्युराभ्युदयिकं कु
र्यात् ॥ परेद्युः पुण्याहं वाचयित्वा ॥ प्राणानायंम्या मम इमं कुमारं अन्नप्राशनेन कर्मणा
संस्करिष्ये इति संकल्प्या ॥ आभ्युदयिकं कृत्वा ॥ कर्मणः पुण्याहं वाचयित्वा ॥ शिशोर्दक्षि
ण हस्ते कंकणं बध्नियात् ॥ तथाविधिरलंकारिकाः ॥ षष्ठे मासि कृताभ्याध्ये वाचयित्वा
शिशो द्विजः ॥ मार्जयित्वा प्रतिसरं बध्नास्य विधिवत्क्रमः ॥ इति तत्रः ॥ स्वरपात्वोषधी
नांऽ संप्राशयामि शिवास्त आप औषधीनांऽ संप्राशया यः संत्वनमीवास्त आप कादि
औषधयः संतु महेश्वरशर्मन् ॥ भुवोपांत्वोषधीनांऽ रसंप्रशयामि शिवास्त आप औ
षधयः संत्वन। मीवास्त आप औषधयः संतु महेश्वरशर्मन् ॥ स्वरपात्वोषधीनांऽ ३८

रसं प्राशयामि शिवास्त आप ओषधयः संत्वनमीवास्त आप ओषधयः संतु मह्यं स्वरश
र्मन् ।। भूर्भुवः स्वः पालाशौषधीनां रसं प्राशयामि शिवास्त आप ओषधयः संत्वनमी
वास्त आप ओषधयः संतु मह्यं स्वरशर्मन् ।। इति दधिमधुघृतोदनान्नं संप्रा
शयेत् ।। इत्यन्नप्राशनं ।। अथ पाहित्रयोदशहोमः ।। यद्येतानि गर्भाधानादिकर्माणि
तत्कालेषु न कुर्यात् ।। तथा गृह्यप्रायश्चित्तौ ।। चोलदर्वाचीनं संस्कारलोपे संध्या
दिनित्यकर्मलोपब्रह्मचारिलोगःहीणो वा तल्लोपे च कृत्वा ग्रपणेन रसस्याग्निं प्र
तिष्ठाप्य पाहित्रयोदशहोमं कुर्यात् ।। तस्य प्रयोगः ।। एतत्कर्मलोपप्रायश्चित्तार्थं
पाहित्रयोदशहोमं करिष्य इति संकल्प्य ।। लौकिकाग्निं प्रतिष्ठाप्य ।। दर्व्याज्यस्थाल्यौ
प्रोक्षणी स्रुवा विति चत्वारि पात्राणि प्रयुज्याज्यसंस्कारांतेनाग्निं परिषिच्य ।। स्रुवा
ज्यं च तुर्गृहीतं गृहीत्वा ।। भूरग्नये च पृथिव्यै च महते च स्वाहा ।। अग्नये पृथि
व्यै महत इदं ।। भुवो वायवे चांतरिक्षाय च महते च स्वाहा ।। वायवेंतरिक्षाय म

शां गा० तेइदं०॥सुवरादित्याय च दिवे च महते च स्वाहा॥आदित्याय दिवे महते च स्वाहा॥इदं०॥
२८ पाहि नो अग्न एनसे स्वाहा॥पाहि नो अग्न एनस इदं०॥पाहि नो विश्ववेदसे स्वाहा॥
पाहि नो विश्ववेदस इदं०॥यज्ञं पाहि विभावसो स्वाहा॥यज्ञं पाहि विभावसो इदं०॥
सर्वं पाहि शतक्रतो स्वाहा॥सर्वं पाहि शतक्रतो स्वाहा॥इदं॥पाहि नो अग्न एकया॥
पाह्युत द्वितीयया॥पाह्यूर्जं तृतीयया॥पाहि गीर्भिश्चतसृभिर्वसो स्वाहा॥वस
व इदं०॥पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा॥पुनः पाहि विश्वतः स्वाहा॥अग्नये
इदं०॥सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया॥विश्वप्स्न्या विश्वतस्परि॥स्वाहा॥
अग्नय इदं०॥पुनरग्नये चेति तिस्रः हुत्वा॥अग्निं परिषिच्यानन्तराणि कर्माणि कुर्या
त्॥पाहि त्रयोदश होमाः समाप्ताः॥अथ चौलकर्मोच्यते॥जन्मप्रभृति तृतीये
वर्षे पुनर्वसु नक्षत्रे ज्योतिर्विदुक्त शुभलग्ने वा चौलं कुर्यात्॥तत्र पूर्वेद्युराभ्युदयिकं कृ गाहि
त्वा॥परेद्युः पुण्याहं वाचयित्वा कुमारं दक्षिणेनानडुहपवेश्य स्वयमुत्तरत आसीनः प्रा २८

णानापंम्या ॥ इमं कुमारं चौलेन कर्मणा संस्करिष्य इति संकल्प्याभ्युदेकं कृत्वाग्नि
बोवाचइत्वा ॥ उपनयनवत्सीमंतवत् ॥ इति मूलगृह्योक्तत्वात् ॥ कुमारं वौचैं इत्वा भोज
स्थंडिलं कृत्वाग्निप्रतिष्ठापनं कृत्वा ॥ दर्भास्थाविति षट्पात्राणि प्रयुंज्या ॥ यवकुशशमी
तोयोदकौंदुंबरशाखादर्शपुंजीलानडुहकृ[illegible]ल्प्या सीन्द्र क्षिप्राप्रापात्रोत्तरतः सप्त ६४
पुंज्या प्रोक्षणपात्रे संस्कारागाधाज्यभागांतेन्वारब्धायां ॥ धातादातुनो रयिं० ॥ वा
वनस्वाहा ॥ धात्रेइदं० ॥ धाताप्रजापाउतराय० ॥ धनवृद्धेमस्वाहा ॥ धात्रेइदं० ॥
धातादातुनोरयिं प्राचीं० ॥ सत्यराधसस्वाहा ॥ धात्रेइदं० ॥ धातादातुदाशुषे
वसूनि० सजोषस्वाहा ॥ धात्रेइदं० ॥ यत्स्वा हृदाकीरणामन्यमानः० अग्नेतत्वे
स्याः स्वाहा ॥ अग्नयेइदं० ॥ यस्मैत्वंसुकृतेजातवेद० रयिंनशतेस्वस्तिस्वाहा ॥
अग्नयेइदं० ॥ त्वेसुपुत्रशवसो वृत्रन्० ॥ नत्वामिंद्रतिरिच्यतेस्वाहा ॥ इंद्रायइ
दं० ॥ उक्थउक्थेसोमइंद्रंममादनीथे० अववतेहवंतेस्वाहा ॥ इंद्रायइदं० ॥

(कुमारःस्य शिरःकेशान् ॥ तूष्णीं विधिवत्कृत्वा ॥ ततः स्त्रीं दर्भानादाय ॥ शिरः प्रक्षुरः स्नानं तु धीय ॥
शि०गा० इत्यष्टावाज्याहुतीर्हुत्वा ॥ तपादीन् कृत्वा अग्नेः पश्चात्कुमारं कूर्चमुपवेश्य ॥ उष्णेन वा
२९ य उदकेनेह्यदिते केशान्वपन् ॥ इति कूष्णोदकं शीतोदके निनीय ॥ आपउन्दंतु जी
वसे दीर्घायुत्वाय वर्चसे ॥ ज्योक्च सूर्यं दृशे ॥ इति कुमारस्य शिर आर्द्रं कृत्वा ॥ त्र्या
शल्यान्या त्रिश्चिद्दर्भपुंजीलेरौदुंबरशाखया ॥ येनावपत्सविता क्षुरेण सोमस्य
राज्ञो वरुणस्य विद्वान् ॥ तेन ब्रह्माणो वपतेदमस्यायुष्मांजरदष्टिर्यथासदयमसौ
२ मन्त्रेश्वरशर्मन् ॥ इति पुंस्त्वाच्छिरः प्रवपे ॥ कुमारस्य माता ॥ तदभावे ब्रह्मचारी वा ॥
यवसहितमनडुह्कृतपिंडं गृहीत्वा ॥ दक्षिणतः स्थित्वा ॥ यक्षुरेण मर्चयता सुपे
शसावव्रावपसि केशान् ॥ शुंधि शिरो मास्यायुःप्रमोषीः ॥ इति वपंतमाचार्यमनु
मंत्रयते ॥ आचार्यस्त्वाक्रेशान् ॥ शकृत्पिंडे निधाय ॥ पुनः स्त्रीं दर्भानादाय ॥ पा०दि०
शिरोदक्षिणतोंतर्धाय ॥ येन पूषा बृहस्पतेरग्नेरिंद्रस्य चायुषेवपत् ॥ तेनास्यायु २९
षेवपसौश्लोक्याय स्वस्तये ॥ इति दक्षिणकेशान्वापइत्वा ॥ तान्केशान् शकृत्पिंडे निधाय ॥

पुनस्त्रींदर्भानाधाय ॥ शिरः पश्चानंतर्धाय ॥ येन भूयश्चरात्यं ज्योक्च पश्याति सू
र्यं ॥ तेनास्मा आयुषे वप सौश्लोक्याय स्वस्तये ॥ इति पश्चान्केशान्वापइत्वा ॥ तान्
केशान् शकृत्पिंडे निधाय ॥ पुनस्त्रीन्दर्भानादायोत्तरतोंतर्धाय ॥ येन पूषा बृह
स्पतेरग्नेरिंद्रस्य चायुषेवपत् ॥ तेन ते वपामि महेश्वरशर्मन्नायुषा वर्चसा यथा
ज्योक्सुमना असाः ॥ इत्युत्तरकेशान्वापइत्वा ॥ तान्केशान्शकृत्पिंडे निधाय ॥
क्षिपेत् ॥ ॐ कौर्यकेशान् ततो माता ब्रह्मचारी वा उत्थाप्य केशान्वरुणस्य राज्ञो बृहस्पतिः स
विता सोमो अग्निः ॥ तेभ्यो निधानं बहुधान्वविंदन्नंतरा द्यावापृथिवी अपः स्वः
इति केशसहितां सकृत्पिंडं उदुंबरमूले दर्भस्तंबे वा निदध्यात् ॥ ततः कुमारस्य
शिं शिरः प्रतिदिशं शिखा यथा ऋषि शिखा वा स्थाप्य ॥ शिखावर्जं सर्वान्केशान्वापइत्वा ॥
क्षु क्षुरं प्रक्षाल्य गूढं स्थापइत्वा ॥ तेन त्र्यहं कर्म न कुर्यात् ॥ ततो ब्राह्मणेभ्यो वरं दद्यात् ॥
वरशब्देन धेनुरुच्यते ॥ गौर्वा फलति परो न्य इत्युद्यापस्तंबेनोक्तं ॥ इति पंजले

शि.गा.० श्रृंगेयसूरिविरचितायां प्रयोगपद्धतौ चौलकर्म समाप्तं ॥ श्रीगुरवे नमः ॥ अथमु
८० पनेनमुच्यते ॥ तत्र गर्भाष्टमे वा ब्राह्मणमुपनीयत ॥ तत्राह याज्ञवल्क्यः ॥ गर्भा
ष्टमे वा ब्राह्मणस्योपनयनमिति ॥ आपस्तंबः ॥ गर्भाष्टमेषु ब्राह्मणमुपनीयेत्यादि
५ धर्मशास्त्रेत्यादिकान्युपनयनकालीनाह ॥ सप्तमे ब्रह्मवर्चसकाममष्टमायुष्का ५८
मं नवमे तेजस्कामं दशमेन्नाद्यकामं ॥ मेकादशेन्द्रियकामं द्वादशे पशुकाममि
त्यादि तत्रैव ऋतुमह ॥ वसंते ब्राह्मणमुपनीत ॥ ग्रीष्मे राजन्यमित्यादि ॥ ज्यो
तिषरत्नमालायां ॥ विप्रं वसंते क्षितिपं निदाघे वैश्यं घनांते व्रतिपं नीदध्यात् ॥
माघादिशुक्रांतिकपंचमासाः साधारणा वा सकलद्विजानां ॥ इति ॥ तत्राभ्युदैक
दिवसात्पूर्वदिवसरात्रौ ष्टाचारमनुसृत्य पुण्याहं वाचयित्वा ॥ कुमारस्य न सदि
वतंतुं यज्ञोपवीतं धृत्वा ॥ प्राणानायम्य ॥ इमं कुमारं उपनयनकर्मणा संस्कृ ८०
२ ष्यमाणः ॥ तदंगत्वेन आभ्युदैयकं करिष्ये ॥ यदि पूर्वं तस्य जातकर्मादि निनष्क्रियंते ॥

अस्य

इमं कुमारं जातकर्मनामकर्णान्नप्राशनचौलोपनयनाख्यैः कर्मभिः संस्करिष्यमा
णः ॥ इत्युक्त्वाभ्युदैकमेकमेव कुर्यात् ॥ तथा स्मृत्यर्थसारे ॥ गणशांतिक्रियमाणानां
तंत्रं वं न्मातृपूजनं ॥ नांदीश्राद्धं च पावेदैकं होमंत्राः पृथक् पृथगिति ॥ संकल्पयेत् कुमा
रस्य आयुष्याभिवृध्यर्थं इडावाचनं करिष्ये ॥ इत्युक्त्वा ॥ इडादेवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शंसिषद्विश्वेदेवाः सूक्तवाचः पृथिवीमातर्मामाहिंसीर्मधुमनिष्ये मधुजनिष्ये मधुवक्ष्यामि मधुवदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासं शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवंतु शोभायै पितरोऽनुमदंतु ॥ इति ब्रूयात्ततः ॥ परेद्युराभ्युदैकं कुर्यात् ॥ तत्राभ्युदैकं कर्तृनियमानाह ॥ उपनयनादिस्नानांतकर्म आभ्युदैकक्रियां ॥ पिता कुर्यात्तदूर्ध्वं तु परिणेता यथाविधि ॥ प्र
संगाद परो विशेषः ॥ नांदीश्राद्धं पिता कुर्यात् पुत्रीपुत्रविवाहयोः ॥ उत्तरेषु विवाहेषु स्वयं कुर्यात्
नांदिकं ॥ इति ॥ अपितृकस्य नांदीमुखदेवतानीयमाह ॥ असगोत्राः ॥ स्वगोत्रावा यव
समुदीरयेत् ॥ इत्यापः स्तंबः ॥ उपनीतो तु पित्रादेरभावेन्यां नियोजयेत् ॥ आचार्यपितर

स्तत्रवृध्दिःश्राधेतुदेवता॥इति॥एतदसमीचीनंनिमित्तानांतरेणापित्रादीनियोगात्॥माता
महादयोपनयनंकुर्यादितितदाचार्यः॥पितरएवनांदीश्राध्देदेवता॥आचार्यस्तास्विति॥तथानि
योगत्रकरूपत्वात्उपनयनकर्त्तास्तुपितैवोपनयेत्॥पुत्रान्॥तदभावेपितुःपितातदभावेपि
तुर्भ्राता॥तदभावेतिसोदरः॥इतिप्रकृतिमनुसरामः॥पूर्वेद्युराभ्युदैवंकृत्वा॥परेद्युः॥आ
चार्यःकुमारोमंगलस्नातोभूत्वा॥पुण्याहंवाचयित्वा॥कृतशौचमाच्छादिकौपीनंकुमारंदक्षि
णतउपवेश्य॥स्वयमुत्तरतआसीनः॥प्राणानायम्य॥एवंगुणविशेषणविशिष्टायांशुभतिथौ॥
ममइमंकुमारंमहेश्वरशर्माणंकुमारमुपनेष्यइतिसंकल्प्य॥कुमारस्यकंकणंबध्वा॥अग्निं
प्रतिष्ठाप्य॥आचार्यस्यप्रत्येकंकृच्छ्रत्रयंकुर्यात्॥तथाकारिकावृत्तौ॥आचार्यआदौस्वशरीरवृ
ध्दिंकृत्वा॥अथशिष्यस्यशरीरशुध्दिं॥कृच्छ्रत्रयेणप्रथमंयथावदग्निंसमारोप्यसंनिधः॥अहि
स्यः॥

इति केचिदुपनीतस्य कामचारवादभक्षणं प्रायश्चित्तमाहुः ॥ तथा ॥ विष्णुपुराणे ॥
भक्ष्याभक्ष्यं तथा पेयापेयं वाच्यावाच्यं तथानृते ॥ अस्मिन्काले न दोषः स्यात्संयावन्नोपनीय
ते ॥ जातकर्मण्यः ॥ ब्रह्मक्षत्रियविशाम वर्णो जीनबंधनात् ॥ स्यात्कामचारभक्षोक्तेर्म
ष्टते ॥ हतः पातकाद्दृते ॥ कामचारस्वेच्छागमनं कामचारदोषो म्लेच्छादसंभाषणं पर्युषितादि
भोजनं ॥ एतेष्वनुपनीतस्य महापातकं विना शेषो नास्ति ॥ मुनः ॥ ततः ॥ आभ्युदैकं
कृत्वा ॥ कर्मणः पुण्याहं वाचयेत् ॥ सोदकं कलशं तंडुलतांबूलफलपात्रेण ॥ पिधाय ब्री
ह्यादीषधीषु संस्थाप्य आचार्यः ॥ कर्मणः पुण्याहं वाचइष्य इति संकल्प्य ॥ ~~ॐ कर्मणे~~
ॐ पुण्याहं कर्मणोस्त्विति भवंतो ब्रुवंतु ॥ इति ब्राह्मणान्प्रार्थयेत् ॥ ते ब्राह्मणाः ॥ पुण्याहं
कर्मणोस्त्विति ब्रूयात् ॥ इति त्रिः ॥ पुनराचार्यः ॥ ॐ कर्मणः स्वस्ति भवंतो ब्रुवंत्विति ब्रू
यात् ॥ इति त्रिः ॥ ब्राह्मणाः ॥ ॐ स्वस्ति कर्मणोस्त्विति ब्रूयुः ॥ एवं त्रिः ॥ आचार्यः ॥

शिंगा॰

४२ मुखसमं कलशमुध्धृत्य॥ कुमारः स्यांजलौ पुण्याहसमृध्धिरस्तु॥ वर्षशतं पूर्णमस्तु॥ गोत्रा
भिवृध्धिरस्तु॥ दीर्घायुरस्तु॥ शांतिः पुष्टिः स्तु ष्टिश्चास्तु॥ शिवं शिवमस्तु॥ पुनरपि गोब्रां
ह्मणेभ्यः शुभं भवतु॥ इति उदकं निनयेत्॥ यत्र यत्र आशिषो वाचयते स्मृतं तत्र कर्मणः
पुण्याहं वाचयेत्॥ तथा॥ कारिकावृत्तौ॥ आशीरिति च पुण्याह स्वस्त्यर्थीति स्मृतं बुधैः॥ इति॥
ततः कुमारस्य त्रिसूत्रं प्रक्षिप्य॥ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्॥ आयुष्यम
ग्रियं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥ इति मंत्रेण कुमारं वाचयित्वा॥ तस्य यज्ञोपवीतं
प्रक्षिप्य॥ कुमारं भोजयित्वा॥ तत्रायं विशेषः॥ कुमारे भुक्तिकाले तु गायत्रीं समुदीरयेत्॥ आ
चार्यः स्वयमेवान्नं प्राशयेदिति॥ शौनकः॥ ततः॥ उष्णेन वायुउदकेनेत्यादितिः केशान्वप ॥भट्टि॰
त्॥ इत्यादि॥ उत्थाय केशान् नित्युदुंबरमूले दर्भस्तंबे वा निदध्यात् ततः सर्वं चौलवत्कुर्यात्॥ त ४२
त्रा सर्वत्रासौ स्थाने नाम निर्दिश्य करोति॥ तथा॥ नाम ब्रूयादसौ शब्दे प्रथमांतमुदात्तके॥

देवस्य त्वानुदात्तेव संबुध्यानामनिर्दिशेत् ॥ इति ॥ ततः कुमारं संम्यकु ॥ स्नापइत्वा ॥ पूर्ववदुपवि
श्याग्निं प्रज्वाल्य दर्भाज्यस्थाल्याविनिषट्पात्राणिप्रयुंज्य कुशांबु कूर्चं वस्त्राश्मदंडाजिनमे
खलश्च पात्राणामुत्तरतः सकृत्प्रयुंज्यात् ॥ तत्र कूर्चलक्षणमाह ॥ कूर्चं तु त्रिविधं ज्ञेयं उत्तमं
मध्यमाधमं ॥ नवभिः सप्तभिर्दर्भैः पंचाभिर्ग्रथितं गुलैः ॥ तन्मूले द्वादशांगुल्यं तस्याग्रं च
तुरंगुलं ॥ इति ततः ॥ प्रोक्षणपात्राद्याज्यभागं कृत्वा ॥ आचार्यः ॥ आयुर्दा देव जरसं० जरसे न एम ँ
स्वाहा ॥ अग्नयेदं ॥ ० इत्यग्नौ पालाशीं समिधमादध्यात् ॥ तथा ॥ आयुर्दाइममग्निश्रेष्टगुरो स्वाहा ॥
वटुर्भाविदिस्याचार्यः ॥ आतिष्ठेमम श्मानमश्मेव त्वं स्थिरो भव ॥ अभितिष्ठ
पृतन्यतः सहस्व पृतनायतः ॥ इत्यग्नेरुत्तरतः कुमारं दक्षिणेन पादेनाश्मानमास्था
प्य ॥ रेवतीस्त्वा व्यक्ष्णं कृत्तिकाश्चाकृंतं स्त्वा ॥ धियो वयन्नवग्ना आवृजंत्सहस्रमंता
ँ अभितो अयच्छंन् ॥ देवीर्देवाय परिधी सवित्रे महच्चदासामभवे त्वम्परिह्वित्वनं ॥ इति
द्वाभ्यां वस्त्रमभिमंत्र्य ॥ या अकृंतन्नवयंन्या० मुपसंव्य पस्व ॥ इति कुमारस्य वस्त्रं

परिधाप्य ॥ परीदं वासो अदिधास्वस्त्तये भूरा० विश्वाआसिजीवंन् ॥ इति ॥ परिहीतं कु
मारमभिमंत्र्य ॥ इयंदुरुक्तास० मे रवले मा रिषाम ॥ इति द्वाभ्यां मंत्राभ्यां कुमार
४३ स्य त्रिवृतां मौंजीमेखलां त्रिः प्रदक्षिणं परिवीय ॥ एतं मंत्रद्वयं कुमारं वाचयेत् ॥
तथा ॥ पूर्णाश्रमः ॥ मौज्याजिनावस्थापन प्रोक्षणोत्थापनानि तु ॥ समंत्रमेना
न्याचार्यः पूर्वं दत्वाथ वाचयेत् ॥ मित्रस्य चक्षुर्धरुणं० दधेहं ॥ इति कुमारस्य
कृष्णाजिनं धात्ते दत्त्वा ॥ एतं मंत्रं कुमारं वाचयेत् ॥ कृष्णाजिनस्य लक्षणमा
ह ॥ त्र्यंगुलवर्ष्मं लोमं यद्वास्याच्चतुरंगुलं ॥ एकखंडं वा धारयेदुपवी त्रिखंडं
तवत् ॥ इति ततः अग्नेरुत्तरतो दर्भान्संस्तीर्य तेषु दर्भेषु ॥ आगंत्रा०
[illegible]सेभ्यः ॥ इति कुमारमुपवेश्य ॥ एतं मंत्रं कुमारं वाचयित्व ॥ अंज ४३
लिनोदकमादाय कुमारस्यांजलौ निनीय ॥ समुद्रा० रोन भायनू ॥
इति तेनोदकेन कुमारं त्रिः प्रोक्ष्य ॥ एतं मंत्रं कुमारं वाचयित्व ॥

अग्न ऐह सोममग्नभि० राचर्यस्ताव ॥ इतिमंत्रैः कुमरस्य दक्षिणहस्तंगृ
हीत्व ॥ अग्नये त्वापरिददामिममहेश्वरशर्मंन् ॥ सोमाय त्वापरिददामिममहेश्वरशर्मंन् ॥
सवित्रे त्वापरिददामिममहेश्वरशर्मंन् ॥ सरस्वत्यै त्वापरिददामिममहेश्वरशर्मंन् ॥ मृ
त्यवे त्वापरिददामिममहेश्वरशर्मंन् ॥ यमाय त्वापरिददामिममहेश्वरशर्मंन् ॥ गदाय
त्वापरिददामिममहेश्वरशर्मंन् ॥ अंतकाय त्वापरिददामिममहेश्वरशर्मंन् ॥ अद्भ्य
स्त्वापरिददामिममहेश्वरशर्मंन् ॥ ओषधीभ्यस्त्वापरिददामिममहेश्वरशर्मंन् ॥ पृ
थिव्यै त्वासवैश्वानरायैपरिददामिममहेश्वरशर्मंन् ॥ इतिप्रतिमंत्रैं देवताभ्यो
रक्षणाय दत्वा ॥ सुमुहूर्तेसाति ॥ देवस्य सवितुः प्रसव उपनयेममहेश्वरशर्मंन् ॥
इतिकुमारं स्वसमीपमानीय ॥ सुप्रजाः प्रजया भूयासं सुवीरो वीरैः सुव

चीवर्चसासुपोषः पोषैः ॥ इति कुमारस्य दक्षिणकर्णेजपति ॥ कुमारः ॥ ब्रह्मचर्य
४२ मागामुपमानयः स्वदेवेन सवित्राप्रसूतः ॥ इति ब्रूयात् ॥ आचार्यः ॥ को नामा
सि ब्रूयात् ॥ कुमारः ॥ महेश्वर शर्मा नामास्मीति ब्रूयुः ॥ आचार्यः ॥ कस्य ब्रह्म
चार्यसि महेश्वरशर्मन् ॥ कुमारः ॥ प्राणस्य ब्रह्मचार्यस्मि ॥ आचार्यः ॥ महेश्वर
शर्मैष ते देव सूर्य ॥ ब्रह्मचारी तं गोपाय समामृतैष ते सूर्य पुत्रः स दीर्घायुः समामृत ॥ युः
या ९ स्वस्तिराग्निर्वायुः सूर्यः श्चंद्रमा आपोनुसंचरन्तीता ९ स्वस्तिमनुसंचरासा महेश्वर
शर्मन् ॥ अध्वनामध्वपते श्रेष्ठस्याध्वनः पारमसीय ॥ इति कुमारं वाचयेत् ॥ कुमारः श्रुचा
ज्यमादाय ॥ योगेयोगे तवस्तरं वाजेवाजे हवामहे ॥ सखाय इंद्रमूतये स्वाहा ॥ इंद्राय
इदं० ॥ आचार्यः ॥ इमम्मे आपेवर्चसेह्यधिप्रिय ९ रेताव रुणसोमराजन् ॥ मातेवास्मा ४४॥
अदिते शर्मयच्छ विश्वेदेवाजरदष्टिर्यथासत्स्वाहा ॥ अग्नी वरुण सोमादितिविश्वेभ्यो

देवेभ्यः इदं ॥ कुमारएव ॥ शतमिन्नुशरदोअंतिदेवा यत्रा नश्चक्रा जरसं तनू
नां ॥ पुत्रासो यत्र पितरो भवंति मानो मध्यारीरिषितायुर्गंतोः ॥ स्वाहा ॥ देवे
भ्यः इदं ॥ आचार्यः ॥ अग्निष्ट आयुःप्रतरां दधात्वग्निष्टे पुष्टिं प्रतरां कृणोतु ॥
इंद्रो मरुद्भिः ऋतुधा कृणोत्वादित्यैस्ते वसुभिरादधातु ॥ स्वाहा ॥ अग्नींद्रामरुदा
दित्यवसुभ्यः इदं ॥ कुमारएव ॥ मेधां मह्यमंगिरसो मेधां सप्तऋषयो दधुः ॥
मेधां मह्यं प्रजापतिर्मेधामग्निर्ददातु मे ॥ स्वाहा ॥ अंगिरसः सप्तऋषयः प्रजा
पा पतिभ्यः इदं ॥ अप्सरासु च मे धा गंधर्वेषु च यद्यशः ॥ देवी या मानुषी
मेधा सा मामाविशतादिहा ॥ मेधादेवेभ्यः इदं ॥ इमं मे वरुण श्रुधी हव०
मद्य च के स्वाहा ॥ वरुणा इदं ॥ ० तत्वा यामि० प्रमोषीः ॥ स्वाहा ॥ अग्नीव
रुणाभ्यां इदं ॥ त्वं नो अग्ने० प्रमुमुग्ध्यस्मत्स्वाहा ॥ अग्नीवरुणाभ्यामिदं ॥

॥५५॥ सत्वंन्नोअग्नेवमोभवोतिने० सुहवोनएधिस्वाहा॥अग्नीवरुणाभ्यां इदं॥
त्वमग्नेअयास्ययासंन्मनसहितः॥अयासंहव्यमूहिषेयानोधेहि
भेषजं स्वाहा॥अग्नयेइदं॥इत्येकादशाज्याहुतीः कुमारं हावयेत्॥त
द्द्वितीयोचतुर्थौ स्वयमुक्ताचहावयेत्॥जयादीनाचायोजुहुयात्॥तथा
विधिरत्नकारिका॥हावयेद्योगइद्धाघेवद्रमेकादशाहुतीः॥द्वितीयाचचतुर्थी
चस्वयमुक्तान्नेहावयेत्॥जयादिप्रतिपद्यते स्वयमापरिषेचनात्॥इति॥तथा
देवतानुक्रमणिकायां॥उद्देश-त्यागकारिका॥यागइंद्रोद्विति योग्निर्वरुणः
सोमउच्यते॥अदितिश्चतथा विश्वेदेवाः सर्वेपिदेवताः॥शतमिन्द्रदेवास्युरस्
ग्नितिस्त्रदेवताः॥अग्नीद्रोमरुतश्चैव आदित्याव सवस्तथा॥मेधामहामित्य ॥५५॥
स्मिन् यत्रेस्य देवताइमाः॥युक्तश्चाग्निरस्तः सप्तऋषयश्च प्रजापतिः॥अग्निश्चे

प वरुणश्चैव

वरत्रापिमे धौचलदंनंतरं ॥ वरुणेनांतरेमंत्रंपुरतस्स्त्रानोद्यं ॥ अग्निश्चैवत्वमेग्नेग्नि
प्रकीर्तिताः ॥ इतिमंत्राः ॥ अग्नेः पश्चादुदगग्नीकुर्वन्निदधाति ॥ आचार्यः ॥ राष्ट्रभृ
दस्याचार्यासंदीमात्वद्योषं । इति कूर्चमुपविशेत् ॥ कुमारः ॥ आचार्यस्य
पुरस्तात् । प्राङ्मुखउपवेश्य ॥ आचार्यस्यदक्षिणेनपादंदक्षिणपाणिन
गृहीत्वा स्वदक्षिणपाणिनासावित्रीं भोअनुब्रूहीतिब्रूयात् ॥ कुमारायगा
यत्रीमुपदिशेत् ॥ कथं ॥ ॐ भूः तत्सवितुर्वरेण्यं ॥ ॐ भुवः भर्गोदेवस्यधीम
हि ॥ ॐ सुवः धियोयोनः प्रचोदयात् ॥ ॐ भूः तत्सवितुर्वरेण्यंभर्गोदेव
स्यधीमहि ॥ ॐ भुवः धियोयोनः प्रचोदयात् ॥ ॐ सुवः तत्सवितुर्वरेण्यं
भर्गोदेवस्यधीमहिधियोयोनः प्रचोदयात् ॥ तथारत्नकारिका ॥ तांप
च्छोर्धर्चशः ॥ सर्वव्याहरंव्याहृतिक्रमः ॥ पच्छोर्धर्चयोरायेकृत्स्नायनुमंव

॥४६॥ देत् ॥ इति कुमारः ॥ अथ धामसौ सौम्य प्राणस्त्वं मे गोपाय ॥ इत्यालानमनुत्त
मोष्ठं श्यावांतमुपस्पृश्याचामेत् ॥ ब्रह्मण आणीस्थ ॥ युगपत्कराभ्यां
स्वकर्णावुपस्पृश्य ॥ सुश्रवः सुश्रवसं मा कुरु यथा त्वं ब्रह्मणो निधिगोपो
ऽस्य एवं भूयासं ॥ इति पालाशं दंडं दक्षिणेन हस्तेनोत्ते ॥ आचार्यः ॥ स्मृतं तं च मे स्मृ ८
तं च मे तन्म उभयव्रतं ॥ निंदा च मे निंदा च मे तन्म उभयव्रतं ॥ श्रद्धा च मे श्रद्धा
च मे तन्म उभयव्रतं विद्या च मे विद्या च मे तन्म उभयव्रतं ॥ श्रुतं च मे श्रुतं च मे
व्रतं तन्म उभयव्रतं ॥ सत्यं च मे सत्यं च मे तन्म उभयव्रतं तपश्च मे तपश्च मे तन्म उभ
यव्रतं व्रतं च मे व्रतं च मे तन्म उभयव्रतं यद्ब्राह्मणानां ब्रह्मणि व्रतं यदग्नेः सेंद्रस्य
स्यै सप्रजापतिकस्य सदेवस्य सदेवराजस्य समनुष्यराजस्य सपितृकस्य स
समनुष्यै पितृराजस्य सगंधर्वाप्सरस्कस्य यन्म आत्मनि आत्मनि व्रतं तेनाहं सर्वव्रतो ॥४६॥
भूयासं ॥ इत्याचार्यः ॥ कुमारं वाचयेत् ॥ कुमारः ॥ गुरोः ॥ वरं ते ददामीति

गुरवे धेनुं दद्यात्॥ गुरुः सप्रदशाकलोपांन्या॥ देवस्यत्वा सवितुः प्रसवेऽश्वि
भ्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि॥ राजात्वावरुणो नयतु देवद
क्षिणे रुद्रायगां॥ तेनामृतत्वमश्यां॥ वयो दात्रे। मयो मह्यमस्तु प्रतिगृहीत्रे॥
क इदं कस्मा अदात्॥ कामः कामाय॥ कामो दाता॥ कामः प्रतिगृहीता॥ का
मं समुद्रमाविश॥ कामेन त्वा प्रतिगृह्णामि॥ कामैतत्ते॥ एषा ते काम दक्षि
णा॥ उत्तानस्त्वांगीरसः प्रतिगृह्णातु॥ इति धेनुं प्रतिगृह्य॥ रुद्रायगां॥
उदायुषा स्वायुषोदोषधीनां रसेनोत्सर्जन्यस्य शुष्मेनोदस्थाममृतां अनु॥
कुमारमुत्थाप्य॥ एतं मंत्रं कुमारं वाचयित्वा॥ कुमारः॥ तच्चक्षुर्देवहितं पुर
स्ताच्छुक्रमुच्चरत्॥ पश्येम० इत्यादिः सूर्यदृशे॥ सूर्यमुपस्थाय॥ अग्नि
कार्यं॥ प्राणानायम्य॥ प्रातरग्निकार्यं करिष्ये॥ इति संकल्प्य॥ परिस्त्वा

शिगा० ग्नेपरिसमूहामि० सुब्रह्मा ब्रह्मचारिभिः॥ अदितेनुमन्यस्वेतित्यादि रं ग्निंप
॥ ४७॥ रिषिच्य॥ अग्नये समिधमाहार्षं बृहते जातवेदसे यथा त्वमग्ने समिधा समि
ध्यस एवं मामायुषा वर्चसा सन्या मेधया प्रजया पशुभिर्ब्रह्मवर्चसेनान्ना
द्येन समेधय स्वाहा॥ अग्नये इदं॥ एधोस्येधिषीमहि स्वाहा॥ अग्नये इदं॥
समिदसि समेधिषीमहि स्वाहा॥ अग्नये इदं॥ तेजोसि तेजो मयि धेहि
स्वाहा॥ अग्नये इदं॥ अपो अद्यान्वचारिषं रसेन समसृक्ष्महि॥ पयस्वां
ं अग्न आगमं तं मा सं सृज वर्चसा स्वाहा॥ अग्नये इदं०॥ सं मा
ग्ने वर्चसा सृज प्रजया च धनेन च स्वाहा॥ अग्नये इदं॥ विद्युन्मे अस्य दे ॥ ख़ि ॥
वा इन्द्रो विद्यात्सह ऋषिभिः स्वाहा॥ इन्द्रायेदं॥ अग्नये बृहते नाकाय स्वा ॥ ४७॥
हा॥ अग्नये बृहते नाकायेदं०॥ द्यावापृथिवीभ्यां स्वाहा॥ द्यावापृथि

वीर्य्याय स्वाहा ॥ अग्निरिदं ॥ एषा ते अग्ने समित्तया वर्धस्व चाप्यायस्व च त
याहं वर्धमानो भूयासमाप्यायमानश्च स्वाहा ॥ अग्नय इदं ॥ यो माग्ने
भागिनं सन्तमथाभागं चिकीर्षत्यभागमग्ने तं कुरु मामग्ने भागि
नं कुरु स्वाहा ॥ अग्नय इदं ॥ समिधमाधायाग्ने सर्वव्रतो भूयासं स्वा
हा ॥ अग्नय इदं ॥ भूः स्वाहा ॥ अग्नय इदं ॥ भुवः स्वाहा ॥ वायव इदं ॥ स्वः
स्वाहा ॥ सूर्यायेदं ॥ भूर्भुवः स्वः स्वाहा ॥ प्रजापतय इदं ॥ अदितेऽनुमन्यस्व
इत्यादिरग्निं परिषिच्य ॥ उपस्थाय ॥ यत्ते अग्ने तेजस्तेनाहं ० तेजस्वी भू
यासं ॥ मयि मेधां मयि प्रजां ० म्याग्निस्तेजो दधातु ॥ इत्याग्निमुपस्थाय ॥ मा
नस्तोके तनये मा ० नमसा विधेम ते ॥ इति भस्म ॥ किंचिद्भस्म आदाय ॥
मेधावी भूयासमित्यादि त्रिस्तिलकानि ललाटे ॥ तेजस्वी भूयासमि
ति दक्षिणभुजे ॥ वर्चस्वी भूयासमिति वामभुजे ॥ ब्रह्मवर्चस्वी भू

शिवा० यासमितिदक्षिणस्तने॥ आयुष्मानिकंठेधृत्वा॥अंनादमितिनाभौ॥यशस्वी
स्वतिस्कंधे॥सर्वसमृध्दइतिशिरसि॥समज्यततश्चैकांसमिधमाधाय॥पुनः
॥ ५८ ॥ स्तादित्यारुद्रावसवः०॥जमानःस्यकामास्वाहा॥वसुभ्योरुद्रेभ्यःआदित्येभ्यः
इदं०॥सामधंनिधाया॥स्वास्तिश्रधांमेधां०॥हव्यवाहनः॥इत्याग्नेप्राथ्य॥स्व
प्रवरमुक्त्वा॥नमःस्कृत्य॥तत्रोद्दिश्यस्यागकारिकाः॥समिधानमंत्रेषुसर्वेषु
षिः प्रजापतिः॥इंद्रःसत्यमंत्रस्यांनवमेमंत्र॥लिंगलः॥इतिपूर्णाश्रमः॥त
तोगुरुर्मातरमंन्याश्चवृधांनमःस्कृत्वाभिक्षांयाचयेत्॥कथं॥भवांन्
भिक्षांददातु॥इतिपुरुषं॥भवतीभिक्षांदेहीतिस्त्रियं॥ततः॥आचार्यः॥
ब्रह्मचार्यसीतिब्रूयात्॥कुमारः॥अस्मीतिवदेत्॥आचार्यः॥अपोशान॥ सद्दि॰॥
अपोश्नामि॥आचार्यः॥कर्मकुरु॥कुमारः॥करोमि॥आचार्यः॥मासुषु ॥ ५५ ॥

प्सीः॥ कुमारः। न स्वपामि॥ आचार्यः। भिक्षाचर्यं चर॥ कुमारः। चरामि
आचार्याधीनो भव॥ कुमारः॥ भवामि॥ इति ब्रूयात्॥ एनमग्निंम्यहृहंमे
मधारयं नक्षारलवणं भुंजीनः॥ तिष्ठेत्॥ चतुर्थेहनि आचार्यः॥ कुमारस्य
अन्यद्वासः परिधाप्य॥ यस्य ते प्रथमवास्यं हरामस्तं त्वा विश्वे अवंतु देवाः॥
तं त्वा भ्रातरः सुवृधो वर्धमानमनुजायंतां बहवः सुजातं॥ इति मंत्र पूर्वं धृतं
वासः आदत्ते॥ केचित्पालाशं कर्म कुर्वंति तस्य प्रयोगः॥ चतुर्थे दिवसे आ
माप्राचीमुदीचीं वा दिशमुपनिष्क्रम्य पालाशवृक्षस्याधस्तादुपविश्य॥ तत्र
पुण्याहं वाचयित्वा॥ वटुना सह प्राणानायम्य पालाशं कर्म करिष्य इति सं
कल्प्य॥ पालाशस्याधस्तात्स्थंडिलं कल्पयित्वा॥ तत्रोपनयनाग्निं प्रतिष्ठा
प्य॥ अग्नेः पूर्वदेशे वैशान्यदेशे वा तंडुलैः स्त्रीलिस्थंडिलं कृत्वा॥ तेषु स्थंडिले

शि॰गा॰ पुदक्षिणस्थंडिलेमारक्ष्यप्रणवायनमः॥प्रणवमावाहयामि॥मध्यस्थंडि
॥ ७१॥ लेश्रद्धायैनमः॥श्रद्धामावाहयामि॥उत्तरस्थंडिलेमेधायैनमः॥मेधा
मावाहयामि॥इत्यादिप्रकारेणषोडशोपचारैरभ्यर्च्य॥यश्छंदसामृषभो
विश्वरूपः॥छंदोभ्योध्यमृतात्संबभूव॥समेंद्रोमेधयास्पृणोतु॥
अमृतस्यदेवधारणोभूयासं॥शरीरंमेविचर्षणं॥जिह्वामेमधुमत्तमा॥
कर्णाभ्यांभूरिविश्रुवं॥ब्रह्मणःकोशोसिमेधयापिहितः।श्रुतंमेगोपा
य॥इतिप्रणवमुपस्थाय॥श्रद्धयाग्निःसमिध्यते॥श्रद्धयाविंदतेहविः॥श्र
५४ द्धांभगस्यमूर्धनि॥वचसावेदयामसि॥प्रियंश्रद्धेददतः॥प्रियंश्रद्धेद
दासतः॥प्रियंभोजेषुयज्वसु॥इदंमउदितंकृधि॥यथादेवाअसुरेषु॥ म॰दि॰
श्रद्धामुग्रेषुचक्रिरे॥एवंभोजेषुयज्वसु॥अस्माकमुदितंकृधि॥श्रद्धां ॥ ७१॥

देवायजमानः॥ वायुगोपाउपासते॥ श्रद्धांहृदय्ययाकूत्या॥ श्रद्धयाहूयते
हविः॥ श्रद्धांप्रातर्हवामहे॥ श्रद्धांमध्यंदिनंपरि॥ श्रद्धांसूर्यस्यनिमृचि॥
श्रद्धेश्रद्धापयेहमा॥ श्रद्धादेवानधिवस्ते॥ श्रद्धांविश्वमिदंजगत्॥ श्रद्धांका
मस्यमातरं॥ हविषावर्धयामसि॥ इतिश्रद्धामुपस्थाय॥ मेधांदेवीजुषमा
णानआगाद्विश्वाचीभद्रासुमनस्यमाना॥ त्वयाजुष्टानुदमानादुरुक्तान्बृह
द्वदेमविदथेसुवीराः॥ त्वयाजुष्टऋषिर्भवतिदेवि त्वयाब्रह्मागतश्रीरुतत्वया॥
त्वयाजुष्टःचित्रंविंदतेवसुसानोजुषस्वद्रविणेनमेधे॥ मेधांमइंद्रोददातुमेधां
देवि सरस्वति॥ मेधांमेअश्विनावुभावाधत्तांपुष्करस्रजा॥ अप्सरासुचयामे
धागंधर्वेषुचयन्मनः॥ दैवींमेधासरस्वति सामांमेधासुरभिर्जुषतांस्वाहा॥

शिं.गा० ओं मामेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या ॥ ऊर्जस्वती पयसा पि
॥५०॥ न्वमाना सा मामेधा सुप्रतीका जुषंतां ॥ मयि मेधां मयि प्रजां मय्यग्निस्तेजो
दधातु ॥ मयि मेधां मयि प्रजां मयींद्र इंद्रियं दधातु ॥ मयि मेधां मयि प्रजां मयि
सूर्यो भ्राजो दधातु ॥ इति मेधामुपस्थाय ॥ दधिमधुशर्करायुक्तं प्रणवादीनु०
द्दिश्य ॥ ब्राह्मणान्भोजयित्वा ॥ कर्मणः पुण्याहं वाचयित्वा ॥ अग्निं प्रज्वलिनाघ
ग्निमुखंते ॥ समंतादग्निं परिषिच्य ॥ स्रुवेणाज्यमादाय ॥ यश्छंदसामृष
भो विश्वरूपः ॥ छंदोभ्योध्यमृतात्संबभूव ॥ स मेंद्रो मेधया स्पृणोतु ॥ अमृ
तस्य देव धारणो भूयासं स्वाहा ॥ छंदोभ्य इदं ॥ शरीरं मे विचर्षणं ॥ जि सं.दि०
ह्वा मे मधुमत्तमा ॥ कर्णाभ्यां भूरि विश्रुवं ॥ ब्रह्मणः कोशोसि मेधयापिहितः ॥ ॥५०॥
श्रुतं मे गोपाय ॥ स्वाहा ॥ छंदोभ्य इदं ॥ आवहंती वितन्वाना ॥ कुर्वाणा चीर

मात्मनः ॥ वासांसि मम गावश्च ॥ अन्नंपानेच सर्वदा ॥ ततो मे श्रियमावह ॥ लोमशां
पशुभिः सह स्वाहा ॥ छंदोभ्यः इदं ॥ आमायंतु ब्रह्मचारिणः स्वाहा ॥ छंदोभ्यः इदं ॥
यशोजने सानि स्वाहा ॥ छंदोभ्यः इदं ॥ श्रेयान्वस्यसो सानि स्वाहा ॥ छंदोभ्यः
इदं ॥ तंत्वा भग प्रविशानि स्वाहा ॥ छंदोभ्यः इदं ॥ स मा भग प्रविश स्वाहा ॥ छं
दोभ्यः इदं ॥ तस्मिंत्सहस्रशाख ॥ निभग अहं त्वयि मृजे स्वाहा ॥ छंदोभ्यः
इदं ॥ यथापः प्रवतायंति ॥ यथा मासा अहर्जरं ॥ एवं मां ब्रह्मचारिणः ॥ धातरा
यंतु सर्वतः स्वाहा ॥ छंदोभ्यः इदं ॥ इत्येकादशाज्याहुतीः कुमारेण आचार्यो हावयेत् ॥
जयादि ब्रह्मविसर्जनांतं कुर्यात् ॥ ततः कुमारो मेखलाजिने दंडान् पालाशाग्रे
निधायान्यानि नवानि धारयेत् ॥ तथा ॥ संत्यज्य मेखलादीनि ब्रह्मसूत्रं मेख
लाजिन दंडपालाशाग्रे निधापनयेत् ॥ तद्वासो ब्राह्मणः गृहाद्बहिरन्यत्र धारयेत् ॥

शिं॰गा॰ इतिपजलंक्षिंगेयसूरिविरचिताप्रयोगपद्धतौऽपनयनसमाप्तः॥श्रीविरूपाक्ष
॥५१॥ यनमः ॥अथश्रावणहोमउच्यते॥तस्यप्रयोगः॥ उदयव्यापिन्यांश्रावण्यांपौर्ण
मास्यामध्यायोपाकर्मकुर्यात्॥पर्वण्योदयिकींकुर्युः श्रावण्यांतैत्तिरीयकाः॥
बः ह्वृचश्रावणेकुर्युर्ग्रहसंक्रांतिवर्जयेत्॥तथा॥सवीर्यघपराह्णेस्याद्यागंप्रा
मे तःपरेहनि॥परेद्युःसंनिधानेषुश्रावणकोविधिः॥गार्ग्यः॥श्रावण्यांपौर्ण
मासीतुसंगवास्परतोयदि॥तदारोयदकीग्राह्यानान्ययोदयिकीभवेत्॥ए
वंविधियासौर्णमस्यांशिष्यैसहाचार्यः॥तीर्थादकाघं सुस्नात्वाप्राणानायं
म्याअध्यायोपाकर्मकरिष्यइतिसंकल्प्य॥निवीतीकृत्वा।प्रजापतिकांडऋ भाद्रि
षिमावाहयामि॥सोमंकांडऋषिमावाहयामि॥अग्निंकांडऋषिमावाहाय ॥५१॥

मि ॥ विश्वांदेवां काडऋषिमावाहयामि ॥ संहितीर्देवता उपनिषदमावाहयामि ॥ याज्ञकीर्देवता उपनिषदस्त आवाहयामि ॥ वारुणीर्देवता उपनिषद आवाहयामि । ब्रह्मणस्वयम्भुवमावाहयामि । सदसस्पतिमावाहयामि । इति तंडुलकृतस्थंडिलेनएतान् नवऋषिनावाह्य ॥ षोडशोपचारैरभ्यर्च्य ॥

५ नवऋषीणां तर्पणं कृत्वा ॥ अग्निप्रतिष्ठनांघाज्यभागांते ॥ स्रुच्याज्यमादाय ॥ अग्नयेस्वाहा । अग्नयेइदमितिमुखाहुतिं जुहुयात् ॥ काम्यौस्वौषधिम्हेस्पुच पितृष्वपि ॥ मुखाहुतिरवश्यं हि स्व सर्वा चार्यैः सुनिश्चतेति ॥ ततः स्रुच्याज्यमादाय ॥ प्रजापतये कांडऋषयेस्वाहा । प्रजापतये कांडऋषय इदं । सोमाय कांडऋषयेस्वाह । सोमाय कांडऋषय इदं । अग्नये कांडऋषये स्वाहा ॥ अग्नये कांडऋषय इदं ॥ विश्वेभ्योदेवेभ्यः कांडऋषये स्वाहा ॥ विश्वेभ्योदेवेभ्यः कांड

ऋषयइदं॥ साङ्ख्यिनीभ्यो देवताभ्य उपनिषद्भ्यः स्वाहा॥ साङ्ख्यिनीभ्यो देवता
भ्य उपनिषद्भ्यः इदं॥ याज्ञकीर्देवयताभ्यो उपनिषद्भ्यः स्वाहा॥ याज्ञकीर्दे
वताभ्य उपनिषद्भ्यः इदं०॥ वारुणीर्देवताभ्य उपनिषद्भ्यः स्वाहा॥ वारुण
ण्यो

णीर्देवताभ्य उपनिषद्भ्यः [illegible]॥ ब्रह्मणे स्वा० यंभुवे स्वाहा॥ ब्रह्मणे स्वयंभु
वइदं०॥ सदसस्पतये स्वाहा॥ सदसस्पतये इदं०॥ सदसस्पतिमद्भुतंप्रि
यमिंद्रस्य काम्यं॥ सनिं मेधामयासिषं स्वाहा॥ सदसस्पतये इदं०॥
इयमाहुतीः स्विष्टकृत्स्थानीय॥ वेदव्रतेषुच तथुपनयो वोत्सर्जनेषुच॥ उपाक
र्माणि तद्वत्स्विष्टकृत्सदसस्पतिः॥ किंच॥ यदग्निः सदसस्पतिः स्मार्तेक
र्मणि चोदितः॥ स्विष्टकृद्धोम इत्येवं=त्रिविधिं कर्मचोदितः॥ इति ततः सु
कुभिर्जुहुयात्॥ तिलाज्यहोमिसरसांसपिष्टानो धारममचित्तेरमंतु

स्वाहा॥ मंत्रोक्त्यदेवताइदं०॥ गावोहिरण्यं धनमंन्नपानं सर्वेषां श्रियै स्वाहा
॥ श्रियैइदं०॥ श्रियंचलक्ष्मींचपुष्टिंच कीर्तिंचानृण्यतां॥ ब्रह्मण्यंबहुपुत्रतां
श्रद्धामेप्रज्ञाः संददातु स्वाहा॥ श्रियैइदं॥ तिलाः कृष्णास्तिलाश्वेताः स्तिला
सोम्यावशानुगाः॥ तिलाःपुनंतुमेपापं यत्किंचदुरितंमयि स्वाहा॥ मंत्रो
क्तदेवतायैइदं॥ चोरस्यान्नं नवश्राद्धं ब्रह्महा गुरुतल्पगः॥ गोस्तेयं सु
रापानं भ्रूणहत्या तिलाः शांतिं शमयंतु स्वाहा॥ मंत्रोक्तदेवतायैइदं॥ श्रीश्च
लक्ष्मीश्च कीर्तिंचानृण्यतां॥ ब्रह्मण्यंबहुपुत्रतां॥ श्रद्धामेधेप्रज्ञानुजातवेद
संददातु स्वाहा॥ श्रियैइदं०॥ तिलाः कृष्णाः स्तिलाश्वेताः स्तिलासोम्यावशा
नुगाः॥ प्राणापानव्यानोदानसमानामेशुध्यंतां ज्योतिरहं विरजाविपाप्मा
भूयासं स्वाहा॥ प्राणादिभ्योदेवताभ्यः इदं०॥ वाङ्मनश्चक्षुश्श्रोत्रजिह्वाघ्रा

णेरेतोबुध्याकूतिः समानामेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयासंं
॥५३॥ स्वाहा॥वागाद्दिभ्योदेवताभ्यः इदं०॥त्वक्चर्ममांससरुधिरमेदोमज्जास्नाय
वास्थीनिमेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयासंं स्वाहा॥वागादि
भ्योदेवताभ्यः इदं०॥शिरःपाणिपादपार्श्वपृष्ठोरुदरजंघशिश्नोपस्था
पायवोमेशुध्यंतांज्योतिरहं० स्वाहा॥शिरादिभ्योदेवताभ्यः इदं०॥उत्ति
ष्ठपुरुषहरितपिंगललोहिताक्षदेहिदेहिददापेतामेशुध्यंतांज्योतिरहंवि
रजाविपाप्माभूयासंं स्वाहा॥पुरुषाय इदं०॥पृथिव्यापस्तेजोवायुराकाशामे
शुध्यंतांज्योतिरहंविरजाविपाप्माभूयासंं स्वाहा॥पृथिव्यादिभ्योदेव
ताभ्यः इदं०॥शब्दस्पर्शरूपरसगंधामेशुध्यंतांज्योतिरहं० स्वाहा॥शा ॥५३॥
ब्दादिभ्योदेवताभ्यः इदं०॥मनोवाक्कायकर्माणिमेशुध्यंतांज्योतिरहं० स्वाहा॥

मानादिभ्योदेवताभ्यः इदं०॥ अव्यक्तभावैरहंकारो० स्वाहा॥ अव्यक्तादिभ्योदेवताभ्यः इदं०॥ आत्मामेशुध्यंतांज्योतिरहं० स्वाहा॥ आत्मनेइदं०॥ अंतरात्मामेशुध्यंतांज्योतिरहं० स्वाहा॥ अंतरात्मनेइदं०॥ परमात्मनेशुध्यंतांज्योतिरहं० स्वाहा॥ परमात्मनेइदं०॥ क्षुधेस्वाहा॥ क्षुधेइदं०॥ क्षुत्पिपासायस्वाहा॥ क्षुत्पिपासायाइदं०॥ विविट्यैस्वाहा॥ विविट्यैइदं०॥ ऋग्विधानायस्वाहा॥ ऋग्विधानायाइदं०॥ कषोत्कायस्वाहा॥ कषोत्कायाइदं०॥ क्षुत्पिपासामलांज्येष्ठमलक्ष्मीनाशयाम्यहं॥ अभूतिमसमृध्यंचसर्वानिर्णुदमेगृहात्पाप्मानं स्वाहा॥ क्षुधादिभ्योदेवताभ्यः इदं०॥ अन्नमयप्राणमयमनोमयविज्ञानमयमानंदमयमात्मामेशुध्यंतांज्योतिरहं० स्वाहा॥ अन्नादिभ्योदेवताभ्यः इदं०॥ इतिकृत्वा॥ सर्वपापेभ्योविमुक्तोभवति॥ श्रियंबलादिसंपदंचप्राप्नोति॥ ॥

शिं.गा.० तथा पूर्णाग्निमस्वाहा ॥ तत स्तिलैस्तिलमचोदितां स्तिलैर्नित्यादिमंत्रकों ॥ नवा उया
॥५५॥ होमेकं कृत्वा ततो हुत्वा विसर्जनः ॥ विमुच्यते सुनिश्च ते समस्तपातकाद्विजः ॥ त्रि
यंबलादि संपदं प्रपद्यते थ होमकृदिति ॥ ततो यज्ञोपवीतमिति मंत्रेणाग्नावेकं य
ज्ञोपवीतं हुत्वा ॥ नवकांडर्षिभ्यो यज्ञोपवीतानि समर्प्य ॥ स्वपितॄनुद्दिश्य ब्राह्मणे
भ्यो यज्ञोपवीतानि दत्वा ॥ स्वयं पंच पंच यज्ञोपवीतं धृत्वा ॥ दर्भेष्वासीना कुशाग्र
लो यत तद्दूर्वी त्वाधारयमाणाः ॥ वेदमधीयीरंनू ॥ आचार्यः ॥ इषेत्वा० ॥ अग्निमी
ळे पुरोहितं० ॥ ब्रह्म संधत्तं तन्मे जिन्वतं० ॥ भद्रं कर्णेभिः शृणुयाम देवाः ॥ अथा
तो दर्शपूर्णमासौ व्याख्यास्यामः ॥ अथातो ब्रह्मजिज्ञासः ॥ इति शिष्याध्याप्य ॥ श्रा.दि०
जयादि ब्रह्मविसर्जनं कृत्वा ॥ अभ्युदेकं कुर्यात् ॥ इति श्रावण होमः ॥ एवमुत्स ॥५५॥
र्जनं कुर्यात् ॥ अथोपाकर्मोत्सर्जनं करिष्य इति संकल्प्य ॥ सर्वमेवमुत्सर्गं कुर्यात् ॥

नकुर्युर्यद्युपाकर्मनोव्ययदोषदृश्चिर्द्विजैः॥ वत्सरस्यतुयत्कर्मतत्सर्वंनिष्फलंभवे
त्॥ मासद्वयोपिदोषस्यात्तराप्येवंविधीयते॥ द्वयोरयोषमासेतुनस्मात्कुर्याद्यथा
विधिः॥ याज्ञवल्क्यः॥ अध्यायानामुपाकर्मश्रावण्यांश्रवणेनच॥ हस्तेनौषधिभा
वेचपंचम्यांश्रावणस्यतु॥ श्रावण्यांप्रोष्ठपद्यांवादुपाकृत्ययथाविधिः॥ युक्तंछंदां
स्यधीयीतमासांन्विप्रार्धप्रक्रमात्॥ व्यासः॥ आषाढ्यांप्रोष्ठपद्यांवाथवेदोपाक
रणंस्मृतं॥ तथाचगोभिलिः॥ पर्वण्युदयिकींकुर्युः॥ श्रावणंतैत्तिरीयकाः॥ बह्वृचा
श्रवणर्क्षेतुहस्तर्क्षेसामवेदिनः॥ बृहस्पतिरपि॥ सिंहस्थेरवौतुपुण्यर्क्षेपूर्वाह्णेविधि
वद्द्विजः॥ छंदोगविहितंकुर्यादुत्सर्गंसर्वछंदसां॥ शुक्लपक्षेतुहस्तेवाप्युपाकर्मा
परांह्णकं॥ गार्ग्यः॥ श्रावण्यांपौर्णमास्यांतुसंगवात्परतोयदि॥ तदाह्यौदयिकी
ग्राह्यानान्यादौदयिकीभवेत्॥ श्रावणेनक्षत्रेर्मण्युत्तराषाढसंयुते॥ कृ१

धीं॰ गा॰
॥५५॥

संवत्सरकृतोध्यायस्तत्क्षणादेव नश्यति ॥ दक्षः ॥ यद्यर्धरात्रादर्वाक्स्यात्संक्रांतिर्ग्र
हणं तदा ॥ उपाकर्म न कुर्वीत परतश्चेन्नदोषकृत् ॥ गार्ग्यः ॥ कुलीरस्थे न कर्त
व्यं कर्तव्यं सिंहकन्ययोः स्तके ॥ वसिष्ठः ॥ अस्तं प्राप्ते जीवे नष्टे तो विनष्टे सुते न मृते न रा
ष्ट्रसमाकुलेषु ॥ उत्सर्जनोपाकरणे न कार्ये ग्रस्ते दुस्वप्ने गुरुनस्तयानि ॥ स्मृ
त्यर्थसारे ॥ कवा गुरोश्चास्तमयं प्रयाते मासद्वये यद्युदये न चास्ति ॥ तदापि
कुर्यात्सवितुर्युपपन्ने नैमित्तिकत्वाद्ध्न नित्यकत्वात् ॥ देवलोपि ॥ मोद्यादि
दोषग्रहणं यदि स्याद्दोषध्यमावा यदि कर्कटस्थः ॥ मानुद्विजा श्रावणकं
मं कुर्युः नित्यान्यथाकुर्भुनयो मनीषिणः ॥ कुलिरस्थे यदा सूर्ये उपाकर्मा
णुदक्षिणे ॥ नर्मदोत्तरदेशे नरदेशे नानुकर्तव्यं हि सयुक्तके ॥ ॥ श्रीगुरुमूर्तये
नमः ॥ अथा वेदव्रतानि तत्राचार्यः ॥ प्राणानायम्य ॥ इमं महेश्वरशर्माणं

धर्म॰ द्वि॰
॥५५॥

कुमारं प्राजापत्यावृते कर्मणा सꣳस्कारं पद्मा संकल्प्य ॥ ब्रह्मचारिणो वपनं कारयित्वा ॥
प्रजापतिं कांडऋषिं सोमं कांडऋषिं अग्निं कांडऋषिं विश्वां देवान्कांडऋषिंन्
स्वाꣳहितीर्देवता उपनिषदः याज्ञिकीर्देवता उपनिषदः वारुणीर्देवता उप
निषदः ॥ ब्रह्माणꣳ स्वयंभुवं ॥ सदसस्पतिं ॥ उपाकर्मा वेदध्ययनं ॥ अग्नि
ष्ठा प्रातिष्ठापनमुखांते ॥ प्रजापतिकांडऋषये स्वाहा ॥ प्रजापतये कांडऋषये
इदं ॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव ॥ यत्कामास्ते जु
हुमस्तं नो अस्तु वयं स्याम पतयो रयीणांꣳ स्वाहा ॥ प्रजापतये इदं ॥ रयी
णां पतिं यजतं बृहंतं ॥ अस्मिन्भरे नृतमं वाजसातौ ॥ प्रजापतिः प्रथम
जा ऋतस्य ॥ प्रजाम देव मधिना बुवं तु स्वाहा ॥ प्रजापतये इदं ॥ प्रजापते त्वं
निधिपाः पुराणः ॥ देवानां पिता जनिता प्रजानां ॥ पतिर्विश्वस्य जगतः परस्पाः ॥

शिगा० हविर्भिर्देव विहवे जुषस्व स्वाहा ॥ प्रजापतये इदं० ॥ प्रजापतिः प्रथमो यज्ञियानां ॥
॥५६॥ देवानामग्ने यजतं यजध्वं ॥ स नो ददातु द्रविणं सुवीर्यं ॥ रायस्पोषं विष्यतु नाभिमस्मे
स्वाहा ॥ प्रजापतये इदं ॥ यो राय ईशे शतदाय उक्थ्यः ॥ यः पशूनां रक्षिता विष्ठितानां ॥
प्रजापतिः प्रथमजा ऋतस्य ॥ सहस्रधामा जुषतां हविर्भिः स्वाहा ॥ प्रजापतय इदं० ॥
सांहितीभ्यो देवताभ्यः उपनिषद्भ्यः स्वाहा ॥ सांहितीभ्यो देवताभ्यः इदं० ॥ या
भ्यो ज्ञिकीर्देवताभ्य उपनिषद्भ्यः स्वाहा ॥ याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यः स्वाहा इदं० ॥
उपनिष० वारुणीभ्यो देवताभ्यः स्वाहा ॥ वारुणीभ्यो देवताभ्य उपनिषद्भ्यः स्वाहा ॥ इदं० ॥ ब्र
ह्मणे स्वयंभुवे स्वाहा ॥ ब्रह्मणे स्वयंभुव इदं ॥ सदसस्पतये स्वाहा ॥ सदसस्प
तय इदं० ॥ सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं ॥ सनिं मेधामयासिषं स्वा मा हि०
हा ॥ सदसस्पतय इदं० ॥ इति जुहुयात् ॥ ततो ब्रह्मचारि ॥ अग्नये व्रतपते कांड ॥५८॥
र्षिभ्यः ॥ प्राजापत्यं व्रतं चरिष्यामि ॥ तच्छकेयं तन्मे राध्यतां ॥ वायो व्रतप

नेकांडऋषिभ्यः ॥ प्राजापत्यंव्रतंचरिष्यामि ॥ तच्छकेयंतन्मेराध्यतां ॥ आदित्य
व्रतपतेकांडऋषिभ्यः ॥ प्राजापत्यंव्रतंचरिष्यामि ॥ तत्सकेयंतन्मेराध्यतां ॥ व्रतां
नांव्रतपतेकांडऋषिभ्यः ॥ प्राजापत्यंव्रतंचरिष्यामि ॥ तच्छकेयंतन्मेराध्यतां ॥ इ
त्यग्निमुपतिष्ठेत् ॥ ततः आचार्योजयादिब्रह्मविसर्जनांतंकृतंकृत्वा ॥ आभ्यु
देकंकुर्यात् ॥ इतिप्राजापत्यव्रतं ॥ एवमुत्सर्जनं ॥ इमंप्राजापत्यव्रतोत्सर्ज
नंकरिष्यइतिसंकल्प्य ॥ ऋष्यर्चनादिहोमांतंपूर्ववत् ॥ कुर्यात् ॥ ततोब्रह्मचा
रि ॥ जयादिब्रह्मविसर्जनांतंकृत्वा ॥ आभ्युदेकंकुर्यात् ॥ अथसौम्यव्रतमु
च्यते ॥ उदगयनेपर्वणिवृटेः ॥ केशावपनंकृत्वा ॥ ग्रामाद्बहिःसमीपेकुर्यात् ॥
तस्यप्रयोगः ॥ आचार्यः ॥ कुमारंदक्षिणतउपवेश्य ॥ स्वयमुत्तरतउपवेश्य ॥
प्राणानायम्य ॥ इमंमहेश्वरशर्माणंसौम्यव्रतेनकर्मणासंस्करिष्यइतिसंक
ल्प्य ॥ सोमंकांडऋषिं ॥ सांहितीर्देवताउपनिषदः याज्ञिकीर्देवताउपनिषदः ॥

त्रिंगा वारुणीर्देवताउपनिषदः॥ ब्रह्मणेऽस्य यंस्तुवे॥ सदसस्पतिं॥ आवाह्य गंधपुष्पादिर

भ्यर्च्य॥ कुमारेणार्पणं कारइत्वा॥ अग्निं प्रतिष्ठाप्य॥ परिस्तीर्य द्व्याज्यस्थाल्यादिनि

॥५८॥ ष्पपात्राणि प्रयुज्य उपकोदकं च स्रौदुंबरः॥ समिधनुं तनव स्त्रांच सह प्रयुंज्य प्रोक्षणी त

नै संस्कारा घाज्या भागंकृत्वा॥ अग्नये स्वाहेत्येकादशाज्याहुतिं अग्नि मुखं हुतिं हुत्वा॥

य सोमांकाऽऋषये स्वाहा॥ सोमांकाऽऋषयइदं॥ सोमौ धेनुं सोमोअर्वंतमाशुं॥

सोमोवीरं कर्मण्यं ददातु॥ सादन्यं विदथ्यं सभेयं॥ पितृश्रवणं योददाशदस्मै॥ य

स्वाहा॥ सोमायेदं॥ अषाढं युत्सु पृतनासु पप्रिं॥ सुवर्षामप्स्वां वृजनस्य गोपां॥ भ ट द

रेषुजां सुक्षितिं सुश्रवसं॥ जयंतं त्वामनु मदेम सोम स्वाहा॥ सोमायेदं॥ सो ल्वः

ॠ मेनु फिः सुक्रतुर्भूः॥ त्वं दक्षैः सुदक्षो विश्ववेदाः॥ त्वं वृषा वृषत्वेभिर्महित्वा॥ द्युम्नेभि

र्द्युम्न्यभवो नृचक्षाः स्वाहा॥ सोमायेदं॥ या ते धामानि हविषा यजंति॥ गाहि

४४ मूः स्येवैनामेतत्तस्माद्विषाः प्रजाः आधंतोपि दसी त्याह ४

स्यास्त्ते सवसः प्रसवइत्याह सवितृप्रसूतामेववाचमवरुंधेकांडेकांडेवैक्रियमाणेयज्ञं र
क्षांसि जिघांसं त्येषखलुवाअरक्षोहतः पंथायोग्नेश्चसूर्यस्यचसूर्यस्यचक्षुरारुहमग्ने
रक्षःकनीनिकामित्याहयएवारक्षोहतः पंथास्तंसमारोहति ५ ॥ वाग्वाएषायत्सोमक्र
यणी चिदसिमनासीत्याहयद्धिमनसाभिगच्छति चेतपतेतद्वाचावदतिमनासीत्याहय
द्धिमनसाभिगच्छति तत्करोतिधीरसीत्याहयद्धिमनसाध्यायतितद्वाचा ५ ॥ वदति
दक्षिणासीत्याहदक्षिणासीत्याहह्येषायज्ञियासीत्याहयज्ञियामेवैनांकरोतिक्षत्रिया
सीत्याहक्षत्रियाह्येषादितिरस्युभयतःशीर्ष्णीत्याहयदेवादित्यःप्रायणीयोयज्ञा
नामादित्यउदयनीयस्तस्मादेवमाहयदबद्धास्यादयतास्याद्यत्पदिबद्धानुस्तर

सं.प.१ णीस्यात्समायुकोयजमानःस्यात्॥५॥पत्कर्णगृहीतावार्त्रघ्नीस्यात्सवार्त्रघ्नीयजिनीयान्तं
१२ वान्योजिनीयामित्रस्त्वापदिबध्नात्वित्याहमित्रोवैशिवोदेवानांतेनैवैनांपदिबध्ना
तिपूषाध्वनःपात्वित्याहेयंवैपूषेमामेवास्याअधिपामकःसमष्ट्याइंद्रायाध्यक्षायेत्य
त्याहेंद्रमेवास्याअध्यक्षंकरोति॥६॥अनुत्वामातामन्यतामनुपितेत्याहानुमतयैवै
नयाक्रीणातिसादेविदेवमच्छेहीत्याहदेवीह्येषादेवःसोमइंद्रायसोममित्याहेंद्रा
यहिसोमआह्रियतेयदेतद्यजुर्नब्रूयात्पराच्येवसोमक्रयणीयाद्रुद्रस्त्वावर्तयत्व
त्वित्याहरुद्रोवैक्रूरः॥७॥देवानांतमेवास्यैपरस्ताद्दधात्याहत्यैक्रूरमिववाएत १२
त्करोतियद्रुद्रस्यकीर्तयतिमित्रस्यपथेत्याहशांत्यैवाचावाएषविक्रीणीतेयः

सोमक्रयण्याःस्वस्तिसोमसखापुनरेहिसहरय्येत्याहवाचैवविक्रीयपुनरात्मन्वाचंधत्ते
नुपदासुकास्यवाग्भवतियएवंवेद॥८॥ सतनुंविष्णुवद्वित्याहसमारोहंतिध्यायाति
तद्वाचायजमानःस्यात्करोतिक्रूरेवेद॥७॥ ॥सप्तपदान्यनुनिष्क्रामतिषडहांवाङ्
नातिवदत्युतसंवत्सरस्यायनेयावत्येववाक्तामवरुंधेसप्तमेपदेजुहोतिसप्तपदाशाक्
रीपशवःशाक्करीपशूनेवावरुंधेसप्तग्राम्याःपशवःसप्तारण्याःसप्तछंदांस्युभयस्या
वरुध्येवस्व्यासिरुद्रासीत्याहरूपमेवास्याएतन्महिमानं॥१॥ व्याचष्टेबृहस्पतिस्त्वासु
म्नेरण्वत्वित्याहब्रह्मवैदेवानांबृहस्पतिर्ब्रह्मणैवास्मैपशूनवरुंधेरुद्रावसुभिराचिकेतु
त्याहव्यावृत्त्यैपृथिव्यास्त्वामूर्धन्नाजिघर्मिदेवयजनइत्याहपृथिव्याह्येषमूर्धायद्देवय

सं.ष.१ जनमिडायाःपदइत्याहेडायैह्येतत्पदंयत्सोमक्रयण्यैघृतवतिस्वाहा॥२॥इत्याहयदेवास्यैप
१२ दाद्घृतमपीड्यततस्मादेवमाहयदध्वर्युरनग्नावाहुतिंजुहुयादंधोध्वर्युःस्याद्रक्षांसियज्ञंहन्यु
र्हिरण्यमुपास्यजुहोत्यग्निवत्येवजुहोतिनांधोध्वर्युर्भवतिनयज्ञंरक्षांसिघ्नंतिकांडेकांडेवै
क्रियमाणेयज्ञंरक्षांसिजिघांसंतिपरिलिखितंरक्षःपरिलिखिताअरातयइत्याहर
क्षसामपहत्यै॥३॥इदमहंरक्षसोग्रीवाअपिकृंतामियोस्मान्द्वेष्टियंचवयंद्विष्मइत्याहद्वौ
वावपुरुषौयंचैवद्वेष्टियश्चैनंद्वेष्टितयोरेवानंतरायंग्रीवाःकृंततिपशवोवैसोमक्रयण्यैपदंयावन्मूतं
संवपतिपशूनेवावरुंधेस्मेरायइतिसंवपत्यात्मानमेवाध्वर्युः॥४॥पशुभ्योनांतरेतित्वेराय १३
इतियजमानायप्रयच्छतियजमानएवरयिंदधातितोतेरायइतिपत्नियाअर्धोवाएषआ

त्मनोयत्पत्नीयथाग्रहेषुनिधत्तेतादृगेवतत्त्वष्ट्रीमतीतेसंपेयेत्याहत्वष्टावैपशूनांमिथुनानाꣳरूपकृ
द्रूपमेवपशुषुदधात्यस्मैवैलोकायगार्हपत्यआधीयतेमुष्माआहवनीयोयद्गार्हपत्यमुपवपेदस्मिंलो
केपशुमांत्स्याद्यदाहवनीयेमुष्मिंलोकेपशुमांत्स्यादुभयोरुपवपत्युभयोरेवैनंलोकयोःपशुमंतंकरो
ति॥५॥महिमानꣳस्वाहापत्याअध्वर्युर्धरयतेचतुर्विꣳशतिश्च॥८॥ब्रह्मवादिनोवदंतिविचित्यःसोमा३
नविचित्या३इतिसोमोवाओषधीनाꣳराजातस्मिन्यदापन्नंग्रसितमेवास्यतद्यद्विचिनुयाद्यथास्याद्ग्र
सितंनिष्खिदतितादृगेवतद्यन्नविचिनुयाद्यथाक्षन्नापन्नंविधावतितादृगेवतत्क्षोधुकोध्वर्युस्यात्क्षोधु
कोयजमानःसोमविक्रयिंत्सोमꣳशोधयेत्येवब्रूयाद्यदीतरं॥१॥यदीतरमुभयेनैवसोमविक्रयिण
मर्पयतितस्मात्सोमविक्रयीक्षोधुकोरुणोहस्माहौपवेशिःसोमक्रयणएवाहंतृतीयसवनमवकं

सं.ब.१
१४

धइतिपशवोंपशूनांचर्मणाभिमिमीतेपशूनेवावरुंधेपशवोवोदितिनतीर्थंसवनंयंकामय

येतापशुःस्यादित्यृक्षतस्तस्यविमिमीतऋक्षंवाअपशव्यमपशुरेवभवतियंकामयेतप

शुमांत्स्यादितिलोमतस्तस्यविमिमीतेतद्वैपशूनांरूपंरूपेणैवास्मैपशूनव

रुंधेपशुमानेवभवत्यपांमंतेक्रीणातिसरसमेवैनंक्रीणात्यमात्योसीत्याहामैवैनंकुरुते

शुक्रस्तेग्रहइत्याहशुक्रोह्यस्यग्रहोनसाधुयातिमहिमानंसमेवास्याधुयात्यनसा॥३॥

अथधयातितस्मादनोवाह्यंसमेजीवनंयत्रखलुवाएतंशीर्ष्णाहरंतितस्माच्छीर्षहा

र्यंगिरावध्यधिजीवनमभित्यंदेवंसवितारमित्यतिच्छंदसर्चाविमिमीतेतिच्छंदावैसर्वाणिछं १४

दांसिसर्वेभिरेवैनंछंदोभिर्विमिमीतेवर्ष्मवाएषाछंदसांयदतिछंदायदतिछंदस

वावरथंतरमसौबृहत्ताभ्यामेवयंत्यथोअनयोरेवप्रतितिष्ठंत्येवैयज्ञस्यांजुसायनी
स्रुतीताभ्यामेवसुवर्गंलोकंयंतिपरांचोवाएतेसुवर्गंलोकमभ्यारोहंतियेपराचीना
निपृष्ठान्युपयंतिप्रत्यङ्‌ःत्र्यहोभवतिप्रत्यवरूढ्याअथोप्रतिष्ठित्याउभयोर्लोकयो
र्ऋद्ध्वोत्तिष्ठंत्यतिरात्रावभितोभवतोब्रह्मवर्चसस्यांनाद्यस्यपरिगृहीत्यै॥३॥ ॥वृं
जतेब्रह्मचानंचसुवर्गमेतेसुवर्गंत्रयोविंशातिश्चा॥२॥ ॥असावादित्योस्मिंल्लोक
आसीत्तंदेवाःपृष्ठैःपरिगृह्यसुवर्गंलोकमगमयन्परैरवस्तात्पर्यगृह्णंदिवाकीर्त्ये
नसुवर्गेलोकेप्रत्यस्थापयन्परैःपरस्तात्पर्यगृह्णन्पृष्ठैरुपावारोहंत्सवाअसावा
दित्योमुष्मिंल्लोकेपरैरुभयतःपरिगृहीतोयत्पृष्ठानिभवंतिसुवर्गमेवतेलोकंयज

प॰सं॰म॰ । मानायंतिपरैरवस्तात्परिगृह्णंतिदिवाकीर्त्येन ॥१॥ सुवर्गेलोकेप्रतितिष्ठंतिपरैःपुरस्ता ॥३॥
॥२१॥ त्परिगृह्णंतिपृष्ठैरुपावरोहंतियत्परैःपुरस्तान्नस्युःपरांचःसुवर्गाल्लोकान्निष्पद्येरन्य
द्वस्तान्नस्युःप्रजानिर्दहेयुरभितोदिवाकीर्त्यंपरःसामानोभवंतिसुवर्गएवैनांल्लोक
उभयतःपरिगृह्णंतियजमानावैदिवाकीर्त्यंसंवत्सरःपरःसामानोभितोदिवाकी
र्त्यंपरःसामानोभवंतिसंवत्सरएवोभयतः ॥२॥ प्रतितिष्ठंतिपृष्ठंवैदिवाकीर्त्यंपार्श्वेप
रःसामानोभितोदिवाकीर्त्यंपरःसामानोभवंतितस्मादभितःपृष्ठंपार्श्वेभूयिष्ठायहागृ
ह्यंतेभूयिष्ठाःशस्यंतेयज्ञस्यैवतन्मध्यतोग्रंथिंग्रथ्नंत्यविस्रंसायसप्तगृह्यंतेसप्त ॥२१॥
वैशीर्षण्याःप्राणाःप्राणानेवयजमानेषुदधतियत्पराचीनानिपृष्ठानिभवंत्यमुमेव

तेलोर्कमभ्यारोहंतियदिमंलोकंन॥३॥प्रत्यवरोहेयुरुन्माद्येयु र्यजमानाःप्रमीये
रन्यत्सतीचीनानिपृष्ठानिभवंतीममेवतेलोर्कंप्रत्यवरोहंत्यथोअस्मिन्नेवलोकेप्रति
तिष्ठंत्यनुन्मादायेंद्रोवाअप्रतिष्ठितआसीत्सप्रजापतिमुपाधावत्तस्माएतमेकविंश
तिरात्रंप्रायच्छत्तमाहरत्तेनायजततोवैसप्रत्यतिष्ठद्येबह्वयाजिनोप्रतिष्ठिता॥४॥
स्युस्तएकविंशतिरात्रमासीरन्द्वादशमासाःपंचर्तवस्त्रयइमेलोकाअसावादित्यए
कविंशएतावंतोवैदेवलोकास्तेष्वेवयथापूर्वंप्रतितिष्ठंत्यसावादित्योनव्यरोचतसप्र
जापतिमुपाधावत्तस्माएतमेकविंशतिरात्रंप्रायच्छत्तमाहरत्तेनायजततोवैसोरो
चतयएवंविद्वांसएकविंशतिरात्रमासतेरोचंतएवैकविंशतिरात्रोभवतिरुग्वा

स॰स॰ एकविꣳशोरुचमेवगच्छंत्यथोप्रतिष्ठामेवप्रतिष्ठाह्येकविꣳशोतिरात्रावभितोभवतो ३
३० ब्रह्मवर्चसस्यपरिगृहीत्यै॥५॥ ॥गृहंतिद्विवाकीर्त्येनैवोभयतोनाप्रतिष्ठिताआस
तएकविꣳशतिश्च॥१०॥ ॥अर्वाङ्‌यज्ञःसंक्रामत्वमुष्मादधिमामभि॥ऋषीणांयः
पुरोहितः॥निर्देवंनिर्वीरंकृत्वाविष्कंधंतस्मिन्हीयतांयोस्मान्द्वेष्टि॥शरीरंयज्ञशमलं
कुसीदंतस्मिंत्सीदतुयोस्मान्द्वेष्टि॥यज्ञयज्ञस्यययत्तेजःस्तेनसंक्राममामभि॥ब्राह्म
णानृत्विजोदेवान्य ज्ञस्यतपसातेसवाहमाहुवे॥इष्टेनपक्वमुप॥१॥तेहुवेसवाहं॥
सं तेवृंजेसुकृतःसंप्रजांपशून्॥प्रैषान्सामिधेनीराघारावाज्यभागावा श्रुतंप्रत्या सु ३०
तमावृणामिते॥प्रयाजानूयाजान्स्विष्टकृतमिडामाशिष आवृंजेसुवः॥अग्निनेंद्रे

णसोमेनसरस्वत्याविष्णुनादेवताभिः।याज्यानुवाक्याभ्यामुपतेऽह्वेसर्वाहंयज्ञमा
ददेतेवषट्कृतं।स्तुतꣳशस्त्रंप्रतिगरंग्रहमिडामाशिषः।२।आवद्ञ्जेसुवः।पत्नीसंया
जानुपतेऽह्वेसर्वाहꣳसमिष्टयजुराददेतव।पशून्त्सुतंपुरोडाशान्त्सवनान्योतयज्ञं।
देवान्त्सेन्द्रानुपतेऽह्वेसर्वाहमग्निमुखान्त्सोमवतोयेचविश्वे।३।भूप्यहमिडामाशिषो
हानिꣳशाच्च।११। ।भूतंभव्यंभविष्यद्वषट्स्वाहानमऋक्सामयजुर्वषट्स्वाहानमो
गायत्रीत्रिष्टुब्जगतीवषट्स्वाहानमःपृथिव्यन्तरिक्षंद्यौर्वषट्स्वाहानमोग्निर्वायुःसूर्योव
षट्स्वाहानमःप्राणोव्यानोपानोवषट्स्वाहानमोन्नंकृषिर्वृष्टिर्वषट्स्वाहानमःपितापुत्रःपौ
त्रोवषट्स्वाहानमोभूर्भुवःसुवर्वषट्स्वाहानमः।१।भुवश्चत्वारिच।१२। ।आग्नेगृहा

॥स॰स॰॥ भवंत्वाप्रजामआमायुज्ञोविशतुवीर्यावान्॥आपोदेवीर्यज्ञियामाविशंतुसहस्रस्यमाभू ॥३॥
॥३१॥ मामाप्रहासीत्॥आमेयज्ञोभवत्वापुरोरुक्स्तुतशस्त्रेमाविशतांसमीची॥आदित्यारुद्रा
वसवोमेसदस्याःसहस्रस्यमाभूमामाप्रहासीत्॥आमाग्निष्टोमोविशतूक्थ्यश्चातिरात्रो
माविशत्वापिशर्वरः॥तिरोअह्नियामासुहुताआविशंतुसहस्रस्यमाभूमामाप्रहासीत्॥
॥१॥ ॥अग्निष्टोमोविशत्वष्टादशच॥१३॥ ॥अग्निनातपोन्वभवद्वाचाब्रह्ममणिना
रूपाणींद्रेणदेवान्वातेनप्राणान्सूर्येणद्यांचंद्रमसानक्षत्राणियमेनपितृन्राज्ञामनुष्या
न्फलेननादेयानजगरेणसर्पान्व्याघ्रेणारण्यान्पशूंश्येनेनपतत्रिणोवृष्णाश्वानृष ॥३१॥
भेणगाबस्तेनाजावृष्णिनावीर्व्रीहिणान्नानियवेनौषधीर्न्यग्रोधेनवनस्पतीनुदुंब

रेणोजैंगायत्रियाछंदाःसित्रिवृतास्तोमोब्राह्मणेनवाचं॥१॥ ॥ब्राह्मणेनैकंच॥
॥१४॥ ॥स्वाहाधिमाधीतायस्वाहास्वाहाधीतंमनसेस्वाहास्वाहामनःप्रजापतयेस्वाहा
कायस्वाहाकस्मैस्वाहाकतमस्मैस्वाहादित्यैस्वाहादित्यैमह्यैस्वाहादित्यैसुमृडीकायै
स्वाहासरस्वत्यैस्वाहासरस्वत्यैबृहत्यैस्वाहासरस्वत्यैपावकायैस्वाहापूष्णेस्वाहापूष्णे
प्रपथ्यायस्वाहापूष्णेनरंधिषायस्वाहात्वष्ट्रेस्वाहात्वष्ट्रेतुरीपायस्वाहात्वष्ट्रेपुरुरूपाय
स्वाहाविष्णवेस्वाहाविष्णवेनिखुर्यपायस्वाहाविष्णवेनिभूयपायस्वाहासर्वस्मैस्वाहा॥
॥१॥ ॥पुरुरूपायस्वाहादशच॥१५॥ ॥दद्भ्यःस्वाहाहनूभ्यांस्वाहोष्ठाभ्यांस्वाहामु
खायस्वाहानासिकाभ्यांस्वाहाक्षीभ्यांस्वाहाकर्णाभ्यांस्वाहापारइक्षवोवार्येभ्यः

॥ सं॰स॰ ॥ पक्ष्मभ्युः स्वाहावार्येभ्यः पार्येभ्युः पक्ष्मभ्युः स्वाहा शीर्ष्णे स्वाहा भ्रुभ्याः स्वाहा ललाटा ॥ ३ ॥
॥ ३२ ॥ यु स्वाहा मूर्ध्ने स्वाहा मस्तिष्काय स्वाहा केशेभ्युः स्वाहा वहाय स्वाहा ग्रीवाभ्युः स्वाहा
स्कंधेभ्युः स्वाहा कीकसाभ्युः स्वाहा पृष्टीभ्युः स्वाहा पाजस्याय स्वाहा पार्श्वाभ्याः स्वाहा ॥
॥ ११ ॥ अंसाभ्याः स्वाहा दोषभ्याः स्वाहा बाहुभ्याः स्वाहा जंघाभ्याः स्वाहा श्रोणीभ्या
ः स्वाहोरुभ्याः स्वाहाष्ठीवद्भ्याः स्वाहा जंघाभ्याः स्वाहा भसदे स्वाहा शिखंडेभ्युः
स्वाहा वालधानाय स्वाहांडाभ्याः स्वाहा शेपाय स्वाहा रेतसे स्वाहा प्रजाभ्युः स्वाहा ॥ ३२ ॥
प्रजननाय स्वाहा पद्भ्युः स्वाहा शफेभ्युः स्वाहा लोमभ्युः स्वाहा त्वचे स्वाहा लोहिता
य स्वाहा मांसाय स्वाहा स्नावभ्युः स्वाहास्थभ्युः स्वाहा मज्जभ्युः स्वाहांगेभ्युः स्वा

ह्यात्मनेस्वाहासर्वस्मैस्वाहा॥२॥ ॥पार्श्वाभ्याꣳस्वाहामुञ्जाभ्युःस्वाहापञ्च॥१६॥ ॥
अञ्ज्येतायस्वाहाञ्जिसक्थाय स्वाहाशितिपदेस्वाहाशितिककुदेस्वाहाशितिरन्ध्रा
यस्वाहाशितिपृष्ठायस्वाहाशित्यꣳसायस्वाहापुष्पकर्णाय स्वाहाशित्योष्ठाय स्वा
हाशितिभ्रवेस्वाहाशितिभसदेस्वाहाश्वेतानूकाशायस्वाहाञ्जयेस्वाहाललामा
यस्वाहासितज्ञवेस्वाहाकृष्णैतायस्वाहारोहितैतायस्वाहारुणैताय स्वाहेदृशाय
स्वाहाकीदृशायस्वाहातादृशाय स्वाहासदृशाय स्वाहाविसदृशाय स्वाहासुस
दृशाय स्वाहारूपायस्वाहासर्वस्मैस्वाहा॥१॥ ॥रूपाय स्वाहाद्वे च॥१७॥ ॥कृष्णा
य स्वाहाश्वेताय स्वाहापिशंगाय स्वाहासारंगाय स्वाहारुणायस्वाहागौराय

॥सं॰म॰॥ स्वाहाबभ्रवेस्वाहानकुलायस्वाहारोहिताय स्वाहाशोणाय स्वाहाश्यावाय स्वा ३
॥३३॥ हाश्यामाय स्वाहापाकलाय स्वाहासुरूपाय स्वाहानुरूपाय स्वाहा
विरूपाय स्वाहासरूपाय स्वाहाप्रतिरूपाय स्वाहाशबलाय स्वा
हाकमलायस्वाहापृश्नयेस्वाहापृश्निसक्थाय स्वाहासर्वस्मैस्वाहा॥१॥
॥कृष्णायषड्चत्वारिंशत्॥१८॥ ॥ओषधीभ्यःस्वाहामूलेभ्यःस्वाहा
तूलेभ्यःस्वाहाकांडेभ्यःस्वाहावल्शेभ्यःस्वाहापुष्पेभ्यःस्वाहाफलेभ्यः ३३
स्वाहागृहीतेभ्यःस्वाहागृहीतेभ्यःस्वाहावपन्नेभ्यःस्वाहाशयानेभ्यः

स्वाहा सर्वस्मै स्वाहा ॥१॥ ॥ओषधीभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा स्कंधेभ्यः स्वाहा शाखाभ्यः स्वाहा पर्णेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा गृहीतेभ्यः स्वाहा गृहीतेभ्यः स्वाहा वपन्नेभ्यः स्वाहा शयानेभ्यः स्वाहा शिष्टाय स्वाहाति शिष्टाय स्वाहा परिशिष्टाय स्वाहा संशिष्टाय स्वाहोछिष्टाय स्वाहा रिक्ताय स्वाहा रिक्ताय स्वाहा प्ररिक्ताय स्वाहा संरिक्ताय स्वाहोद्रि

सं·स· काय स्वाहा सर्वस्मै स्वाहा ॥१॥ वनस्पतिभ्यः षड्‍ त्वा विंशति ॥२०॥ ॥प्रजवं त्वत्वा ३
३४ दिनः किं मे षवा आप्त आदित्या उभयोः प्रजापतिरन्वायुं निंद्रो वै सह इंद्रो वै शिथि
लः प्रजापतिरकामयत तां न्नादः सा विराड सावादित्यो वीडुः भूतमामे ग्निना स्वाहाधिं
द्द्योजोंज्येतायकृष्णायौषधीभ्यो वनस्पतिभ्यो विंशतिः ॥२०॥ ॥प्रजवं प्रजापति
र्यदेछं द्रोमं तेडु वेसवाहमोषधीभ्यो हिच त्वा विंशति ॥४२॥ ॥हरिः ॐ॥ ॥श्री
कृष्णार्पणमस्तु ॥ ॥श्रीसद्गुरुचरणारविंदार्पणमस्तु ॥ ॥श्रीगुरुर्जयति ॥ ॥ ३४
॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥श्रीगुरुभ्योनमः॥ ॥हरिःॐ॥ ॥बृहस्पतिरकामयतश्रन्मेदेवादधीरन्गच्छेयंपु
रोधामितिसएतंचतुर्विंशतिरात्रमपश्यत्तमाहरत्तेनायजतततोवैतस्मैश्रद्देवा
अदधतागच्छत्पुरोधांयएवंविद्वांसश्चतुर्विंशतिरात्रमासतेश्रदेभ्योमनुष्याद
धतेगच्छंतिपुरोधांज्योतिर्गौरायुरितित्र्यहाभवंतीयंवावज्योतिरंतरिक्षंगौरसा
वायुः॥१॥इमानेवलोकानभ्यारोहंत्यभिपूर्वंत्र्यहाभवंत्यभिपूर्वमेवसुवर्गंलोक
मभ्यारोहंत्यसत्रंवाएतद्यदछंदोमंयच्छंदोमाभवंतितेनसत्रंदेवताएवपृष्ठैर
वरुंधतेपशूंछंदोमैरोजोवैवीर्यंपृष्ठानिपशवश्छंदोमाओजस्येववीर्येपशुषुप्र

स·स तितिष्ठंतिबृहद्रथंतराभ्यांयंतीयंवावरथंतरमसौबृहदाभ्यामेवा॥२॥यंत्यथोअ ४
३५ नयोरेवप्रतितिष्ठंत्येतेवैयज्ञस्यांजसायनीसृतीताभ्यामेवसुवर्गंलोकंयंतिच
तुर्विंशतिरात्रोभवतिचतुर्विंशतिरर्धमासाःसंवत्सरःसंवत्सरःसुवर्गोलोकःसं
वत्सरएवसुवर्गेलोकेप्रतितिष्ठंत्यथोचतुर्विंशत्यक्षरागायत्रीगायत्रीब्रह्मवर्च
संगायत्रियैवब्रह्मवर्चसमवरुंधतेतिरात्रावभितोभवतोब्रह्मवर्चसस्यपरिगृही
त्यै॥३॥ ॥अंतरिक्षंगौरसावायुराभ्यामेवपंचचत्वारिंशस्त्वो॥१॥ ॥यथावैमनु ३५
ष्याएवंदेवाअग्रआसंतेकामयंतावर्तिंपाप्मानंमृत्युमपहत्यदैवींसंसदंग
च्छेमेतितएतंचतुर्विंशतिरात्रमपश्यंतमाहरंतेनायजंततोवैतेवर्तिंपाप्मा

नंमृत्युमपहत्यदैवीःसःसदमगच्छन्यएवंविद्वाःसश्चतुर्विःशतिरात्रमासते
वर्तिमेवपाप्मानमपहत्यश्रियंगच्छंतिश्रीर्हिमनुष्यस्य॥१॥दैवीःसःसज्ज्योतिरति
रात्रोभवतिसुवर्गस्यलोकस्यानुख्यात्यैपृष्ठ्यःषडहोभवतिषड्वाऋतवःसंवत्सर
स्तंमासाअर्धमासाऋतवःप्रविश्यदैवीःसःसदमगच्छन्यएवंविद्वाःसश्चतुर्वि
ःशतिरात्रमासतेसंवत्सरमेवप्रविश्यवस्यसीःसःसदंगच्छंतित्रयस्त्रयस्त्रिः
शाअवस्ताद्भवंतित्रयस्त्रयस्त्रिःशाःपरस्तात्त्रयस्त्रिःशैरेवोभयतोवर्तिंपाप्मा
नमपहत्यदैवीःसःसदमध्यत॥२॥गच्छंतिपृष्ठानिहिदैवीसःसज्जामिवाए

स॰स॰ तत्कुर्वंतियत्त्रयस्त्रयस्त्रिꣳशाअन्नंचोमध्येनिरुक्तोभवतितेनाजाम्यूर्ध्वानिपृष्ठा ४
३६ निभवंत्यूर्ध्वाश्छंदोमाउभाभ्याꣳरूपाभ्याꣳसुवर्गंलोकंयंत्यसत्त्रंवाएतद्यदछं
दोमंयच्छंदोमाभवंतितेनसत्त्रंदेवताएवपृष्ठैरवरुंधतेपशूंछंदोमैरोजोवैवीर्यंपृ
॥२॥ ष्ठानिपशवश्छंदोमाओजस्येववीर्येपशुषुप्रतितिष्ठंतित्रयस्त्रयस्त्रिꣳशाअवस्ता
द्भवंतित्रयस्त्रयस्त्रिꣳशाःपरस्तान्मध्येपृष्ठान्युरोवैत्रयस्त्रिꣳशाआत्मापृष्ठान्या
त्मनएवतद्यजमानाःशर्मनह्यंतेनार्त्यैबृहद्रथंतराभ्यांयंतीयंवावरथंतरमसौबृ
हदाभ्यामेवयंत्यथोअनयोरेवप्रतितिष्ठंत्येतेवैयज्ञस्याञ्जसायनीस्रुतीताभ्यामे ३८
वा॥४॥सुवर्गंलोकंयंतिपराञ्चोवाएतेसुवर्गंलोकमभ्यारोहंतियेपराचीनानिपृष्ठा

न्युपयंतिप्रत्यङ्षडहोभवतिप्रत्यवरूढ्याअथोप्रतिष्ठित्याउभयोर्लोकयोर्ऋध्नोति
ष्ठंतित्रिवृतोधित्रिवृतमुपयंतिस्तोमानांसंपत्त्यैसप्रभवायज्योतिरग्निष्टोमोभवत्ययंवा
वसक्षयोस्माद्देवतेनक्षयान्नयंतिचतुर्विंशतिरात्रोभवतिचतुर्विंशतिरर्धमासाः
संवत्सरःसंवत्सरःसुवर्गोलोकःसंवत्सरएवसुवर्गेलोकेप्रतितिष्ठंत्यथोचतुर्विंश
त्यक्षरागायत्रीगायत्रीब्रह्मवर्चसंगायत्रियैवब्रह्मवर्चसमवरुंधतेतिरात्रावभितोभ
वतोब्रह्मवर्चसस्यपरिगृहीत्यै॥५॥ ॥मनुष्यस्यमध्यतःपृष्ठवृत्ताभ्यामेवसंवत्सरश्च
तुर्विंशतिश्च॥२॥ ॥ऋक्षावाइयमलोमकासीत्साकामयतौषधीभिर्वनस्पतिभिः
प्रजायेयेतिसैतांस्त्रिंशतंरात्रीरपश्यत्ततोवाइयमोषधीभिर्वनस्पतिभिःप्राजायत

स.स. येप्रजाकामाः पशुकामाः स्युस्त एता आसीरन्प्रैवजायन्ते प्रजया पशुभिरियं वा अक्षु ४
३८ धत्सैनां विराजमपश्यन्तामालभित्वान्नाद्यमवारुन्धौषधीः ॥१॥ वनस्पतीन्प्रजां
पशूनतेनावर्धन्त साजेमानं महिमानमगच्छद्य एवं विद्वांसस्ता आसते वि
राजमेवालभित्वान्नाद्यमवरुन्धते वर्धन्ते प्रजया पशुभिर्जेमानं गच्छन्ति ज्योति
रतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै पृष्ठ्यः षडहो भवति षड्वा ऋ
तवः षट्पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव ॥२॥
प्रतितिष्ठन्ति त्रयस्त्रिंशात्त्रयस्त्रिंशमुपयन्ति यज्ञस्य सन्तत्या अथो ३८
प्रजापतिर्वै त्रयस्त्रिंशः प्रजापतिमेवारभन्ते प्रतिष्ठित्यै त्रिणवो भव

तिविजित्याएकविꣳशोभवतिप्रतिष्ठित्याअथोरुचमेवात्मंदधतेत्रिवृदग्निष्टुद्भव
तिपाप्मानमेवतेननिर्दहंतेथोतेजोवैत्रिवृत्तेजएवात्मंदधतेपंचदशाइंद्रस्तोमोभ
वतींद्रियमेवाव॥३॥रुंधतेसप्तदशोभवत्यन्नाद्यस्यावरुध्याअथोप्रैवतेनजायंत
एकविꣳशोभवतिप्रतिष्ठित्याअथोरुचमेवात्मंदधतेचतुर्विꣳशोभवतिचतुर्विꣳश
तिरर्धमासाःसंवत्सरःसंवत्सरःसुवर्गोलोकःसंवत्सरएवसुवर्गेलोकेप्रतितिष्ठंत्य
थोएषवैविषुवान्विषुवंतोभवंतियएवंविद्वाꣳसएतामासतेचतुर्विꣳशात्पृष्ठान्युप
यंतिसंवत्सरएवप्रतिष्ठाय॥४॥देवताअभ्यारोहंतित्रयस्त्रिꣳशात्त्रयस्त्रिꣳशमुपयं
तित्रयस्त्रिꣳशद्वैदेवतादेवतास्वेवप्रतितिष्ठंतित्रिणवोभवतीमेवैलोकास्त्रिणवए

संःस· ष्वेवलोकेषुप्रतितिष्ठंतिद्वावेकविंशौभवतःप्रतिष्ठित्याअथोरुचमेवात्मंदधतेबृहद्वः ४
३९ षोडशिनोभवंतितस्माद्बृहद्वःप्रजासुवृषाणोय देतेस्तोमाव्यतिषक्ताभवंतितस्मा
दियमोषधीभिर्वनस्पतिभिर्व्यतिषक्ता॥५॥व्यतिषज्यंतेप्रजयापशुभिर्यएवंवि
द्वांसएताआसतेकॢप्तावाएतेसुवर्गंलोकंयंत्यृचावावचानूहिस्तोमानुपयंतियदू
र्ध्वाःकॢप्तास्तोमाभवंतिकॢप्ताएवसुवर्गंलोकंयंत्युभयोरेभ्योलोकयोःकल्पतेत्रि
ंशादेतास्त्रिंःशदक्षराविराडन्नंविराड्विराजैवांनाद्यमवरुंधतेतिरात्रावभितोभव ३९
तोंनाद्यस्यपरिगृहीत्यै॥६॥ ॥ओषधीःसंवत्सरएवावप्रतिष्ठायव्यतिषक्तैकांनपं

च्चा शञ्चा॥३॥ ॥प्रजापतिः सुवर्गंलोकमैतंदेवा येनयेन छंदसानुप्रायुंजत तेन नान्व
वंत एता द्वात्रिꣳशतꣳरात्रीरपश्यंद्वात्रिꣳशदक्षरानुष्टुगानुष्टुभः प्रजापतिः स्वेनैव
छंदसा प्रजापतिमाप्त्वाभ्यारुह्य सुवर्गंलोकमायन्य एवंविद्वाꣳस एता आसते द्वा
त्रिꣳशदेता द्वात्रिꣳशदक्षरानुष्टुगानुष्टुभः प्रजापतिः स्वेनैव छंदसा प्रजापतिमा
त्वा श्रियंगछंति॥१॥ श्रीर्हि मनुष्यस्य सुवर्गो लोको द्वात्रिꣳशदेता द्वात्रिꣳशदक्षरा
नुष्टुग्वागनुष्टुप्सर्वामेव वाचमाप्नुवंति सर्वे वाचो वदितारो भवंति सर्वे हि श्रियंगछं
ति ज्योतिर्गौरायुरिति त्र्यहा भवंतीयंवाव ज्योतिरंतरिक्षंगो रसा वायुरिमानेव लो

स·स·॥ कानुभ्यारोहंत्यभिपूर्वं त्र्यहाभवंत्यभिपूर्वमेवसुवर्गंलोकमभ्यारोहंतिबृहद्रथंतराभ्यां ४
३९ यंति॥२॥इयंवावरथंतरमसौबृहत्ताभ्यामेवयंत्यथोअनयोरेवप्रतितिष्ठंत्येतेवैयज्ञस्यांज
सायनीस्रुतीताभ्यामेवसुवर्गंलोकंयंतिपराञ्चोवाएतेसुवर्गंलोकमभ्यारोहंतियेपराञ्चंत्र्य
हानुपयंतिप्रत्यङ्त्र्यहोभवतिप्रत्यवरूढ्याअथोप्रतिष्ठित्याउभयोर्लोकयोर्ऋध्वोत्तिष्ठंतिद्वा
त्रिंशदेतास्तासांयास्त्रिंशत्त्रिंशदक्षराविराडन्नंविराड्विराज्येवान्नाद्यमवरुंधतेयेद्वेअहो
रात्रेएवतेउभाभ्यांरूपाभ्यांसुवर्गंलोकंयंत्यतिरात्रावभितोभवतःपरिगृहीत्यै॥३॥ ॥
गच्छंतियंतित्रिंशदक्षराह्याविंशतिश्च॥४॥ ॥देवावावदेवसत्त्रेद्वादशाहश्चैवत्र्यहास्त्रि ३९
ंशदहश्चयएवंविद्वांसस्त्रयस्त्रिंशदहमासतेसाक्षाद्देवदेवताअभ्यारोहंतियथा

खलुवैश्रेयानुभ्यारूढःकामयतेतथाकरोतियद्यैवंविध्यैतिपापीयान्भवतियद्विना
वविथ्यातिसहङ्‌यएवंविद्वांसःसत्रयास्त्रिंशदहमासतेविपाप्मनाभ्रातृव्येणावर्तंते
हर्भिर्जीवाएतादेवाअमृत्यआहरंन्॥१॥अहरेकोभजताहरेकस्ताभिर्वैतेप्रबाहुगार्ध्नु
वन्यएवंविद्वांसःसत्रयास्त्रिंशदहमासतेसर्वएवप्रबाहुगृध्नुवंतिसर्वेग्रामणीयंप्रा
प्नुवंतिपंचाहाभवंतिपंचवाऋतवःसंवत्सरऋतुष्वेवसंवत्सरेप्रतितिष्ठंत्ययोपंचा
क्षरापंक्तिःपांक्तोयज्ञोयज्ञमेवावरुंधतेत्रीण्याश्विनानिभवंतित्रयइमेलोकाएषु॥२॥
एवलोकेषुप्रतितिष्ठंत्ययोत्रीणिवैयज्ञस्येंद्रियाणितान्येवावरुं धतेविश्वजिद्भवत्य

स॰स॰ न्नाद्यस्यावरुध्यैसर्वस्तोमोभवतिसर्वस्याभिजित्यैवाग्वै द्वादशाहोयत्पुरस्ताद्द्वादशाह ४
४० मुपेयुरनाप्तांवाचमुपेयुरुपदासुकै षांवाक्स्याद्युपरिष्टाद्द्वादशाहमुपयंत्याप्ता
मेववाचमुपयंतितस्मादुपरिष्टाद्वाचावदामोवांतरंवा॥३॥वैदशरात्रेणप्रजापतिःप्र
जाअसृजतयद्दशरात्रोभवतिप्रजाएवतद्यजमानाःसृजंतएताःहवाउदंकःशौ
ल्बायनःसत्रस्यर्धिमुवाचयद्दशरात्रोयद्दशरात्रोभवतिसत्रस्यर्ध्याअथोयद्देव
पूर्वेष्वहःसुविलोमक्रियतेतस्यैवैषाशांतिर्द्व्यनीकावाएतारात्रयोयजमानावि ४०
भ्रजित्सहातिरात्रेणपूर्वाःषोडशसहातिरात्रेणोत्तराःषोडशयएवंविद्वांसः

स्त्रयस्त्रिंशदहमासतएषांद्यनीकाप्रजाजायतेतिरात्रावभितोभवतःपरिगृ
हीत्यै॥४॥ ॥अहर्वैतेषांवातन्नःषोडशसहस्रन्दशच॥५॥ ॥आदित्याअकाम
यंतसुवर्गंलोकमियामेतितेसुवर्गंलोकंनप्रजानन्नसुवर्गंलोकमायंतएतं
षट्त्रिंशद्रात्रमपश्यंतमाहरंतेनायजंतततोवैतेसुवर्गंलोकंप्राजानन्त्सुवर्गं
लोकमायन्यएवंविद्वांसःषट्त्रिंशद्रात्रमासतेसुवर्गमेवलोकंप्रजानंति
सुवर्गंलोकंयंतिज्योतिरतिरात्रः॥१॥भवतिज्योतिरेवपुरस्ताद्दधतेसुवर्ग
स्यलोकस्यानुख्यात्यैषडहाभवंतिषड्वाऋतवऋतुष्वेवप्रतितिष्ठंतिचत्वा

सं·स· रोभवंतित्रिवृतस्तोदिशोदिक्ष्वेवप्रतितिष्ठंत्यसंत्रंवाएतद्यदछंदोमंयछंदोमाभवं ४
४१॥ तितेनसत्रंदेवताएवपृष्ठैरवरुंधतेपशूंछंदोमैरोजोवैवीर्यंपृष्ठानिपशवश्छंदोमा
ओजस्येव॥२॥वीर्येप्रतितिष्ठंतिषड्विंशोभवतिषड्विंशत्यक्षराबृ
हतीबार्हताःपशवोबृहत्यैवपशूनवरुंधेबृहतीछंदसांस्वाराज्यमाश्नु ता ने
श्नुवतेस्वाराज्यंयएवंविद्वांसःषड्विंशमासतेसुवर्गमेवलोकंयंत्याति
रात्राववभितोभवतःसुवर्गस्यलोकस्यपरिगृहीत्यै॥३॥ ॥अतिरात्रओजस्येवषड्विं
शश्च॥६॥ ॥वसिष्ठोहतपुत्रोकामयतविंदेयप्रजामभिसौदासान्भवेयमिति ४१
सएतमेकस्मान्नपंचाशमपश्यत्तमाहरत्तेनायजतततोवैसोविंदतप्रजामभि

सौ द्वासानेभवध्य एवंविद्वांसः स एकस्मान्नपंचाशमासते विंदंते प्रजा प्रभिम्नात्
व्यान्भवंति त्रयस्त्रिवृतोग्निष्टोमा भवंति वज्रो वैस्त्रैव मुखतः स्तंञ्यंति दशपंचदशा भ
वंति पंचदशो वज्रः॥१॥ वज्रमेव भ्रातृव्येभ्यः प्रहरंति षोडशिमद्दशाममहर्भव
ति वज्र एव वीर्यं दधति द्वादशसप्तदशा भवंत्यन्नाद्यस्यावरुध्या अथो प्रैव तेजा
यंते पृष्ठ्यः षडहो भवति षड्वा ऋतव ऋतुष्व दृष्टानि पृष्ठैरेवर्तूनन्वारोहंत्यृतुभिः
संवत्सरं ते संवत्सर एव प्रतितिष्ठंति द्वाद्वैशौक विंशा भवंति प्रतिष्ठित्या अथो रु
चमेवात्मन॥२॥ दधते बहवः षोडशिनो भवंति विजित्यै षडाश्विनानि भवंति ष

सं॰स॰ ड्डूनं तर्वन्त्युत्तमेवसतितिष्ठंत्यूनातिरिक्तावाएतारात्रयर्यदूनास्तद्यदेकस्मान्नपं ४
४२ चाशदतिरिक्तास्तद्यद्भूयसीरष्टाचत्वारिंशतऊनाखलुवाअतिरिक्तात्प्र
जापतिरप्रजायतयेप्रजाकामाःपशुकामास्युस्तएताआसीरन्प्रैवजायंतेप्रजया
पशुभिर्वैराजोवाएषयज्ञोयदेकस्मान्नपंचाशोयएवंविद्वांसएकस्मान्नपंचा
शमासतेविराजमेवगच्छंत्यन्नादाभवंत्यतिरात्रावभितोभवतोन्नाद्यस्यपरिगृ
हीत्यै॥३॥ ॥वज्रआत्मन्नुजय्याह्वाविंशतिश्च॥७॥ ॥संवत्सरायदीक्षिष्य ४२
माणाएकाष्टकायांदीक्षेरंनेषावैसंवत्सरस्यपत्नीयदेकाष्टकैतस्यांवाएष
एतांरात्रिंवसतिसाक्षादेवसंवत्सरमारभ्यदीक्षंतआर्तंवाएतेसंवत्सर

स्याभि दीक्षंते य एकाष्टकायां दीक्षंतेंतनामानावृतू भवतो व्यस्तं वा एते संवत्सरस्या
भि दीक्षंते य एकाष्टकायां दीक्षंतेंतनामानावृतू भवतः फल्गुनीपूर्णमासे दीक्षेरन्मु
खं वा एतत् ॥१॥ संवत्सरस्य यत्फल्गुनीपूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षं
ते तस्यैकैव निर्या यत्सांमेघ्ये विषूवांत्संपद्यते चित्रापूर्णमासे दीक्षेरन्मुखं वा एत
त्संवत्सरस्य यच्चित्रापूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षंते तस्य न का चन
निर्या भवति चतुरहे पुरस्तात्पौर्णमास्यै दीक्षेरंतेषामेकाष्टकायां क्रयः संपद्यते
तेनैकाष्टकां न छंबट्कुर्वंति तेषां ॥२॥ पूर्वपक्षे सुत्या संपद्यते पूर्वपक्षं मासा अभि

सं·स· संपद्यंते तेपूर्वपक्षाउत्तिष्ठंति तानुत्तिष्ठंत ओषधयो वनस्पतयो नूत्तिष्ठंति तान्क ४
४३ ल्याणी कीर्तिरनूत्तिष्ठत्यरात्सुरिमेयजमाना इति तदनु सर्वे राध्नुवंति ॥३॥ ॥
॥एतच्छंबहुर्वंति तेषां चतुस्त्रिंशच्च ॥८॥ ॥सुवर्गं वा एते लोकं यंति ये सत्रमुप
यंत्यभींधत एव दीक्षाभिरात्मानं श्रपयंत उपसद्भिर्द्वाभ्यां लोमावद्यंति द्वाभ्यां
त्वचं द्वाभ्यामसृग्द्वाभ्यां मांसं द्वाभ्यामस्थि द्वाभ्यां मज्जानमात्म दक्षिणं वै स
त्रमात्मानमेव दक्षिणां नीत्वा सुवर्गं लोकं यंति शिखामनु प्रवपंत ऋद्ध्या अथो ४३
रघीयांसः सुवर्गं लोकमियामेति ॥१॥ ॥सुवर्गं पंचाशत् ॥९॥ ॥ब्रह्मवादिनो

वर्द्धंत्यतिरात्रःपरमोयज्ञक्रतूनांकस्मात्तंप्रथममुपयंतीत्येतद्वाअग्निष्टोमंप्रथममु ५
पयंत्यथोक्थ्यमथषोडशिनमथातिरात्रमनुपूर्वमेवैतद्यज्ञक्रतूनुपेत्यतानाल
भ्यपरिगृह्यसोममेवैतत्पिबंतआसतेज्योतिष्टोमंप्रथममुपयंतिज्योतिष्टोमो
वैस्तोमानांमुखंमुखतएवस्तोमान्प्रयुंजतेते ।।१।। संस्तुताविराजमभिसंप
द्यंतेद्व्यृचावातिरिच्यतएकयागौरतिरिक्तएकयायुरूनःसुवर्गोवैलोकोज्यो
तिर्विराट्सुवर्गमेवतेनलोकंयंतिरथंतरंदिवाभवतिरथंतरंनक्तमित्याहु
र्ब्रह्मवादिनःकेनतदजामीतिसौभरंतृतीयसवनेब्रह्मसामंबृहत्तन्मध्यतोदध

स·स· तिविधृत्यैतेनाजामि॥२॥ ॥तएकान्नपंचाशच्च॥१०॥ ॥ज्योतिष्टोमंप्रथममुपयं ४
४४ त्यस्मिन्नेवतेनलोकेप्रतितिष्ठंतिगोष्टोमंद्वितीयमुपयंत्यंतरिक्षएवतेनप्रतितिष्ठंत्या
युष्टोमंतृतीयमुपयंत्यमुष्मिन्नेवतेनलोकेप्रतितिष्ठंतीयंवावज्योतिरंतरिक्षंगोरसा
वायुर्यदेतांस्तोमानुपयं त्येष्वेवतल्लोकेषुसत्रिणःप्रतितिष्ठंतोयंतितेसंस्तुताविराजं
राजं॥१॥अभिसंपद्यंतेद्वेचचोवतिरिच्येतेएकयागोरतिरिक्तएकयायुरूनःसुव
र्गोवैलोकोज्योतिरूर्ग्विराडूर्जमेवावरुंधतेतेनक्षुधार्तिमार्छंत्यक्षोधुकाभवंति
क्षुत्संबाधाइवहिसत्रिणोग्निष्टोमावभितःप्रथीतावुक्थ्यामध्येनाद्युततहेतस्पारि ४४

यु हैव चक्रं यदृते न ॥२॥ षडहेन यंति देवचक्रमेव समारोहंत्यरिष्ट्यै ते स्वस्ति सम
श्नुवते षडहेन यंति षड्वा ऋतव ऋतुष्वेव प्रतितिष्ठंत्युभयतो ज्योतिषा यंत्युभयत एव
सुवर्गे लोके प्रतितिष्ठंतो यंति द्वौ षडहौ भवतस्तानि द्वादशाहानि संपद्यंते द्वादशो वै पु
रुषो द्वे सक्थ्यौ द्वौ बाहू आत्मा च शिरश्च चत्वार्यंगानि स्तनौ द्वादशौ ॥३॥ तत्पुरुष
मनुपर्यावर्तंते त्रयः षडहा भवंति तान्यष्टादशाहानि संपद्यंते नव वान्यानि नव वान्यानि
नव वै पुरुषे प्राणास्तत्प्राणाननुपर्यावर्तंते चत्वारः षडहा भवंति तानि चतुर्विंश
तिरहानि संपद्यंते चतुर्विंशतिरर्धमासाः संवत्सरस्तत्संवत्सरमनुपर्यावर्तंते प्रति

स॰सं ष्ठितःसंवत्सरइतिखलुवाआहुर्वर्षीयान्प्रतिष्ठायाइत्येतावद्वैसंवत्सरस्यब्राह्मणंया ४
४५ वन्मासोमासिमास्येवप्रतितिष्ठंतोयंति॥४॥ ॥विराजमेतेनद्वादशावेतावद्वाभ्रष्टोच॥
॥३१॥ ॥मेषस्त्वापचतैरवतुलोहितग्रीवश्छागैःशल्मलिर्वृद्ध्यापर्णोब्रह्मणाप्लक्षो
मेधेनन्यग्रोधश्चमसैरुदुंबरऊर्जागायत्रीछंदोभिस्त्रिवृत्स्तोमैरवंतीस्थावंतीस्त्वा
वंतुप्रियंत्वाप्रियाणांवर्षिष्ठमाप्यानांनिधीनांत्वानिधिपतिंहवामहेवसोमम ॥१॥
मेषःषड्विंशत्॥१२॥ ॥कूप्याभ्यःस्वाहाकूल्याभ्यःस्वाहाविकर्याभ्यःस्वाहावट्या ४५
भ्यःस्वाहाखन्याभ्यःस्वाहाह्रद्याभ्यःस्वाहासूद्याभ्यःस्वाहासरस्याभ्यःस्वाहावैशं

तीभ्यःस्वाहापल्वल्याभ्यःस्वाहावर्ष्याभ्यःस्वाहावृष्याभ्यःस्वाहाह्रादुनीभ्यःस्वाहा
पृष्वाभ्यःस्वाहास्यंदमानाभ्यःस्वाहास्थावराभ्यःस्वाहानादेयीभ्यःस्वाहासैंधवीभ्यः
स्वाहासमुद्रियाभ्यःस्वाहासर्वाभ्यःस्वाहा॥१॥कूप्याभ्यश्चत्वारिंशत्॥१३॥ ॥अ
द्भ्यःस्वाहावहंतीभ्यःस्वाहापरिवहंतीभ्यःस्वाहासमंतंवहंतीभ्यःस्वाहाशीघ्रंवहंती
भ्यःस्वाहाशीभंवहंतीभ्यःस्वाहोग्रंवहंतीभ्यःस्वाहाभीमंवहंतीभ्यःस्वाहांभोभ्यःस्वा
हानभोभ्यःस्वाहामहोभ्यःस्वाहासर्वस्मैस्वाहा॥१॥ ॥अद्भ्यएकान्नत्रिंशत्॥१४॥ ॥
॥योअर्वंतंजिघांसतितमभ्यमीतिवरुणः॥परोमर्तःपरःश्वा॥अहंचत्वंचवृत्र

स·स· हंत्सं बभूव सनिभ्य आ॥ अरातीवा चिदद्रिवो नु नौ शूर मंसते भद्रा इंद्रस्य रातय॥ ४
४६ यः॥ अभि क्रत्वेंद्र भूरध ज्मन्न ते विव्यङ्महिमानं रजांसि॥ स्वेना हि वृत्रं शवसा जघंथ न शत्रुरंतं विविदद्युधा ते॥ १॥ ॥ विविदद्वे च॥ १५॥ ॥ नमो राज्ञे नमो वरुणाय नमोऽश्वाय नमः प्रजापतये नमोऽधिपतयेऽधिपतिरस्यधिपतिं माकुर्वधिपतिरहं प्रजानां भूयासं मां धेहि मयि धेह्युपाकृताय स्वाहालब्धाय स्वाहा हुताय स्वाहा॥ १॥ ॥ नम एकान्नत्रिंशत्॥ १६॥ ॥ मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधीरा रिशंतां॥ पीवस्वतीर्जीवधन्याः पिबंत्ववसाय पद्वते रुद्र मृड॥ याः ५६

सरूपाविरूपाएकरूपायासामग्निरिष्ट्यानामानिवेद॥ याअंगिरसस्तपसेह
चक्रुस्ताभ्यःपर्जन्यमहिशर्मयच्छ॥ यादेवेषुतनुवमैरयंतयासाꣳसोमोविश्वा
रूपाणिवेद॥ ताअस्मभ्यंपयसापिन्वमानाःप्रजावतीरिंद्र॥१॥ गोष्ठेरिरीहि॥ प्र
जापतिर्मह्यमेताररराणोविश्वैर्देवैःपितृभिःसंविदानः॥ शिवाःसतीरुपनोगो
ष्ठमाकस्तासांवयंप्रजयासꣳसदेम॥ इहधृतिःस्वाहेहविधृतिःस्वाहेहरंतिःस्वा
हेहरमतिःस्वाहा॥ महीमूषुसुत्रा माणं॥२॥ ॥इंद्राष्टाविꣳशश्च॥१७॥ ॥किꣳस्वि
दासीत्पूर्वचित्तिःकिꣳस्विदासीद्बृहद्वयः॥ किꣳस्विदासीत्पिशंगिला किꣳस्विदा

द्यौ रासी पूर्वचित्तिरश्वं आसीद्बृहद्वयः॥ रात्रिरासीत्पिशंगिलाविरासीत्पिलिप्पिला॥

स॰स॰ सीत्पिलिप्पिला॥ कस्विदेकाकी चरति क उस्विज्जायते पुनः॥ किंस्विद्धिमस्य ४

४७ भेषजं किंस्विदावपनं महत्॥ सूर्य एकाकी चरति॥१॥ चंद्रमा जायते पुनः॥

अग्निर्हिमस्य भेषजं भूमिरावपनं महत्॥ पृच्छामि त्वा परमंतं पृथिव्याः पृच्छा

मि त्वा भुवनस्य नाभिं॥ पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः पर

मं व्योम॥ वेदिमाहुः परमंतं पृथिव्या यज्ञमाहुर्भुवनस्य नाभिं॥ सोममाहु

र्वृष्णो अश्वस्य रेतो ब्रह्मैव वाचः परमं व्योम॥२॥ ॥सूर्य एकाकी चरति षड्वा ४७

रि २शब्व॥१८॥ ॥अंबे अंबाल्यं बिकुनमानयति कश्चन॥ ससस्त्यंश्वकः॥

सुभगेकांपीलवासिनिसुवर्गेलोकेसंभोण्वीथां॥आहमंजानिगर्भधमात्व
मंजासिगर्भधं॥तौसहचतुरःपदःसंप्रसारयावहै॥वृषावांरेतोधारेतोद
धात्वुत्सक्थ्योर्गृदंधेह्यंजिमुदंजिमन्वज॥यःस्त्रीणांजीवभोजनोयआसां॥
॥१॥बिलधावनः॥प्रियस्त्रीणामपीच्यः॥यआसांकृष्णेलक्ष्मणिसर्दिगृदिं
परावधीत॥अंबेअंबाल्यंबिकेनमायभतिकश्चन॥ससस्त्यश्वकः॥ऊर्ध्वामे
नामुच्छ्रयताद्वेणुभारंगिराविव॥अथास्यामध्यमेधतां॥शीतेवातेपुनंनि
व॥अंबेअंबाल्यंबिकेनमायभातिकश्चन॥ससस्त्यश्वकः॥यद्धरिणीयव

स॰स॰ मत्तिन॥२॥पुष्टंपशुमन्यते॥शूद्रा यदर्यजारा नपोषाय धनायति॥अंबे अंबाल्यं ४
४६ बिंके नमायभतिकश्चन॥ससस्त्यश्वकः॥इयंयका शकुंतिका हलमिति सर्पति॥आह
तंगभेपसोनिजल्गुलीति धाणिका॥अंबेअंबाल्यंबिंकेनमायभातिकश्चन॥ससस्त्य
श्वकः॥माताचतेपिताचतेयं वृक्षस्य रोहतः॥३॥प्रसुलामीतिते पिता गभेमुष्टिमतं
सयत्॥दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः॥सुरभिनोमुखाकरत्प्रण
आयूंषितारिषत्॥आपोहिष्ठामयोभुवस्तानऊर्जेदधातन॥महेरणायचक्षसे॥
योवःशिवतमोरसस्तस्यभाजयतेहनः॥उशतीरिवमातरः॥तस्माअरंगमामवोय ४६
स्यक्षयायजिन्वथ॥आपोजनयथाचनः॥४॥आसामत्तिनरोहतोजिन्वथचत्वा

रिच॥१९॥ ॥भूर्भुवःसुवर्वसवस्त्वांजंतुगायत्रेणछंदसारुद्रास्त्वांजंतुत्रैष्टुभेनछंदसा
दित्यास्त्वांजंतुजागतेनछंदसायद्वातोअपोअगमदिंद्रस्यतनुवंप्रियां॥एतंस्तोतरेतेन
पथापुनरश्वमावर्तयासिनः॥लाजी३छाची३न्यशोममां३॥यव्यायैगव्यायाएतद्देवाअं
नमत्तैतदन्नमद्धिप्रजापते॥युंजंतिब्रध्नमरुषंचरंतंपरितस्थुषः॥रोचंतेरोचनादिवि॥
युंजंत्यस्यकाम्याहरीविपक्षसारथे॥शोणाधृष्णूनृवाहसा॥केतुंकृण्वन्नकेतवेपेशो
मर्याअपेशसे॥समुषद्भिरजायथाः॥१॥ ॥ब्रध्नंपंचविंशतिश्च॥२०॥ ॥प्राणायस्वा
हाव्यानायस्वाहापानायस्वाहास्नावभ्यःस्वाहासंतानेभ्यःस्वाहापरिसंतानेभ्यःस्वा
हापर्वभ्यःस्वाहासंधानेभ्यःस्वाहाशरीरेभ्यःस्वाहायज्ञायस्वाहादक्षिणाभ्यःस्वाहासु

स॰स॰१॥ वृर्गायस्वाहालोकायस्वाहासर्वस्मैस्वाहा॥१॥ ॥प्राणायाष्टाविंशतिः॥२१॥ ॥सितायस्वाहा ४
४९ सितायस्वाहाभिहितायस्वाहानभिहितायस्वाहायुक्तायस्वाहायुक्तायस्वाहासुयुक्तायस्वाहोद्युक्ता
यस्वाहाविमुक्तायस्वाहाप्रमुक्तायस्वाहावंचतेस्वाहापरिवंचतेस्वाहासंवंचतेस्वाहानुवंचतेस्वाहो
द्वंचतेस्वाहायतेस्वाहाधावतेस्वाहातिष्ठतेस्वाहासर्वस्मैस्वाहा॥१॥ ॥सितायाष्टाविंशत्॥२२॥ ॥
॥बृहस्पतिश्चयथावान्क्षावेप्रजापतिर्यन्नयेन्देवावादित्यावसिष्ठःसंवत्सरायसुवर्गंब्रह्मवा
अर्वंतं दिनोज्योतिष्टोमंमेषक्रूप्याभ्योज्ञायोनमामयोभूःकिंस्विदंबृभूःप्राणायसितायद्वाविंश
तिः॥२३॥ ॥बृहस्पतिःप्रतितिष्ठतिवैदेशरात्रेणसुवर्गोयोअर्वंतंभूःस्विपंचाशत्॥५३॥ ॥ ४९
हरिःॐ॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

॥श्रीगुरुभ्योनमः॥ ॥हरिःॐ॥ ॥गावोवाएतत्सत्रमासताशृंगाःसतीःशृंगाणिनोजायं
ताइतिकामेनतासांदशमासानिषण्णाआसंनथशृंगाण्यजायंततताउदतिष्ठंनरात्स्मेत्यथ
यासांनाजायंततताःसंवत्सरमाप्त्वोदतिष्ठंनरात्स्मेतियासांचाजायंतयासांचनताउभयी
रुदतिष्ठंनरात्स्मेतिगोसत्रंवै॥१॥संवत्सरोयएवंविद्वांसःसंवत्सरमुपयंत्यृध्नुवंत्येव
तस्मात्तूपरावार्षिकौमासौपत्वाचरतिसत्राभिजितंह्यस्यैतस्मात्संवत्सरसदोयत्किं
चगृहेक्रियतेतदाप्तमवरुद्धमभिजितंक्रियतेसमुद्रंवाएतेप्रप्लवंतेयेसंवत्सरमुपयंति
योवैसमुद्रस्यपारंनपश्यतिनवैसततउदेतिसंवत्सरः॥२॥वैसमुद्रस्तस्यैतत्पारंयदतिरा
त्रौयएवंविद्वांसःसंवत्सरमुपयंत्यनार्ताएवोदृचंगच्छंतीयंवैपूर्वोतिरात्रोसावुत्तरोमनःपू

स·स· र्वैवागुत्तरःप्राणःपूर्वोऽपानउत्तरःप्ररोधनंपूर्वमुदयनमुत्तरंज्योतिष्टोमोवैश्वानरोऽतिरात्रोभवतिज्यो ५
५० तिरेवपुरस्ताद्दधतेसुवर्गस्यलोकस्यानुख्यात्यैचतुर्विंशःप्रायणीयोभवतिचतुर्विंशतिरर्ध
मासाः॥३॥संवत्सरःप्रयंतएवसंवत्सरेप्रतितिष्ठंतितस्यत्रीणिचशतानिषष्टिश्चस्तोत्रीयास्ताव
तीःसंवत्सरस्यरात्रयउभेएवसंवत्सरस्यरूपेआप्नुवंतितेसंस्थित्याअरिष्ट्याउत्तरैरहोभिश्च
रंतिषडहाभवंतिषड्वाऋतवःसंवत्सरऋतुष्वेवसंवत्सरेप्रतितिष्ठंतिगौश्चायुश्चमध्यतःस्तोमौभ
वतःसं वत्सरस्यैवतन्मिथुनंमध्यतः॥४॥दधतिप्रजननायज्योतिरभितोभवतिविमोचन
मेवतच्छंदांस्येवतद्विमोकंयंत्यथोउभयतोज्योतिषैवषडहेनसुवर्गंलोकंयंतिब्रह्मवादिनोव ५०
दंत्यासतेकेनयंतीतिदेवयानेनपथेतिब्रूयाच्छंदांसिवैदेवयानःपंथागायत्रीत्रिष्टुब्जगतीज्यो

तिवैंगायत्रीगौस्त्रिष्टुग्गायुर्जगतीयदेतेस्तोमाभवंतिदेवतयानेनैव॥५॥तत्सुथायंतिसमानं
सामभवतिदेवलोकोवैसाम देवलोकादेवनयंत्यन्योन्यार्क्र्चोभवंतिमनुष्यलोकोवा
र्क्र्चोमनुष्यलोकादेवान्यमन्यंदेवलोकमभ्यारोहंतोयंत्यभिवर्तोब्रह्मसामंभवतिसुवर्गस्य
लोकस्याभिवृत्याअभिजिद्भवतिसुवर्गस्यलोकस्याभिजित्यैविश्वजिद्भवतिविश्वस्यजित्यैमा
सिमासिपृष्ठान्युपयंतिमासिमास्यतिग्राह्यागृह्यंतेमासिमास्येववीर्यंदधतिमासांप्रतिष्ठित्या
उपरिष्टान्मासांपृष्ठान्युपयंतितस्मादुपरिष्टादोषधयः फलंगृह्णंति॥६॥ ॥गोसत्रंवाएति
संवत्सरोर्धमासामिथुनंमध्यतोदेवतयानेनैववीर्यंत्रयोदश च॥१॥ ॥गावोवाएतत्सत्रमास
ताश्रृंगाःसतीःश्रृंगाणिसिषासंतीस्तासांदशमासानिषण्णाआसन्नथश्रृंगाण्यजायंततताअ
ब्रुवन्नरात्स्मोत्तिष्ठामावतंकाममरुत्स्महियेनकामेनन्यषदामेतितासामुत्वाअब्रुवन्नर्धावा

स·स· यावतीर्वैसीमहाएवैमौद्वादशोमासौसंवत्सरःसंपाद्यो।त्तिष्ठामेतितासां॥१॥द्वादशेमासित्र्यंगाणिप्रा ५
५१ वर्तंतश्रेयसयावाश्रेयसयावातादृमायास्तूपराश्यावावताओर्धुवन्याश्रुत्र्यंगाण्यसन्वन्याश्रोजेम
वारुंधतुभौतिदृशासुमास्युत्तिष्ठंतुभौतिद्वादशासुयएवंवेदपदेनखलुवाएतेयंतिविंदतिखलुवैप
देनयंतद्वाएतदृक्षमयंनंतस्मादेतद्रोसानी॥२॥ ॥तिष्ठामेतितासांतस्माद्देवं॥२॥ ॥प्रथमेमासिष्ट
क्षान्युपर्यंतिमध्यमउपर्यंत्युत्तमउपर्यंतितद्वाकुर्यौवैत्रिरेकस्याह्नउपसीदंतिदृह्नंवैसापराध्यां
देहोप्याद्वहेथकुतःसाधोध्यतेयांद्वादशाह्नउपसीदंतीतिसंवत्सरःसंपाद्यो॥उत्तमेमासिसकृ
त्पृष्ठान्युपेयुस्तद्यजमानायज्ञंपुनर्नवरुंधतेसमुद्रंवै॥१॥एतेनवावमेषावंसप्तुवंतेयेसंवत्स
रमुपयंतियद्वृहद्रथंतरेअन्ववर्जेयुर्यथामध्येसमुद्रस्यप्लवमन्ववर्जेयुस्ताद्दृक्तदनुत्सर्गंबृहद्रथं ५१
तराभ्यामित्वाप्रतिष्ठांगच्छंतिसर्वेभ्योवैकामेभ्यःसंधिर्दुह्यतेयजमानाःसर्वान्कामानवरुंधते॥

॥२॥ ॥समुद्रंवैचतुस्त्रिंशश्च॥३॥ ॥समान्यत्रचोभवंतिमनुष्यलोकोवाऽत्रचोमनुष्यलोकाद्देव
नयंत्यन्यदन्यत्सामभवतिदेवलोकोवैसामदेवलोकादेवान्यमन्यंमनुष्यलोकंप्रत्यवरोहंतोयंति
जगतीमग्रउपयंतिजगतीवैछंदसांप्रत्यवरोहंत्याग्रयणंग्रहो बृहत्पृष्ठानांत्रयस्त्रिंशः
स्तोमानांतस्माज्ज्यायांसंकनीयान्प्रत्यवरोहंतिवैश्वकर्मणोगृह्यतेविश्वान्येवतेनकर्माणियजमाना
अवरुंधतआदित्यश॥१॥गृह्यतइयंवाअदितिरस्यामेवप्रतितिष्ठंत्यन्योन्योगृह्येतेमिथुनत्वायप्र
जात्याअवांतरंवैदशरात्रेणप्रजापतिःप्रजाअसृजतयद्दशरात्रोभवतिप्रजाएवतद्यजमानाः
सृजंतएतांहवाउदंकःशौल्बायनःसत्रस्यर्धिमुवाचयद्दशरात्रोयद्दशरात्रोभवतिसत्रस्य
र्ध्याअथोयदेवपूर्वेष्वहःसुविलोमक्रियतेतस्यैवैषाशांतिः॥२॥ ॥आदित्यस्तस्यैवद्वेच॥४॥ ॥

स·स· ॥यदिसोमौसंसुतौस्यातांमहतिरात्रियेप्रातरनुवाकमुपाकुर्यात्पूर्वोवाचंपूर्वोदेवताः ५
५२ पूर्वश्छंदांसिवृङ्क्तेवृषण्वतींप्रतिपदंकुर्यात्प्रातःसवनादवैषामिंद्रंवृङ्क्तेथोखल्वाहुः
सवनमुखेसवनमुखेकार्येतिसवनमुखात्सवनमुखाद्वेवैषामिंद्रंवृङ्क्तेसंवेशायोपवेशा
यगायत्रियास्त्रिष्टुभोजगत्याअनुष्टुभःपङ्क्त्याअभिभूत्यैस्वाहाछंदांसिवैसंवेशउप
वेशश्छंदोभिरेवैषां॥१॥छंदांसिवृङ्क्तेसजनीयंशस्यंविहव्यंशस्यमगस्त्यस्यक
याशुभीयंशस्यमेतावद्वाअस्तियावदेतद्यावदेवास्तितदेषांवृङ्क्तेयदिप्रातःसवनेकल
शोदीर्येतवै ष्णवीषुशिपिवि ष्टवतीषुस्तुवीरन्यद्वैयज्ञस्यातिरिच्य ५२
तेविष्णुंतच्छिपिविष्टमभ्यातिरिच्यतेतद्विष्णुःशिपिविष्टोतिरिक्तएवातिरिक्तंदधात्यथो

अतिरिक्तेनैवातिरिक्तमाप्त्वावरुंधतेयदिमध्यंदिनेदीयेतवषट्कारनिधनंसामकुर्युर्व
षट्कारोवैयज्ञस्यप्रतिष्ठाप्रतिष्ठामेवैनद्गमयंतियदितृतीयसवनएतदेव॥२॥ ॥छंदो
भिर्वैषामवैकांनविंशतिश्च॥५॥ ॥षडहैर्मासांत्संपाद्याहरुत्सृजंतिषडहैर्हिमासांत्सं
पश्यंत्यर्धमासैर्मासांत्संपाद्याहरुत्सृजंत्यर्धमासैर्हिमासांत्संपश्यंत्यमावास्ययामासां
त्संपाद्याहरुत्सृजंत्यमावास्ययाहिमासांत्संपश्यंतिपौर्णमास्यामासांत्संपाद्याहरुत्सृ
जंतिपौर्णमास्याहिमासांत्संपश्यंतियोवैपूर्णआसिंचतिपरासिंचतियःपूर्णादुद्व
ति॥१॥प्राणमस्मिंस्तद्दधातियत्पौर्णमास्यामासांत्संपा द्याहरुत्सृजंतिसंवत्सरायै
वतत्प्राणंदधातितदहुःसत्त्रिणःप्राणंतियदहर्नोत्सृजेयुर्यथादृतिरुपनद्धोविपतत्ये

स॰स॰ वसंवत्सरो विपर्यतदार्तिमार्छेयुर्यत्पौर्णमास्यामासोत्संपाद्याहरुत्सृजंति संवत्सरायैवतदु ५
५३ द्वानंदधतितदनुसंतिष्ठते॥२॥ अनार्तिंनार्तिमार्छंतिपूर्णमासेवैदेवानांसुतोयत्पौर्ण
मास्यामासोत्संपाद्याहरुत्सृजंति देवानामेवतद्यज्ञेनयज्ञंप्रत्यवरोहंतिविवाएतद्यज्ञंछिंदंति
यत्षडहसंततःसंतु [illegible] मथाहरुत्सृजंतिप्राजापत्यंपशुमालभंतेप्रजापतिःसर्वादेव
तादेवताभिरेवयज्ञःसंतन्वंतियंतिवाएतेसवनाद्येहः॥३॥ उत्सृजंतितुरीयंखलुवाएत
त्सवनंयत्सान्नाय्यंयत्सान्नाय्यंभवतितेनैवसवनान्नयंतिसमुपहूयभक्षयंत्येतत्सोम
पीथाह्येतर्हियथायतनंवाएतेषांसवनभाजोदेवतागछंतियेहरुत्सृजंत्यनुसवनंपु ५३
रोडाशान्निर्वपंतियथायतनादेवसवनभाजोदेवताअवरुंधतेष्टाकपालान्प्रातःसवन

एकादशकपालान्माध्यंदिने सवनेन्द्रद्वादशकपालांस्तृतीयसवने छंदांस्येवाप्त्वावरुं
धते वैश्वदेवं चरुं तृतीयसवने निर्वपति वैश्वदेवं वै तृतीयसवनं तेनैव तृतीयसवनं नयं
ति ॥४॥ ॥उदचत्यघेहन्याप्त्वा पंचदशाच ॥६॥ ॥उत्सृज्यां३ नोत्सृज्या३मिति मीमांसं
ते ब्रह्मवादिनस्तद्वाहुरुत्सृज्यमेवेत्यमावास्यायां च पौर्णमास्यां चोत्सृज्यमित्याहुरेते हि
यज्ञं वहत इति तेत्वाव नोत्सृज्ये इत्याहुर्ये अवांतरं यज्ञं भेजात इति या प्रथमा व्यष्टकातस्या
मुत्सृज्यमित्याहुरेष वै मासो वि शर इति नादिष्टं ॥१॥ उत्सृजेयुर्य हादिष्टमुत्सृजेयुर्या
द्वो पुनः पर्याप्नुवेमध्येषडहस्य संपद्येत षडहैर्मासान्संपाद्य यत्सप्तममहस्तस्मिन्नु
त्सृजेयुस्तदन्नयेव सुमते पुरोडाशमष्टाकपालं निर्वपेयुरैंद्रं दधीद्रायमरुत्वते पुरोडा

स·म· शमष्टाकपालंवैश्वदेवंद्वादशकपालमग्नेर्वैवसुमतःप्रातःसवनंयदग्नयेवसुमतेपुरोडाश ५
५४ मष्टाकपालंनिर्वपतिदेवतामेवतद्भागिनींकुर्वंति॥२॥सवनमष्टाभिरुपयंतियदैंद्रंदधिघ्रा
वतीइमेवतद्भागधेयान्नच्यावयतीइंद्रस्यवैमरुत्वतोमाध्यंदिनंसवनंयदिंद्रायमरुत्वते
पुरोडाशमेकादशकपालंनिर्वपतिदेव तामेवतद्भागिनींकुर्वंतिसवनमेकादशाभिरु
पयंतिविश्वेषांवैदेवानामृभुमतांतृतीयसवनंयद्वैश्वदेवंद्वादशकपालंनिर्वपतिदेवता
एवतद्भागिनीःकुर्वंतिसवनंद्वादशभिः॥३॥उपयंतिप्राजापत्यंपशुमालभंतेयज्ञोवैप्र
जापतिर्यज्ञस्याननुसर्गायाभिवर्तइतःषण्मासोब्रह्मसामंभवतिब्रह्मवाअभिवर्तोब्र ५४
ह्मणैवतत्स्वर्गंलोकमभिवर्तयंतोयंतिप्रतिकूलमिवहीतःस्वर्गोलोकइंद्रक्रतुंनआभ

रपितापुत्रेभ्योयथा॥॥शिक्षाणोअस्मिन्पुरुहूतयामनिजीवाज्योतिरशीमहीत्युतआयता
ऽषण्मासोब्रह्मसामंभवत्ययंवैलोकोज्योतिःप्रजाज्योतिरिममेवतल्लोकंपश्यंतोभिवदंतआ
यंति॥४॥ ॥नाहिंकुर्वंतिद्वादशाभिरितिविंशतिश्च॥७॥ ॥देवानांवाअंतंजग्मुषामिंद्रियं
वीर्यमपाक्रामत्तत्क्रोशेनावारुंधततत्क्रोशस्यक्रोशत्वंयत्क्रोशेनचात्वालस्यांतेस्तुवंतिय
ज्ञस्यैवांतंगत्वेंद्रियंवीर्यमवरुंधतेसत्रस्यर्ध्याहवनीयस्यांतेस्तुवंत्यग्निमेवोपद्रष्टारंकृत्व
र्धिमुपयंतिप्रजापतेर्हृदयेनहविर्धानेंतस्तुवंतिप्रेमाणमेवास्यगच्छंतिश्लोकेनपुरस्तात्स
दसः॥१॥स्तुवंत्यनुश्लोकेनपश्चाद्यज्ञस्यैवांतंगत्वाश्लोकभाजोभवंतिनवभिरध्वर्युरु
द्गायतिनववैपुरुषेप्राणाःप्राणानेवयजमानेषुदधातिसर्वऐंद्रियोभवंतिप्राणेष्वेवेंद्रियं

स·स· दंधुत्यप्रतिहृताभिरुद्गायतितस्मात्पुरुषःसर्वाण्यन्यानिशीर्ष्णोंगानिप्रत्यंचतिशिरएवन ५
५५ पंचदशःरथंतरंभवतींद्रियमेवावरुंधतेसप्तदशं॥२॥बृहद्वैनाद्यस्यावरुध्याअथोप्रैवते
नजायंतएकविंशंभवतिद्विपदासुप्रतिष्ठित्यैपत्नयउपगायंतिमिथुनत्वायप्रजात्यैप्रजाप
तिःप्रजाअसृजतसोकामयतासामहंराज्यंपरीयामितितासांराजनेनैवराज्यंपर्यैत्तद्रा
जनस्यराजनत्वंयद्राजनंभवतिप्रजानामेवतद्यजमानाराज्यंपर्यंतिपंचविंशंभवतिप्र
जापतेः॥३॥आस्यैःपंचभिस्तिष्ठंतस्तुवंतिदेवलोकमेवाभिजयंतिपंचभिरासीनामनुष्यलो
कमेवाभिजयंतिदशसंपद्यंतेदशाक्षराविराडन्नंविराड्विराजैवान्नाद्यमवरुंधतेपंचधावि ५५
निषद्यस्तुवंतिपंचदिशोदिक्ष्वेवप्रतितिष्ठंत्येकैकयास्तुतयासमायंतिहिरण्ययएवांनाद्यः

संभरंतिताभिरुद्गातोद्गायतिदिग्भ्यएवांनाद्यं॥४॥संभृत्युतेजआलंदधतेतस्मादेकः
प्राणःसर्वाण्यंगान्यवत्यथोयथासुपर्णउत्पतिष्यंछिरउत्तमंकुरुतएवमेवतद्यजमानाः
प्रजानामुत्तमाभवंत्यासंदीमुद्गातारोहतिसाम्राज्यमेवगच्छतिप्रेंखंहोतानाकस्यैव
पृष्ठंरोहंतिकूर्चानध्वर्युर्ब्रध्नस्यैवविष्टपंगच्छंत्ये तावंतोवैदेवलोकास्तेष्वेवयथापूर्वं
प्रतितिष्ठंत्यथोआक्रमणमेवतत्सेतुंयजमानाःकुर्वतेसुवर्गस्यलोकस्यसमष्ट्यै॥५॥
॥सहस्रसमहर्शंप्रजापतेर्गायतिदिग्भ्यएवांनाद्यंप्रत्येकादशच॥८॥ ॥अर्केणवै
सहस्रशःप्रजापतिःप्रजाअसृजतताभ्यइलांदूहेनेरांलूतामवारुंधयदर्क्यंभवतिप्रजा
एवतद्यजमानाःसृजंतइलांदंभवतिप्रजाभ्यएवसृष्टाभ्यइरांलूतामवरुंधतेतस्मा

स·स· घाःसमाःसत्रःसम्र्द्धंक्षोधुकास्ताःसमाःप्रजाइष्यॅंह्यासामूर्जमाददतेयाःसमाव्यृध ५
५६ मक्षोधुकास्ताःसमाःप्रजाः॥१॥नह्यासामिषमूर्जमाददतउत्क्रोदंकुर्वतेयथाबंधा
न्मुमुचानाउत्क्रोदंकुर्वतएवमेवतद्यजमानादेवबंधान्मुमुचानाउत्क्रोदंकुर्वतइष
मूर्जमात्मंदधानावाणःशततंतुर्भवतिशतायुःपुरुषःशतेंद्रियआयुष्येवेंद्रियेप्रति
तिष्ठंत्याजिंधावंत्यनभिजितस्याभिजित्यैदुंदुभीन्समाघ्नंतिपरमावाएषावाग्यादुं
ते दुभौपरमामेव॥२॥वाचमवरुंधॅंभूमिदुंदुभिमाघ्नंतियैवेमांवाक्प्रविष्टातामेवा ५६
वरुंधतेथोइमामेवजयंतिसर्वावाचोवदंतिसर्वासांवाचामवरुध्याआर्द्रेचर्मन्व्या
यच्छेतेइंद्रियस्यावरुध्याआन्यःक्रोशतिप्रान्यःशंसतियआक्रोशतिपुनात्येवैनां

त्सयम्भुशःसतिपूतेष्वेवान्नाद्यंदधात्युपिक्तंतंच॥७॥वाएतेदेवकृतंतंचपूर्वैर्मासैरवरुं
धतेयद्भूतेच्छन्दःसामानिभवंत्युभयस्यावरुध्यैयंतिवाएतेमिथुनाद्येसंवत्सरमुप
यंत्ययंतर्वेदिमिथुनौसंभवतस्तेनैवमिथुनान्नयंति॥८॥ ॥व्यृक्षमक्षोधुकास्ताःस
मांप्रजाःपरमामेवचात्रिःशाच्च॥९॥ ॥चर्मावभिंदंतिपाप्मानमेवैषामवभिंदंतिमा
पंरात्सीर्मातिव्यात्सीरित्याहसंप्रत्येवैषांपाप्मानमवभिंदंत्युदकुंभानधिनिधायदा
स्योमार्जालीयंपरिनृत्यंतिपदोनिघ्नतीरिदंमधुंगायंत्योमधुवैदेवानांपरममन्नाद्यं
परममेवान्नाद्यमवरुंधतेपदोनिघ्नंतिमहीयामेवैषुदधति॥१॥ ॥चर्मैकोनपंचा
शत्॥१०॥ ॥पृथिव्यैस्वाहांतरिक्षायस्वाहादिवेस्वाहासंप्लोष्यतेस्वाहासंप्लवमा

स·सं· नाय स्वाहा संप्लुताय स्वाहा मेघायिष्यते स्वाहा मेघायते स्वाहा मेघिताय स्वाहा मेघाय स्वा ५
५७ हा नीहाराय स्वाहा निहाकायै स्वाहा प्रासचाय स्वाहा प्रचलाकायै स्वाहा विद्योतिष्यते स्वा
हा विद्योतमानाय स्वाहा संविद्योतमानाय स्वाहा स्तनयिष्यते स्वाहा स्तनयते स्वाहोग्रꣳ
स्तनयते स्वाहा वर्षिष्यते स्वाहा वर्षते स्वाहाभिवर्षते स्वाहा परिवर्षते स्वाहा संवर्षते ॥१॥ स्वा
हानुवर्षते स्वाहा शीकायिष्यते स्वाहा शीकायते स्वाहा शीकिताय स्वाहा प्रोषिष्यते स्वाहा
प्रुष्णते स्वाहा परिप्रुष्णते स्वाहोद्ग्रहीष्यते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा विप्लोष्य
ते स्वाहा विप्लवमानाय स्वाहा विप्लुताय स्वाहातप्स्यते स्वाहातपते स्वाहोग्रमातपते स्वाह ५७
र्ग्भ्यः स्वाहा यजुर्भ्यः स्वाहा सामभ्यः स्वाहाङ्गिरोभ्यः स्वाहा वेदेभ्यः स्वाहा गाथाभ्यः स्वाहा

नाराशꣳसीभ्यःस्वाहारैभीभ्यःस्वाहासर्वस्मैस्वाहा॥२॥ ॥संवर्षतेरैभीभ्यःस्वाहाद्वेच॥११॥ ॥
दत्वतेस्वाहादंतकायस्वाहाप्राणिनेस्वाहाप्राणायस्वाहामुखवतेस्वाहामुखायस्वाहानासि
कवतेस्वाहानासिकायस्वाहाक्षण्वतेस्वाहानक्षिकायस्वाहाकर्णिनेस्वाहाकर्णकायस्वा
हाशीर्षण्वतेस्वाहाशीर्षकायस्वाहापद्वतेस्वाहापादकायस्वाहाप्राणतेस्वाहाप्राणतेस्वाहा
वदतेस्वाहावदतेस्वाहापश्यतेस्वाहापश्यतेस्वाहाशृण्वतेस्वाहाशृण्वतेस्वाहामनस्विने
स्वाहा॥१॥अमनसेस्वाहारेतस्विनेस्वाहारेतस्कायस्वाहाप्रजाभ्यःस्वाहाप्रजननायस्वा
हालोमवतेस्वाहालोमकायस्वाहात्वचेस्वाहात्वक्कायस्वाहाचर्मण्वतेस्वाहाचर्मकायस्वा
हालोहितवतेस्वाहालोहितायस्वाहामाꣳसन्वतेस्वाहामाꣳसकायस्वाहास्नावभ्यःस्वाहा

स॰स॰ स्नावकायस्वाहास्कन्नवतेस्वाहानुक्तिकायस्वाहामज्जन्वतेस्वाहामज्जकायस्वाहांगिनेस्वा ५
५६ हानंगायस्वाहात्मनेस्वाहानात्मनेस्वाहासर्वस्मैस्वाहा॥२॥ ॥मनस्विनेस्वाहानात्मनेस्वा
हाहृचा॥१२॥ ॥कस्त्वायुनक्तिसत्वायुनक्तुविष्णुस्त्वायुनक्त्वस्ययज्ञस्यर्थ्यैमह्यंसंनत्या
अमुष्मैकामायायुषेत्वाप्राणायत्वापानायत्वाव्यानायत्वाव्युष्ट्यैत्वारय्यैत्वाराधसेत्वाघो
षायत्वापोषायत्वाराद्घोषायत्वाप्रच्युत्यैत्वा॥१॥ ॥कोशाविंशात॥१३॥ ॥अग्नयेगायत्रा
यत्रिवृतेराथंतरायवासंतायाष्टाकपालइंद्रायत्रैष्टुभायपंचदशायबार्हतायग्रैष्मायैका
दशाकपालोविश्वेभ्योदेवेभ्योजागतेभ्यःसप्तदशेभ्योवैरूपेभ्योवार्षिकेभ्योद्वादशकपा ५६
लोमित्रावरुणाभ्यामानुष्टुभाभ्यामेकविंशाभ्यांवैराजाभ्यांशारदाभ्यांपयस्याबृ

हस्पतयेपाङ्क्तायत्रिणवायशाक्वरायहैमंतिकायचरुःसवित्रआतिछंदसायत्रयस्त्रिंशा
यरैवतायशैशिरायद्वादशकपालोदित्यैविष्णुपत्न्यैचरुरग्नयेवैश्वानरायद्वादशकपा
लोनुमत्यैचरुःकायएककपालः॥१॥ ॥अग्नयेदित्याअनुमत्यैसप्तचत्वारिंशत्॥१४॥
॥योवाअग्नावग्निःप्रहियतेयश्चसोमोराजातयोरेषआतिथ्यंयदग्नीषोमीयोथैषरुद्रो
यश्चीयतेयत्तंचित्यावेतानिहवींषिननिर्वपेदेषएवरुद्रोशांतउपोत्थायप्रजांपशून्य
जमानस्याभिमन्येतयत्तंचित्यावेतानिहवींषिनिर्वपतिभागधेयेनैवैनंशमयति
नास्यरुद्रोशांतः॥१॥उपोत्थायप्रजांपशूनभिमन्यतेदशहवींषिभवंतिनववैपुरुषेप्रा
णानाभिर्दशमीप्राणानेवयजमानेदधात्यथोदशाक्षराविराडन्नंविराड्विराज्येवान्ना

स·स· द्बृंहतितिष्ठत्यृतुभिर्वाएषछंदोभिस्तोमैःपृष्ठैश्चेतव्यइत्याहुर्यद्देतानिर्हवीꣳषिनिर्वपत्यृ ५
५९ तुभिरेवैनंछंदोभिस्तोमैःपृष्ठैश्चिनुतेदिशःसुषुवाणेन॥२॥अभिजित्याइत्याहुर्यद्देता
निर्हवीꣳषिनिर्वपतिदिशामभिजित्याएतयावाइंद्रंदेवाअयाजयंतस्मादिंद्रःसवएतया
६ मनुंमनुष्यास्तस्मान्मनुस्सवोयथेंद्रोदेवानांयथामनुर्मनुष्याणामेवंभवति यएवंविद्वा
नेतयेष्ट्यायजतेदिग्वतीःपुरोनुवाक्याभवंतिसर्वासांदिशामभिजित्यै॥३॥ ॥अस्यरु
द्रोवांतःसुषुवाणेनैकचत्वारिꣳशच्च॥१५॥ ॥यःप्राणतोनिमिषतोमहित्वैकइद्रा
जाजगतोबभूव॥यईशेअस्यद्विपदश्चतुष्पदःकस्मैदेवायहविषाविधेम॥उपयामगृ ५९
हीतोसिप्रजापतयेत्वाजुष्टंगृह्णामितस्यतेद्यौर्महिमानक्षत्राणिरूपमादित्यस्तेतेजस्त

स्मैत्वामहिम्नेप्रजापतयेस्वाहा॥१॥ ॥यत्प्राणतोद्यौरादित्योष्टात्रिंशत्॥१६॥ ॥यआ
त्मदाबलदायस्यविश्वउपासतेप्रशिषंयस्यदेवाः॥यस्यछायामृतंयस्यमृत्युःकस्मैदेवा
यहविषाविधेम॥उपयामगृहीतोसिप्रजापतयेत्वाजुष्टंगृह्णामितस्यतेपृथिवीमहिमौ
षधयोवनस्पतयोरूपमग्निस्तेतेजस्तस्मैत्वामहिम्नेप्रजापतयेस्वाहा॥१॥ ॥यआत्म
दाबलदापृथिव्यग्निरेकोनचत्वारिंशत्॥१७॥ ॥आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजाय
तामाराष्ट्रेराजन्यइषव्यःशूरोमहारथोजायतांदोग्ध्रीधेनुर्वोढानड्वानाशुःसप्तिः
पुरंध्रिर्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्यवीरोजायतांनिकामेनिकामेनः
पर्जन्योवर्षतुफलिन्योनओषधयःपच्यंतांयोगक्षेमोनःकल्पतां॥१॥ ॥आब्रह्मन्नेक

स·सं· चत्वारिꣳशत्॥१८॥ ॥आक्रान्वाजीपृथिवीमग्निंयुजमकृतवाज्यर्वाक्रान्वाज्यंतरिक्षंवा ५
६० युंयुजमकृतवाज्यर्वाद्यांवाज्याक्रꣳस्तसूर्यंयुजमकृतवाज्यर्वाग्निस्तेवाजिन्युङ्नुत्वारभे
स्वस्तिमासंपारयवायुस्तेवाजिन्युङ्नुत्वारभेस्वस्तिमासं॥१॥पारयादित्यस्तेवाजिन्युङ्
नुत्वारभेस्वस्तिमासंपारयप्राणधृगसिप्राणंमेदृꣳहव्यानधृगसिव्यानंमेदृꣳहापानधृग
स्यपानंमेदृꣳहचक्षुरसिचक्षुर्मयिधेहिश्रोत्रमसिश्रोत्रंमयिधेह्यायुरस्यायुर्मयिधेहि॥२॥
वायुस्तेवाजिन्युङ्नुत्वारभेस्वस्तिमासंतिचत्वारिꣳशच्च॥१९॥ ॥जज्ञिबीजंवर्ष्टीपर्जन्यः
पक्तासस्यꣳसुपिप्पलाओषधयस्वधिचरणेयꣳसूपसदनोग्निःस्वध्यक्षमंतरिक्षꣳसु ६०
पावःपवमानःसूपस्थानाद्यौःशिवमसौतपन्यथापूर्वमहोरात्रेपंचदशिनोर्धमासास्त्रि

ऽशिनोमासोःकृताकृतवःशांतःसंवत्सरश्च॥१॥ ॥जज्ञेकत्रिंशत॥२०॥ ॥आग्नेयोष्टाक
पालःसौम्यश्चरुःसावित्रोष्टाकपालःपौष्णश्चरुःरौद्रश्चरुरग्नयेवैश्वानरायद्वादशकपालो
मृगाखरेयदिनागच्छेदग्नयेंऽहोमुचेष्टाकपालःसौर्यंपयोवायव्यआज्यभागश्च॥१॥ ॥आ
ग्नेयश्चतुर्विंशतिः॥२१॥ ॥अग्नयेंऽहोमुचेष्टाकपालइंद्रायांऽहोमुचएकादशकपालो
मित्रावरुणाभ्यामागोमुग्भ्यांपयस्यावायोसावित्रआगोमुग्भ्यांचरुरश्विभ्यामागोमु
ग्भ्यांधानामरुद्भ्यएनोमुग्भ्यःसप्तकपालोविश्वेभ्योदेवेभ्यएनोमुग्भ्योद्वादशकपालोनु
मत्यैचरुरग्नयेवैश्वानरायद्वादशकपालोद्यावापृथिवीभ्यांऽहोमुग्भ्यांद्विकपालः॥१॥ भ्यो
अग्नयेंऽहोमुचेत्रिंशत॥२२॥ ॥अग्नयेसमनमत्पृथिव्यैसमनमद्यथाग्निःपृथिव्या

सं॰स समनमद्देवंमह्यंभद्राःसंनतयःसंनमंतुवायवेसमनमदंतरिक्षायसमनमन्यथावायुरंत ५
६१ रिक्षेणसूर्यायसमनमद्दिवेसमनमन्यथासूर्योदिवाचंद्रमसेसमनमन्नक्षत्रेभ्यःसमन
मन्यथाचंद्रमानक्षत्रैर्वरुणायसमनमदद्भ्यःसमनमन्यथा॥१॥वरुणोद्भिःसाम्नेसमनमदृ
चेसमनमन्यथासामर्चाब्रह्मणेसमनमत्क्षत्रायसमनमन्यथाब्रह्मक्षत्रेणराज्ञेसमनमद्वि
शेसमनमन्यथाराजाविशारथायसमनमदश्वेभ्यःसमनमन्यथारथोश्वैःप्रजापतयेसमन
मद्भूतेभ्यःसमनमन्यथाप्रजापतिर्भूतैःसमनमद्देवंमह्यंभद्राःसंनतयःसंनमंतु॥२॥ ॥अ
द्भ्यःसमनमन्यथामह्यंचत्वारिच॥२३॥ ॥येतेपंथानःसवितःपूर्व्यासोरेणवोविततांत ६१
रिक्षे॥तेभिर्नोअद्यपथिभिःसुगेभीरक्षाचनोअधिचदेवब्रूहि॥नमोग्नयेपृथिविक्षितेलो

कुस्पृतेलोकमुस्मैयजमानायदेहिनमोवायवेंतरिक्षक्षितेलोकुस्पृतेलोकमु स्मैयज
मानायदेहिनमुः सूर्यायदिविक्षितेलोकुस्पृतेलोकमुस्मैयजमानायदेहि॥१॥ ॥येच
तुश्चत्वारिंशत्॥२४॥ ॥योवाअश्वस्यमेध्यस्यशिरोवेदशीर्षण्वान्मेध्योभवत्युषा
वाअश्वस्यमेध्यस्यशिरःसूर्यश्चक्षुर्वातःप्राणश्चंद्रमाश्रोत्रंदिशःपादाअवांतरदिशाः
पर्शवोहोरात्रेनिमेषोर्धमासाःपर्वाणिमासाःसंधानान्यृतवोंगानिसंवत्सरआत्मार
श्मयःकेशानक्षत्राणिरूपंतारकाअस्थानिनभोमांसान्योषधयोलोमानिवनस्पत
योवालाअग्निर्मुखंवैश्वानरोव्यात्तं॥१॥समुद्रउदरमंतरिक्षंपायुर्द्यावापृथिवीआं
डौग्रावाशेपःसोमोरेतोयज्जंजभ्यतेतद्विद्योततेयद्विधूनुतेतत्स्तनयतियन्मेहतित

स·स· ह्रर्षतिवागेवास्यवागहर्वाअश्वंस्यजायमानस्यमहिमापुरस्तोज्जायततेरात्रिरेनं ५
६२ महिमापश्चादनुजायतएतौवैमहिमानावश्वमभितःसंबभूवतुर्हयोदेवानव
हदर्वासुरान्वाजीगंधर्वानश्वोमनुष्यांत्समुद्रोवाअश्वस्ययोनिःसमुद्रोबं
धुः॥२॥ ॥व्यात्तमवहद्वादशच॥२५॥ ॥गावोगावःसिषासंतीःप्रथमेमासि
समान्योयदिसोमौषड्हैरुत्तरज्यांदेवानामुक्यैणचमोवपृथिव्येदलतेकस्मा
न्नयुयोवेयःभ्राणतोयआत्मदाआब्रह्मनाक्रांजज्ञिवीजमाग्नेयोष्टाकपालोग्न ६२
येन्द्रोमुचेश्टाकपालोग्नयेसमनमप्रेघेतपंथानोयोवाअश्वस्यमेध्यस्यशि

नुःपंचविंशतिः॥२५॥गावःसमान्यःसावनमष्टाभिर्वाएतेदेवकृतंचाभिजित्या
इत्याङ्गिर्वरुणाद्धिःसाम्नेचतुःपंचाशत्॥५४॥ ॥हरिःॐ॥ ॥श्रीकृष्णार्पण
मस्तु॥ ॥श्रीउमामधुकेश्वरार्पणमस्तु॥ ॥श्रीसद्गुरुचरणारविंदार्पणमस्तु॥
॥श्रीमहागणपतयेनमः॥ ॥श्रीमहासरस्वत्यैनमः॥ ॥श्रीगुरुर्जयति॥ ॥
॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥
श्री॥ ॥श्री॥श्री॥श्री॥श्री॥श्री॥श्री॥श्री॥श्री॥श्री॥श्री॥श्री॥श्री॥श्री॥श्री॥श्री॥

सप्तमाष्टकसंहितासंपूर्णा।

यतिषड्भिः पवयति षड्वाऋतवऋतुभिरेवैनं पवयति सप्तभिः पवयति सप्तछंदा
ꣳसि छंदोभिरेवैनं पवयति नवभिः पवयति नव वै पुरुषे प्राणाः सप्राणमेवैनं पव
यत्येकविꣳशत्या पवयति दश हस्त्या अंगुलयो दश पद्या आत्मैकविꣳशीया वाने
व पुरुषस्तमपरिवर्गं ॥८॥ पवयति चित्पतिस्त्वा पुनात्वित्याह मनो वै चित्पतिर्मन
सैवैनं पवयति वाक्पतिस्त्वा पुनात्वित्याह वाचैवैनं पवयति देवस्त्वा सविता पुनात्वि
त्याह सवितृप्रसूत एवैनं पवयति तस्य ते पवित्रपते पवित्रेण यस्मै कं पुने तछ्केय
मित्याहाशिषमेवैतामाशास्ते ॥९॥ अतीकाशान्करोत्यवेन्नायं तीर्थे स्नाति प्रघातो म
नुष्याणां तद्वा आंड्ते मित्रत्वाय पंचभिरपरिवर्गमष्टाचत्वारिꣳशच्च ॥१॥ ॥यावंतो
वै देवा यज्ञाया पुनत त एवाभवन्य एवं विद्वान्यज्ञाय पुनीते भवत्येव बहिः पवयित्वां

तःप्रपादयतिमनुष्यलोकएवैनंपवयित्वापूतंदेवलोकंप्रणयत्यदीक्षितएकयाहुत्येत्या
हुःस्रुवेणचतस्रोजुहोतिदीक्षितत्वायस्रुचापंचमींपंचाक्षरापङ्क्तिःपांक्तोयज्ञोयज्ञमे
वावरुंधआकूत्यैप्रयुजेग्नये॥१॥स्वाहेत्याहाकूत्याहिपुरुषोयज्ञमभिप्रयुंक्तेयजेये
तिमेधायैमनसेग्नयेस्वाहेत्याहमेधयाहिमनसापुरुषोयज्ञमभिगच्छतिसरस्वत्यै
पूष्णेग्नयेस्वाहेत्याहवाग्वैसरस्वतीपृथिवीपूषावाचैवपृथिव्यायज्ञंप्रयुंक्तआपोदे
वीर्बृहतीर्विश्वशंभुवइत्याहयावैवर्ष्यास्ताः॥२॥आपोदेवीर्बृहतीर्विश्वशंभुवोय
देतयजुर्नब्रूयाद्दिव्याआपोशांताइमंलोकमागच्छेयुरापोदेवीर्बृहतीर्विश्वशंभुवइ
त्याहास्माएवैनाल्लोकायशमयतितस्माच्छांताइमंलोकमागच्छंतिद्यावापृथिवीइत्या ३
हद्यावापृथिव्योर्हियज्ञउर्वंतरिक्षमित्याहांतरिक्षेहियज्ञोबृहस्पतिर्नोहविषावृ

धातु॥३॥इत्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै यज्ञमवरुंधे यद्ब्रूयाद्विधे
रिति यज्ञस्थाणुमृच्छेद्वृधात्वित्याह यज्ञस्थाणुमेव परिवृणक्ति प्रजापतिर्यज्ञम
सृजत सोस्मात्सृष्टः पराङैत्स प्र यजुरव्लीनात्प्र साम तमृगुदयच्छद्यदृगुदयच्छ
त्तदोद्ग्रहणस्योद्ग्रहणत्वमृचा॥४॥जुहोति यज्ञस्याधृत्या अनुष्टुभ्छंदसामुदयच्छ
दित्याहुस्तस्मादनुष्टुभा जुहोति यज्ञस्याधृत्यै द्वादश वात्सबंधान्युदयच्छन्नित्या
हुस्तस्माद्द्वादशभिर्वात्सबंधविदो दीक्षयंति सा वा एषर्गनुष्टुग्वागनुष्टुप्यदेतय
र्चा दीक्षयति वाचैवैनं सर्वया दीक्षयति विश्वे देवस्य नेतुरित्याह सावित्र्येतेन म
र्तो वृणीत सख्यं॥५॥इत्याह पितृदेवत्यैतेन विश्वे राय इषुध्यसीत्याह वैश्वदेव्येते
न द्युम्नं वृणीत पुष्यस इत्याह पौष्ण्येतेन सा वा एषर्क्सर्वदेवत्या यदेतयर्चा दीक्षय

ष०स०१ तिसर्वाभिरेवैनंदेवताभिर्दीक्षयतिसप्ताक्षरंप्रथमंपदमष्टाक्षराणित्रीणियानित्रीणि
४ तान्यष्टावुपयंतियानिचत्वारितान्यष्टौयदष्टाक्षरातेन॥६॥गायत्रीयदेकादशाक्ष
रातेनत्रिष्टुग्यद्द्वादशाक्षरातेनजगतीसावाएषसर्वाणियदेतयर्चादीक्षयतिसर्वै छंदांसि
भिरेवैनंछंदोभिर्दीक्षयतिसप्ताक्षरंप्रथमंपदंसप्तपदाशक्वरीपशवःशक्वरीप
शूनेवावरुंधएकस्मादक्षरादनाप्तंप्रथमंपदंतस्माद्यद्वाचोनाप्तंतन्मनुष्याउपजी
वंतिपूर्णयाजुहोतिपूर्णइवहिप्रजापतिःप्रजापतेराप्त्यैन्यूनयाजुहोतिन्यूनाद्धिप्र
जापतिःप्रजाअसृजतप्रजानांसृष्ट्यै॥७॥अग्नयेतावृधात्वृचासख्यंतेनजुहो
तिपंचदशच॥२॥ ॥ऋक्सामेवैदेवेभ्योयज्ञायातिष्ठमानेकृष्णोरूपंकृत्वापक्रम्या ४
तिष्ठतांतेमन्यंतयंवाइमेउपावर्त्स्यतःसइदंभविष्यतीतितेउपामंत्रयंततेअहोरा

त्रयोर्महिमानमपनिधायदेवानुपावर्तेतामेषवाऋचोवर्णोयच्छुक्लंकृष्णाजिनस्यै
षसाम्नोयत्कृष्णमृक्सामयोःशिल्पेस्थइत्याहऋक्सामेएवावरुंधएषः॥१॥वाअह्नोव
र्णोयच्छुक्लंकृष्णाजिनस्यैषरात्रियायत्कृष्णंयदेवैनयोस्तत्रन्यक्तंतदेवावरुंधेकृ
ष्णाजिनेनदीक्षयतिब्रह्मणोवाएतद्रूपंयत्कृष्णाजिनंब्रह्मणैवैनंदीक्षयतीमांधि
यंशिक्षमाणस्यदेवेत्याहयथायजुरेवैतद्गर्भोवाएषयद्दीक्षितउल्बंवासःप्रोर्णु
तेतस्मात्॥२॥गर्भाःप्रावृताजायंतेनपुरासोमस्यक्रयादपोर्णुवीतयत्पुरासोमस्यक्र
यादपोर्णुवीतगर्भाःप्रजानांपरापातुकास्युःक्रीतेसोमेपोर्णुतेजायतएवतदथोयथा
वसीयांसंप्रत्यपोर्णुतेतादृगेवतदंगिरसःसुवर्गंलोकंयंतऊर्जंव्यभजंततोय
दत्यशिष्यततेशराअभवन्नूर्ग्वैशरायच्छरमयी॥३॥मेखलाभवत्यूर्जमेवावरुंधेम

प०स०१ ध्यतः सं नह्यति मध्यत एवास्मा ऊर्जं दधाति तस्मान्मध्यत ऊर्जा भुंजत ऊर्ध्वं वै पुरुष
५ स्य नाभ्यै मेध्यमवाचीनममेध्यं यन्मध्यतः सन्नह्यति मेध्यं चैवास्यामेध्यं च व्यावर्तयती
ंद्रो वृत्राय वज्रं प्राहरत्स त्रेधा व्यभवत्स्फ्यस्तृतीयं रथस्तृतीयं यूपस्तृतीयं ॥४॥ येंतः श
रा अशीर्यंत ते शरा अभवंतच्छराणां शरत्वं वज्रो वै शराः क्षुत्खलु वै मनुष्यस्य भ्रातृ
व्यो यच्छरमयी मेखला भवति वज्रेणैव साक्षात्क्षुधं भ्रातृव्यं मध्यतो पहते त्रिवृ
द्भवति त्रिवृद्वै प्राणस्त्रिवृतमेव प्राणं मध्यतो यजमाने दधाति पृथ्वी भवति रज्जूनां
व्यावृत्त्यै मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीं मिथुनत्वाय ॥ ५॥ यज्ञो दक्षि
णामभ्यध्यायत्तां समभवत्तदिंद्रोचायत्सो मन्यत यो वा इतो जनिष्यते स इदं भवि ५
ष्यतीति तां प्राविशत्तस्या इंद्र एवाजायत सो मन्यत यो वै मदितो परो जनिष्यते स इ

दंभविष्यतीतितस्याअनुमृश्ययोनिमाछिनत्सास्तुतवशाभवत्तत्स्तुतवशाभवत्तत्स्तु
तवशायैजन्म॥६॥तामिंद्रोहस्तेनव्यवेष्टयततांमृगेषुन्यदधात्साकृष्णविषाणाभवदिंद्रस्य
योनिरसिमामाहिंसीरितिकृष्णविषाणांप्रयच्छतिसयोनिमेवयज्ञंकरोतिसयोनिंद
क्षिणांसयोनिमिंद्रंसयोनित्वायकृष्यैत्वासुसस्यायाइत्याहतस्मादकृष्टपच्याओष
धयःपच्यंतेसुपिप्पलाभ्यस्त्वौषधीभ्यइत्याहतस्मादोषधयःफलंगृह्णंतियद्धस्तेन
॥७॥कंडूयेतपामनंभावुकाःप्रजास्युर्यत्स्मयेतनग्नंभावुकाःकृष्णविषाणयाकंडूय
तेपिगृह्यतेपिगृह्यस्मयतेप्रजानांगोपीथायनपुरादक्षिणाभ्योनेतोःकृष्णविषाणा
मवचृतेद्यत्पुरादक्षिणाभ्योनेतोःकृष्णविषाणामवचृतेद्योनिःप्रजानांपरापातुका
स्यान्नीतासुदक्षिणासुचात्वालेकृष्णविषाणांयोनिर्वैयज्ञस्यचात्वालंःप्रास्यतिःयो

प०स०१ निःकृष्णविषाणायोनावेवयोनिंदधातियज्ञस्यसयोनित्वाय॥८॥रुंधएषतस्मात्छर
६ मयीयूपस्तृतीयंमिथुनत्वायजन्महस्तेनाष्टाचत्वारिंशञ्च॥३॥ ॥वाग्वैदेवेभ्योपाक्रा
मद्यज्ञायातिष्ठमानासावनस्पतीन्प्राविशत्सैषावाग्वनस्पतिषुवदतियाडुंदुभौयातूण
वेयावीणायांयद्दीक्षितदंडंप्रयच्छतिवाचमेवावरुंधऔडुंबरोभवत्यूर्ग्वाउडुंबरऊर्ज
मेवावरुंधेमुखेनसंमितोभवतिमुखतएवास्माऊर्जंदधातितस्मान्मुखतऊर्जाभुंजते
॥१॥क्रीतेसोमेमैत्रावरुणायदंडंप्रयच्छतिमैत्रावरुणोहिपुरस्तादृत्विग्भ्योवाचंविभ
जतितामृत्विजोयजमानेप्रतिष्ठापयंतिस्वाहायज्ञंमनसेत्याहमनसाहिपुरुषोयज्ञ
मभिगच्छतिस्वाहा द्यावापृथि ६
स्वाहा वीभ्यामित्याहद्यावापृथिव्योर्हियज्ञोंतरिक्षादित्याहांतरिक्षेहियज्ञःस्वाहायज्ञंवा

तादारभइत्याहायं॥२॥वावयःपवतेसयज्ञस्तमेवसाक्षादारभतेमुष्टीकरोतिवाचं
यच्छतियज्ञस्यधृत्याअदीक्षिष्टायंब्राह्मणइतित्रिरुपांश्वाहदेवेभ्यएवैनंप्राहत्रिरुच्चै
रुभयेभ्यएवैनंदेवमनुष्येभ्यःप्राहनपुरानक्षत्रेभ्योवाचंविसृजेद्यत्पुरानक्षत्रेभ्यो
वाचंविसृजेद्यज्ञंविछिंद्यात्॥३॥उदितेषुनक्षत्रेषुव्रतंकृणुतेतिवाचंविसृजतिय
ज्ञव्रतोवैदीक्षितोयज्ञमेवाभिवाचंविसृजतियदिविसृजेद्वैष्णवीमृचमनुब्रूयाद्य
ज्ञोवैविष्णुर्यज्ञेनैवयज्ञंसंतनोतिदैवींधियंमनामहइत्याहयज्ञमेवतन्म्रदयतिसु
पारानोअसद्वशइत्याहव्युष्टिमेवावरुंधे॥४॥ब्रह्मवादिनोवदंतिहोतव्यंदीक्षितस्य
गृहा३इनहोतव्या३मितिहविर्वैदीक्षितोयज्जुहुयाद्यजमानस्यावदायजुहुयाद्यन्नजु
हुयाद्यज्ञपरुरंतरियाद्येदेवामनोजातामनोयुजइत्याहप्राणावैदेवामनोजाताम

ष०स०१ नोयुजस्त्वेषैवपरोक्षंजुहोतितन्नेवकृतंनेवाकृतꣳस्वपंतंवैदीक्षितꣳरक्षाꣳसिजि
७ घाꣳसंत्यग्निः॥५॥खलुवैरक्षोहाग्नेत्वꣳसुजागृहिवयꣳसुमंदिषीमहीत्याहाग्निमे
वाधिपांकृत्वास्वपितिरक्षसामपहत्याअव्रत्यमिववाएषकरोतियोदीक्षितःस्वपि
तित्वमग्नेव्रतपाअसीत्याहाग्निर्वैदेवानांव्रतपतिःसएवैनंव्रतमालंभयतिदेवआ
मर्त्येष्वेत्याहदेवः॥६॥ह्येषसन्मर्त्येषुत्वंयज्ञेष्वीड्यइत्याहैतꣳहियज्ञेष्वीडतेपवैदी
क्षितात्सुषुपुषइंद्रियंदेवताःक्रामंतिविश्वेदेवाअभिमामाववृत्रन्नित्याहेंद्रिये
णैवैनंदेवताभिःसन्नयतियदेतद्यजुर्नब्रूयाद्यावतएवपशूनभिदीक्षेततावंतोस्य
पशवस्युरास्वेयत॥७॥सोमाभूयोभरेत्याहापरिमितानेवपशूनवरुंधेचंद्रमसिम ७
मभोगायभवेत्याहयथादेवतमेवैनाःप्रतिगृह्णातिवायवेत्वावरुणायत्वेतियदेव

मेतानानुदिशेद्यथादेवतंदक्षिणागमयेद्यादेवताभ्यो वृश्च्येतयदेवमेताअनुदि
शतियथादेवतमेवदक्षिणागमयतिनदेवताभ्यआ॥९॥ वृश्च्येतेदेवीरापोअपांनपादि
त्याहयद्वोमेध्यंयज्ञियंसदेवंतद्वोमावक्रमिषमितिवावैतदाहाच्छिंनंतंतुंपृथिव्याअ
नुगेषमित्याहसेतुमेवकृत्वात्येति॥१॥ भुंजतेयंछिंद्याद्रुंधेग्निराहदेवइयंदेवताभ्यआ
त्रयस्त्रिंशश्च॥४॥ ॥देवावैदेवयजनमध्यवसायदिशोनप्राजानंतेऽन्योन्यमुपाधा
वंत्वयाप्रजानामत्वयेतितेदित्यांसमध्रियंतत्वयाप्रजानामेतिसाब्रवीद्वरंवृणैमत्प्राय
णाएववोयज्ञामउदयनाअसन्नितितस्मादादित्यःप्रायणीयोयज्ञानामादित्यउद
यनीयःपंचदेवतायजतिपंचदिशोदिशांप्रज्ञात्यै॥१॥ अथोपंचाक्षरापङ्क्तिःपाङ्क्तोयज्ञो
यज्ञमेवावरुंधेपथ्यांस्वस्तिमयजन्प्राचीमेवतयादिशंप्राजानन्नग्निनादक्षिणा

ष० स०१ सोमेनप्रतीचीꣳसवित्रोदीचीमदित्योर्ध्वांपथ्याꣳस्वस्तिंयजतिप्राचीमेवतयादिशंप्र
८ जानातिपथ्याꣳस्वस्तिमिष्ट्वाग्नीषोमौयजतिचक्षुषीवाएतेयज्ञस्ययदग्नीषोमौताभ्या
मेवानुपश्यति॥२॥अग्नीषोमाविष्ट्वासवितारंयजतिसवितृप्रसूतएवानुपश्यतिस
वितारमिष्ट्वादितिंयजतीयंवाअदितिरस्यामेवप्रतिष्ठायानुपश्यत्यदितिमिष्ट्वामा
रुतीमृचमन्वाहमरुतोवैदेवानांविशोदेवविशंखलुवैकल्पमानंमनुष्यविशम
नुकल्पतेयन्मारुतीमृचमन्वाहविशांक्लृप्त्यैब्रह्मवादिनोवदंतिप्रयाजवदननू
याजंप्रायणीयंकार्यमनूयाजवत्॥३॥अप्रयाजमुदयनीयमितीमेवैप्रयाजाअमी
अनूयाजाःसैवसायज्ञस्यसंततिस्तत्तथानकार्यमात्मावैप्रयाजाःप्रजानूयाजा ६
यत्प्रयाजानंतरियादात्मानमंतरियाद्यदनूयाजानंतरियात्प्र

जामंतरियाद्यतःखलुवैयज्ञस्यविततस्यनक्रियतेतदनुयज्ञःपराभवतियज्ञंपरा
भवंतंयजमानोनु॥४॥पराभवतिप्रयाजवद्देवानूयाजवत्प्रायणीयंकार्यंप्रयाजव
दनूयाजवदुदयनीयंनात्मानमंतरेतिनप्रजांनयज्ञःपराभवतिनयजमानःप्राय
णीयस्यनिष्कासउदयनीयमभिनिर्वपतिसैवसायज्ञस्यसंततिर्याःप्रायणीयस्यया
ज्यायत्ताउदयनीयस्ययाज्याःकुर्यात्पराङमुंलोकमारोहेत्प्रमायुकस्याद्याःप्राय
णीयस्यपुरोनुवाक्यास्ताउदयनीयस्ययाज्याःकरोत्यस्मिन्नेवलोकेप्रतितिष्ठति
॥५॥प्रज्ञात्यैपश्यत्यनूयाजवद्यजमानोनुपुरोनुवाक्यास्ताअष्टौच॥५॥ ॥क
द्रूश्चवैसुपर्णीचात्मरूपयोरस्पर्धेतांसाकद्रूःसुपर्णीमजयत्साब्रवीत्तृतीय
स्यामितोदिविसोमस्तमाहरतेनात्मानंनिष्क्रीणीष्वेतीयंकद्रूरसौसुपर्णीछंदां

ष० स०१ ंसिसोपर्णयाःसाब्रवीदस्मैवैपितरौपुत्रान्बिभृतस्तृतीयस्यामितोदिविसोमस्त
९ माहरतेनात्मानंनिष्क्रीणीष्व॥१॥इतिमाकद्रूरवोचदितिजगत्युदपतच्चतुर्दशाक्षरा
सतीसाप्राप्यन्यवर्तततस्यैद्वेअक्षरेअमीयेतांसापशुभिश्चदीक्षयाचागच्छत्तस्मा
ज्जगतीछंदसांपशव्यतमातस्मात्पशुमंतंदीक्षोपनमतित्रिष्टुबुदपतत्त्रयोदशा
क्षरासतीसाप्राप्यन्यवर्तततस्यैद्वेअक्षरेअमीयेतांसादक्षिणाभिश्च॥२॥तप
साचागच्छत्तस्मात्त्रिष्टुभोलोकेमाध्यंदिनेसवनेदक्षिणानीयंतएतत्खलुवाव
तपइत्याहुर्यःस्वंददातीतिगायत्र्युदपतच्चतुरक्षरासत्यजयाज्योतिषातमस्या
अजाभ्यरुंधतदजायाअजत्वंसासोमंचाहरच्चत्वारिचाक्षराणिसाष्टाक्षरा ९
समपद्यतब्रह्मवादिनोवदंति॥३॥कस्मात्सत्याद्गायत्रीकनिष्ठाछंदसांसती

यज्ञमुखंपरीयायेतियदेवाः सोममाहरंत्तस्माद्यज्ञमुखंपर्यैत्तस्मात्तेजस्विनी
तमापद्यांहसवनेसमगृह्णान्मुखेनैकंयन्मुखेनसमगृह्णात्तदधयंत्तस्माद्द्विसव
नेशुक्रवतीप्रातःसवनंचमाध्यंदिनंचतस्मात्तृतीयसवनऋजीषमभिषुण्वंतिधी
तमिवहिमन्यंते॥४॥आशिरमवनयतिसशुक्रत्वायाथोसंभरत्येवैनत्तंःसोममा
ह्रियमाणंगंधर्वोविश्वावसुःपर्यमुष्णात्सतिस्रोरात्रीपरिमुषितोवसत्तस्मात्तिस्रो
रात्रीःक्रीतःसोमोवसतितेदेवाअब्रुवंत्स्त्रीकामावैगंधर्वाःस्त्रियानिष्क्रीणामेतिते
वाचंःस्त्रियमेकहायनींकृत्वातयानिरक्रीणंत्सारोहिद्रूपंकृत्वागंधर्वेभ्यः॥५॥अप
क्रम्यातिष्ठत्तद्रोहितोजन्मतेदेवाअब्रुवन्नपयुष्मत्क्रमीन्नास्मानुपावर्त्ततेविह्वया
महाइतिब्रह्मगंधर्वाअवदन्नगायंदेवाःसादेवानागायतउपावर्त्ततत्तस्माद्गायंतंःस्त्रि

ष०स०१ यःकामयंतेकामुकाएनंस्त्रियोभवंतियएवंवेदाथोयएवंविद्वानपिजन्येषुभवतिते
१० भ्यएवददत्कृतयद्धकृतयाः॥६॥भवंत्येकहायन्याक्रीणातिवाचैवैनंसर्वयाक्रीणा
तितस्मादेकहायनामनुष्यावाचंवदंत्यकूटयाकर्णयाश्लोणयासप्तशफयाक्रीणाति
सर्वयैवैनंक्रीणातियच्छ्वेतयाक्रीणीयाद्दुश्चर्मायजमानस्याद्यत्कृष्णयानुस्तरणीस्या
त्प्रमायुकोयजमानस्याद्यद्द्विरूपयावार्त्रघ्नीस्यात्सवान्यंजिनीयात्तंवान्योजनीयाद
रुणयापिंगाक्ष्याक्रीणात्येतद्वैवरुणस्यरूपंस्वयैवैनंदेवतयाक्रीणाति॥७॥निष्क्री
णीयदक्षिणाभिश्चवदंतिमन्यंतेगंधर्वेभ्योवकृतयाःपिंगाक्ष्यादशच॥८॥ ॥तद्धि
रण्यमभवत्तस्मादद्भ्योहिरण्यंपुनंतिब्रह्मवादिनोवदंतिकस्मात्सत्यादनस्थिकेन १०
प्रजाःप्रवीयंतेस्थन्वतीर्जायंतइतियद्धिरण्यंघृतेवधायजुहोतितस्मादनस्थिके

नप्रजाःप्रवीयंतेस्थन्वतीर्जायंतएतद्वाअग्नेःप्रियंधामयद्घृतंतेजोहिरण्यमियंते
शुक्रतनूरिदंवर्चइत्याहसतेजसमेवैनंꣳसतनुं॥१॥करोत्यथोसंभरत्येवैनंयद
बद्धमवदध्याद्गर्भाःप्रजानांपरापातुकास्युर्बद्धमवदधातिगर्भाणांधृत्यैनिष्टर्क्यं
बध्नातिप्रजानांप्रजननायवाग्वाएषायत्सोमक्रयणीजूरसीत्याहयद्धिमनसाजव
तेतद्वाचावदतिधृतामँस्याहमनसाहिवाग्धृताजुष्टाविष्णवइत्याह॥२॥यज्ञोवैवि
ष्णुर्यज्ञायैवैनांजु⁝नसे⁝ष्टांकरोतितस्यास्तेसत्यसवसःप्रसवइत्याहसवितृप्र
सूतामेववाचमवरुंधेकांडेकांडेवैक्रियमाणेयज्ञंꣳरक्षांꣳसिजिघांꣳसंत्येषख
लुवाअरक्षोहतःपंथायोग्नेश्चसूर्यस्यचसूर्यस्यचक्षुरारुहमग्नेरक्ष्णःकनीनि
कामित्याहयएवारक्षोहतःपंथास्तंꣳसमारोहति॥३॥वाग्वाएषायत्सोमक्रयणीचि

दसि मनासीत्याह शास्त्येवैनामेतत्तस्माच्छिष्टाः प्रजाजायंतेचिदसीत्याह यद्धिमन
साचेतयतेतद्वाचावदति मनासीत्याह यद्धिमनसाभिगच्छति तत्करोति धीरसीत्याह
यद्धिमनसाध्यायति तद्वाचा ॥४॥ वदति दक्षिणासीत्याह दक्षिणाह्येषा यज्ञियासीत्या
ह यज्ञियामेवैनां करोति क्षत्रियासीत्याह क्षत्रियाह्येषादितिरस्युभयतः शीर्ष्णीत्या
ह यदेवादित्यः प्रायणीयो यज्ञानामादित्य उदयनीयस्तस्मादेवमाह माहयद्बध्नास्या
दयतास्याद्यत्पद्बिवध्नानुस्तरणी स्यात्प्रमायुको यजमानस्यात् ॥५॥ यत्कर्णगृही
तावार्त्रघ्नी स्यात्सवान्यंजिनीयात्तं वान्योजिनीयान्मित्रस्त्वापदिबध्नात्वित्याह मित्रो
वैशिवो देवानां तेनैवैनां पदिबध्नाति पूषाध्वनः पात्वित्याहेयंवै पूषेमामेवास्या अधि
पाम कः समष्ट्या इंद्रायाध्यक्षायेत्याहेंद्रमेवास्या अध्यक्षं करोति ॥६॥ अनुत्वामाता

मन्यतामनुपितेत्याहानुमतमेवैनयाक्रीणातिसादेविदेवमच्छेहीत्याहदेवीह्येषादेवःसो
मइंद्रायसोममित्याहेंद्रायहिसोमआह्रियतेयदेतद्यजुर्नब्रूयात्पराच्येवसोमक्रयणी
याद्रुद्रस्त्वावर्तयत्वित्याहरुद्रोवैक्रूरः॥७॥देवानांतमेवास्मैपरस्ताद्दधात्यावृत्त्यैक्रू
रमिववाएतत्करोतियद्रुद्रस्यकीर्तयतिमित्रस्यपथेत्याहशांत्यैवाचावाएषविक्रीणी
तेयःसोमक्रयण्यास्वस्तिसोमसखापुनरेहिरय्येत्याहवाचैवविक्रीयपुनरात्मन्वाचं
धत्तेनुपदासुकास्यवाग्भवतियएवंवेद॥८॥सतनुंविष्णवइत्याहसमारोहतिध्यायति
तद्वाचायजमानस्यात्करोतिक्रूरोवेद॥७॥ ॥षट्पदान्यनुनिक्रामतिषडहंवाङ्ना
तिवदत्यृतसंवत्सरस्यायनेयावत्येववाक्तामवरुंधेसप्तमेपदेजुहोतिसप्तपदाशा
क्करीपशवःशक्करीपशूनेवावरुंधेसप्तग्राम्याःपशवःसप्तारण्याःसप्तछंदांस्युभय

प०स०१ स्यावरुध्येवस्य्यसिरुद्रासीत्याहरूपमेवास्याएतन्महिमानं॥१॥व्याचष्टेबृहस्पतिस्त्वा
१२ सुम्नेरण्वत्वित्याहब्रह्मवैदेवानांबृहस्पतिर्ब्रह्मणैवास्मैपशूनवरुंधेरुद्रैवसुभिराचि
केत्वित्याहावृत्यैपृथिव्यास्त्वामूर्धंनाजिघर्मिदेवयजनइत्याहपृथिव्याह्येषमूर्धायद्दे
वयजनमिडायाःपदइत्याहेडायैह्येतत्पदंयत्सोमक्रयण्यैघृतवतिस्वाहा॥२॥इत्याह
यदेवास्यैपदाद्घृतमपीप्यततस्मादेवमाहयदध्वर्युरनग्नावाहुतिंजुहुयादंधोध्वर्यु
स्याद्रक्षांसियज्ञंहन्युर्हिरण्यमुपास्यजुहोत्यग्निवत्येवजुहोतिनांधोध्वर्युर्भवतिन
यज्ञंरक्षांसिघ्नंतिकांडेकांडेवैक्रियमाणेयज्ञंरक्षांसिजिघांसंतिपरिलिखितं
रक्षःपरिलिखिताअरातयइत्याहरक्षसामपहत्यै॥३॥इदमहंरक्षसोग्रीवाअपिकृं १२
तामियोस्मान्द्वेष्टियंचवयंद्विष्मइत्याहद्वौवावपुरुषौयंचैवद्वेष्टियश्चैवनंद्वेष्टितयोरे

वानंतरायंग्रीवाः कृंतति पशवोवैसोमक्र यण्यैपदंयावत्तृतंः संवपतिपशूनेवावरुंधे
स्मेराय इतिसंवपत्यात्मानमेवाध्वर्युः॥४॥पशुभ्योनांतरेतित्वेराय इतियजमानायप्रयछति
यजमानएवरयिंदधातितोतेराय इति पत्नियाअर्धोवाएषआत्मनोयत्पत्नीयथागृहेषु
निधत्तेतादृगेवतत्वष्टीमतीतेसपेयेत्याहत्वष्टावैपशूनांमिथुनानांरूपकृद्रूपमेवपशु
षुदधात्यस्मैवैलोकायगार्हपत्यआधीयतेमुष्माआहवनीयोयद्गार्हपत्यउपवपेदस्मिं
लोकेपशुमांत्स्याद्यदाहवनीयेमुष्मिंलोकेपशुमांस्यादुभयोरुपवपत्युभयोरेवैनंलोक
योः पशुमंतंकरोति॥५॥महिमानंस्वाहापहत्याअध्वर्युर्ध्रियतेचतुर्विंशतिश्च॥८॥
॥ ॥ब्रह्मवादिनोवदंतिविचित्यः सोमा३ नविचित्या३ इतिसोमोवाओषधीनांराजात
स्मिन्यदापन्नंग्रसितमेवास्यतद्यद्विचिनुयाद्यथास्याद्ग्रसितंनिष्खिदतितादृगेवतत

पु०स०१ यन्नविचिनुयाद्यथाक्षन्नापन्नंविधावतितादृगेवतत्क्षोधुकोध्वर्युस्यात्क्षोधुकोयजमा
१३ नःसोमविक्रयिंत्सोमंशोधयेत्येवब्रूयाद्यदीतरं॥१॥यदीतरमुभयेनैवसोमविक्रयिण
मर्पयतितस्मात्सोमविक्रयीक्षोधुकोरुणोहस्माहौपवेशिःसोमक्रयणएवाहंतृतीयस
वनमवरुंधइतिपशूनांचर्मन्मिमीतेपशूनेवावरुंधेपशवोहितृतीयंसवनंयंकामयेता
पशुस्यादित्यृक्षतस्तस्यमिमीतर्क्षंवाअपशव्यमपशुरेवभवतियंकामयेतपशुमान्स्या
त्॥२॥इतिलोमतस्तस्यमिमीतेतद्वैपशूनांरूपंरूपेणैवास्मैपशूनवरुंधेपशुमानेवभव
त्यपामंतेक्रीणातिसरसमेवैनंक्रीणात्यमात्योसीत्याहामैवैनंकुरुतेशुक्रस्तेग्रहइत्याहशु
क्रोह्यस्यग्रहोनसाच्छयातिमहिमानमेवास्याच्छयात्यनसा॥३॥अच्छयातितस्मादनोवा १३
ह्यंसमेजीवनंयत्रखलुवाएतंशीर्ष्णाहरंतितस्माच्छीर्षहार्यंगिरेर्जीवनमभित्यंदेव

ꣳसवितारमित्यतिच्छंदसर्चा मिमीतेतिच्छंदा वै सर्वाणि छंदाꣳसि सर्वैरेवैनं छंदोभिर्मि
मीते वर्ष्म वा एषा छंदसां यदतिच्छंदा यदतिच्छंदसर्चा मिमीते वर्ष्मैवैनꣳ समानानां करोत्येकयै
कयोत्सर्गं ॥४॥ मिमीते यातयाम्निया यातयाम्निये वा एनं मिमीते तस्मान्नानावीर्या अंगुलयः
सर्वास्वंगुष्ठमुपनिगृह्णाति तस्मात्समावद्वीर्योन्याभिरंगुलिभिस्तस्मात्सर्वा अनु संचरति
यत्सह सर्वाभिर्मिमीत संश्लिष्टा अंगुलयो जायेरन्नेकयैकयोत्सर्गं मिमीते तस्माद्विभक्ता
जायंते पंचकृत्वो यजुषा मिमीते पंचाक्षरा पंक्तिः पांक्तो यज्ञो यज्ञमेवाव रुंधे पंचकृत्वस्तूष्णीं
॥५॥ दश संपद्यंते दशाक्षरा विराडन्नं विराड्विराजमेवाव रुंधे यद्यजुषा मिमीते भूतमेवाव रुं
धे यत्तूष्णीं भविष्यद्यद्वै तावानेव सोमस्याद्यावंतं मिमीते यजमानस्यैव स्यान्नापि सदस्यानां
प्रजाभ्यस्त्वेत्युपसमूहति सदस्यानेवान्वाभजति वाससोपनह्यति सर्वदेवत्यं वै ॥६॥ वा

सःसर्वाभिरेवैनंदेवताभिःसमर्धयतिपशवोवैसोमःप्राणायत्वेत्युपनह्यतिप्राणमेवपशुषु
दधातिव्यानायत्वेत्यनुश्रंथतिव्यानमेवपशुषुदधातितस्मात्स्वपंतंप्राणानजहति॥८॥इतरं
पशुमांत्स्याद्यात्यनसोत्सर्गेदूष्णीं सर्वदेवत्यंवैत्रयस्त्रिंशच्च॥९॥ ॥यत्कलयातेशफे
नतेक्रीणानीतिपणेतागोअर्घंसोमंकुर्यादगोअर्घंयजमानमगोअर्घमध्वर्युंगोस्तुमहि
मानंनावतिवेद्रवातेक्रीणानीत्येवब्रूयाद्गोअर्घमेवसोमंकरोतिगोअर्घंयजमानंगोअर्घ
मध्वर्युंनगोर्महिमानमवतिरत्यजयाक्रीणातिसतपसमेवैनंक्रीणातिहिरण्येनक्रीणाति
सशुक्रमेव॥१॥एनंक्रीणातिधेन्वाक्रीणातिसाशिरमेवैनंक्रीणात्यृषभेणक्रीणातिसेंद्रमे
वैनंक्रीणात्यनडुहाक्रीणातिवन्हिर्वाअनड्वान्वन्हिनैववन्हियज्ञस्यक्रीणातिमिथुनाभ्यां १४
क्रीणातिमिथुनस्यावरुध्यैवाससाक्रीणातिसर्वदेवत्यंवैवासःसर्वाभ्यएवैनंदेवताभ्यः

न्नाद्य

क्रीणातिदशसंपद्यंतेदशाक्षराविराडन्नंविराड्विराजैवान्नमवरुंधे॥२॥तपसस्तनूरसिप्र
जापतेर्वर्णइत्याहपशुभ्यएवतदध्वर्युर्निन्हुतआत्मनोनाव्रस्कायगछतिश्रियंप्रपशूना
प्नोतियएवंवेदशुक्रंतेशुक्रेणक्रीणामीत्याहयथायजुरेवैतद्देवावैयेनहिरण्येनसोममक्री
णंतदभीषहापुनराददतकोहितेजसाविक्रेष्यतइतियेनहिरण्येन॥३॥सोमंक्रीणीयात्तद
भीषहापुनराददीततेजएवात्मंधत्तेस्मेज्योतिःसोमविक्रयिणितमइत्याहज्योतिरेवयज
मानेदधातितमसासोमविक्रयिणमर्पयतियदनुपग्रथ्यहन्याद्दंदशूकास्तांसमांसर्पा
स्युरिदमहंसर्पाणांदंदशूकानांग्रीवाउपग्रथ्नामीत्याहादंदशूकास्तांसमांसर्पाभवंति
तमसासोमविक्रयिणंविध्यतिस्वान॥४॥भ्राजेत्याहैतेवाअमुष्मिंलोकेसोममरक्षंते
भ्योधिसोममाहरन्यदेतेभ्यःसोमक्रयणान्नानुदिशेदक्रीतोस्यसोमस्यान्नास्यैतेमुष्मिं

ष०स०१ लोकेसोमꣳरक्षेयुर्यदेतेभ्यःसोमक्रयणाननुदिशतिक्रीतोऽस्यसोमोभवत्येतेऽस्यामुष्मिंल्लो
१५ केसोमꣳरक्षंति॥५॥सशुक्रमेवरुंध इतियेनहिरण्येनस्वानच्चतुश्चत्वारिꣳशच्च॥३०॥ ॥
वारुणोवैक्रीतःसोमउपनद्धोमित्रोनएहिसुमित्रधा इत्याहशांत्याइंद्रस्योरुमाविशदक्षि
णमित्याहदेवावैयꣳसोममक्रीणंतमिंद्रस्योरौदक्षिणआसादयन्नेषखलुवाएतर्हींद्रो
योयजतेतस्मादेवमाहोदायुषास्वायुषेत्याहदेवताएवान्वारभ्योत्॥१॥तिष्ठत्युर्वंतरि
क्षमन्विहीत्याहांतरिक्षदेवत्योह्येतर्हिसोमोऽदित्याःसदोऽस्यदित्याःसद आसीदेत्याह
यथायजुरेवैतद्विवाएनमेतदर्धयतियद्वारुणꣳसंतंमैत्रंकरोतिवारुण्यर्चासादतिस्वयैवै
नंदेवतयासमर्धयतिवाससापर्यानह्यतिसर्वदेवत्यंवैवासःसर्वाभिरेव॥२॥एनंदेवत १५
यासमर्धयत्यथोरक्षसामपहत्यैवनेषुव्यंतरिक्षंततानेत्याहवनेषुहिव्यंतरिक्षंतता

नवाजमर्वत्स्वित्याहवाजंह्यर्वत्सुपयोअघ्नियास्वित्याहपयोह्यघ्नियासुहृत्सुक्रतुमि
त्याहहृत्सुहिक्रतुंवरुणोविक्ष्वग्निमित्याहवरुणोहिविक्ष्वग्निंदिविसूर्य॥३॥इत्याहदि
विहिसूर्यंसोममद्राविक्त्याहग्रावाणोवाअद्रयस्तेषुवाएषसोमंदधातियोयजतेतस्मा
देवमाहोदुत्यंजातवेदसमितिसौर्य्यर्चाकृष्णाजिनंप्रत्यानह्यतिरक्षसामपहत्याउस्रा
वेतंधूर्षाहावित्याहयथायजुरेवैतत्प्रच्यवस्वभुवस्पतइत्याहभूतानांहि॥४॥एषप
तिर्विश्वान्यभिधामानीत्याहविश्वानिह्येषोभिधामानिप्रच्यवतेमात्वापरिपरीविददित्याह
यदेवादःसोममाह्रियमाणंगंधर्वोविश्वावसुःपर्यमुष्णात्तस्मादेवमाहापरिमोषाययज
मानस्यस्वस्त्ययन्यसीत्याहयजमानस्यैवैषयज्ञस्यान्वारंभोनवच्छित्त्यैवरुणोवाएषय
जमानमभ्येतियत्॥५॥क्रीतःसोमउपनद्धोनमोमित्रस्यवरुणस्यचक्षसइत्याहशांत्या

ष०स०१ आसोमंवहंत्यग्निनाप्रतितिष्ठतेतौसंभवंतौयजमानमभिसंभवतः पुराखलुवावैष
१६ मेधायात्मानमारभ्यचरतियोदीक्षितोयदग्नीषोमीयंपशुमालभतआत्मनिष्क्रय
णएवास्यसतस्मात्तस्यनाश्यंपुरुषनिष्क्रयणइवह्यथोखल्वाहुरग्नीषोमाभ्यांवा
इंद्रोवृत्रमहन्नितियदग्नीषोमीयंपशुमालभतेवार्त्रघ्नएवास्यसतस्माद्वाश्यंवारुण्य
र्चापरिषिंचतिस्वयैवैनंदेवतयापरिषिंचति॥१०॥अन्वारभ्योत्सर्वाभिरेवसूर्यंभृताना
ंह्येतियदाहुःसप्तविंशतिश्च॥११॥प्राचीनवंशंयावंतऋक्सामेवाग्वेदेवेभ्यो
देवावैदेवयजनंकइश्वतध्यिरण्यंषद्ध्दानिब्रह्मवादिनोविचित्योयत्कलयातेवा
रुणोवैक्रीतःसोमएकादश॥११॥ ॥प्राचीनवंशंस्वाहेत्याहयेंतःशराह्येषसं १६
तपसाञ्चयत्कर्णगृहीतेतिलोमतोवारुणःषद्भसतिः॥७६॥ ॥१॥ ॥हरिःॐ॥ ॥

॥हरिः ॐ॥ ॥यदुभौ विमुच्यातिथ्यं गृह्णीयाद्यज्ञं विच्छिंद्याद्यदुभावविमुच्य यथा
नागतायातिथ्यं क्रियते तादृगेव तद्विमुक्तोन्योनड्वान्भवत्यविमुक्तोन्योथातिथ्यं गृह्णा
ति यज्ञस्य संतत्यै पत्न्यन्वारभते पत्नी हि पारीणह्यस्येशे पत्नियैवानुमतं निर्वपति य
द्वै पत्नी यज्ञस्य करोति मिथुनं तदथो पत्नियाएव ॥१॥ एष यज्ञस्यान्वारंभोनवच्छित्त्यै
यावद्भिर्वै राजानुचरैरागच्छति सर्वेभ्यो वै तेभ्य आतिथ्यं क्रियते छंदांसि खलु
वै सोमस्य राज्ञोनुचराण्यग्नेरातिथ्यमसि विष्णवे त्वेत्याह गायत्रिया एवैतेन करो
ति सोमस्यातिथ्यमसि विष्णवे त्वेत्याह त्रिष्टुभ एवैतेन करोत्यतिथेरातिथ्यमसि वि
ष्णवे त्वेत्याह जगत्यै ॥२॥ एवैतेन करोत्यग्नये त्वा रायस्पोषदावुंने विष्णवे त्याहा
नुष्टुभ एवैतेन करोति श्येनाय त्वा सोमभृते विष्णवे त्वेत्याह गायत्रिया एवैते

ष०सं०२ १८ नकरोतिपंचकृत्वोगृह्णातिपंचाक्षरापंक्तिः पांक्तोयज्ञोयज्ञमेवावरुंधेब्रह्मवादिनोव
दंतिकस्मात्सत्याद्गायत्रियाउभयतआतिथ्यस्यक्रियतइतियदेवादःसोममा॥३॥अ
हरत्तस्माद्गायत्रियाउभयतआतिथ्यस्यक्रियतेपुरस्ताच्चोपरिष्टाच्चशिरोवाएतद्य
ज्ञस्ययदातिथ्यंनवकपालःपुरोडाशोभवतितस्मान्नवधाशिरोविष्यूतंनवकपालःपु
रोडाशोभवतितेत्रयस्त्रिकपालास्त्रिवृतास्तोमेनसंमितास्तेजस्त्रिवृत्तेजएवयज्ञस्यशी
र्षदधातिनवकपालःपुरोडाशोभवतितेत्रयस्त्रिकपालास्त्रिवृतास्तोमेनसंमितास्त्रि
वृद्वै॥४॥प्राणस्त्रिवृतमेवप्राणमभिपूर्वंयज्ञस्यशीर्षदधातिप्रजापतेर्वाएतानिपक्ष्मा
णियदश्ववालाऐक्षवीतिरश्चीयदाश्ववालःप्रस्तरोभवत्यैक्षवीतिरश्चीप्रजापतेरेवत १८
च्चक्षुःसंभरतिदेवावैयाआहुतीरजुहवुस्ताअसुरानिष्कावमादंतेदेवाःकार्ष्मर्यमपश्य

न्कर्मण्योवैकर्मैनेनकुर्वीतेतितेकार्ष्मर्यमयान्परिधीन्॥५॥अकुर्वततैर्वैतेरक्षांस्य
पाघ्नतयत्कार्ष्मर्यमयाःपरिधयोभवंतिरक्षसामपहत्यैसंस्पर्शयतिरक्षसामनन्वव
चारायनपुरस्तात्परिदधात्यादित्योह्येवोद्यन्पुरस्ताद्रक्षांस्यपहंत्यूर्ध्वेसमिधावाद
धात्युपरिष्टादेवरक्षांस्यपहंतियजुषान्यांतूष्णीमन्यांमिथुनत्वायद्वेआदधाति
द्विपाद्यजमानःप्रतिष्ठित्यैब्रह्मवादिनोवदंति॥६॥अग्निश्चवाएतौसोमश्चकथासो
मायातिथ्यंक्रियतेनाग्नयइतियदग्नावग्निंमथित्वाप्रहरतितेनैवाग्नयआतिथ्यंक्रिय
तेथोखल्वाहुरग्निःसर्वादेवताइतियद्धविरासाद्याग्निंमंथतिहव्यायैवासन्नायसर्वा
देवताजनयति॥७॥पत्नियाएवजगत्याआत्रिवृद्वेपरिधीन्वदंत्येकचत्वारिंशच्च॥१॥
॥ ॥देवासुराःसंयत्ताआसंतेदेवामिथोविप्रियाआसंतेऽन्योन्यस्मैज्यैष्ठ्यायातिष्ठ

स०ष०२ १८

मानाः पंचधाव्यक्रामन्नग्निर्वसुभिः सोमो रुद्रैरिंद्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पति
र्विश्वैर्देवैस्तेमन्यंतासुरेभ्यो वा इदं भ्रातृव्येभ्यो रध्यामो यान इमाः प्रियास्तनुवस्ताः सम
वद्यामहै ताभ्यः स निर्ऋछाद्यः ॥१॥ नः प्रथमो ऽन्योन्यस्मै द्रुह्यादिति तस्माद्यः सतानू
नप्त्रिणां प्रथमो द्रुह्यति स आर्तिमार्छति यत्तानूनप्त्रं समवद्यति भ्रातृव्याभिभूत्यै भव
त्यात्मना परास्य भ्रातृव्यो भवति पंचकृत्वो वद्यति पंचधा हि ते तत्समवाद्यंताथो पंचाक्ष
रा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुंध आपतये त्वा गृह्णामीत्याह प्राणो वै ॥२॥ आपतिः
प्राणमेव प्रीणाति परिपतय इत्याह मनो वै परिपतिर्मन एव प्रीणाति तनूनप्त्र इत्याह तनु
वो हि ते ताः समवाद्यंत शाक्वराय इत्याह शक्त्यै हि ते ताः समवाद्यंत शक्मन्नोजिष्ठायेत्या १८
हौजिष्ठं हि ते तदात्मनः समवाद्यंतानाधृष्टमस्यनाधृष्यमित्याहानाधृष्टं ह्येतदना

धृष्यं देवानामोजः ॥३॥ इत्याह देवानां ह्येतदोजो भिशस्तिपा अनभिशस्तेन्यमित्या
हाभिशस्तिपा ह्येतदनभिशस्तेन्यमनु मे दीक्षां दीक्षापतिर्मन्यतामित्याह यथायजुरे
वैतद्घ्नं तं वै देवा अन्वं कृत्वा सोममघ्नंनंतिकमिव खलु वा अस्यैतच्चरंति यत्तानूनप्त्रेण
प्रचरंत्यंशुरंशुस्ते देव सोमाप्यायतामित्याह यत् ॥४॥ एवास्याप्युवायते यन्मीयते
तदेवास्यैतेनाप्याययत्या तुभ्यमिंद्रः प्यायतामा त्वमिंद्राय प्यायस्वेत्याहोभावेवेंद्रं च
सोमं चाप्याययत्या प्याययसखीन्त्सन्या मेधयेत्याहर्त्विजो वा अस्य सखायस्तानेवा
प्याययति स्वस्ति ते देव सोम सुत्यामशीय ॥५॥ इत्याहाशिषमेवैतामाशास्ते प्र वा एते
स्माल्लोकाच्च्यवंते ये सोममाप्याययंत्यंतरिक्षदेवत्यो हि सोम आप्यायित एष्टा रायः प्रे
षे भगायेत्याह द्यावापृथिवीभ्यामेव नमस्कृत्यास्मिन्नेव लोके प्रतितिष्ठंति देवासुराः

ष०स०२ संयत्ताआसंतेदेवाबिभ्यतोग्निंप्राविशंतस्मादाहुरग्निःसर्वादेवताइतिते॥६॥अग्नि
१९ मेववरूथंकृत्वासुरानभ्यभवन्नग्निमिवखलुवाएषप्रविशतियोवांतरदीक्षामुपैतिभ्रा
तृव्याभिभूत्यैभवत्यात्मनापरास्यभ्रातृव्योभवत्यात्मानमेवदीक्षयापातिप्रजामवांत
रदीक्षयासंतरांमेखलांसमायछतेप्रजाह्यांतरतरातप्तव्रतोभवतिनिर्ह्यग्निःशीते
नवायतिसमिध्येयातेअग्नेरुद्रियातनूरित्याहस्वयैवैनद्देवतयाव्रतयतिसयोनित्वा
यशांत्यै॥७॥योवाओजआहयदशीयेतितेष्वएकादशच॥२॥ ॥तेषामसुराणांतिस्रः
पुरआसन्नयस्मय्यवमाथरजताथहरिणीतादेवाजेतुंनाशक्नुवंताउपसदैवाजि
गीषंतस्मादाहुर्यश्चैवंवेदयश्चनोपसदावैमहापुरंजयंतीतितइषुंसमस्कुर्वताग्नि १९
मनीकंसोमंशल्यंविष्णुंतेजनंतेब्रुवन्कइमामसिष्यतीति॥१॥रुद्रइत्यब्रुवन्रु

द्रो वै क्रूरः सोस्यत्विति सोब्रवीद्वरं वृणा अहमेव पशूनामधिपतिरसानीति तस्मा
द्रुद्रः पशूनामधिपतिस्तां रुद्रोवासृजत्स तिस्रः पुरो भित्वैभ्यो लोकेभ्योसुरान्प्रा
णुदत यदुपसद उपसद्यंते भ्रातृव्यपराणुत्यै नान्यामाहुतिं पुरस्ताज्जुहुयाद्यदन्या
माहुतिं पुरस्ताज्जुहुयात् ॥२॥ अन्यन्मुखं कुर्यात्स्रुवेणाघारमाघारयति यज्ञस्य
स्य ज्ञात्यै पराङतिक्रम्य जुहोति पराच एवैभ्यो लोकेभ्यो यजमानो भ्रातृव्यान्प्रणुदते
पुनरत्याक्रम्योपसदं जुहोति प्रणुद्यैवैभ्यो लोकेभ्यो भ्रातृव्यांजित्वा भ्रातृव्यलोक
मभ्यारोहति देवा वै याः प्रातरुपसद उपासीदन्नन्हस्ताभिरसुरान्प्राणुदंत याः सा
यं रात्रियै ताभिर्यत्सायं प्रातरुपसदः ॥३॥ उपसद्यंते होरात्राभ्यामेव तद्यजमानो भ्रा
तृव्यान्प्रणुदते याः प्रातर्याज्यास्युस्ताः सायं पुरोनुवाक्याः कुर्यादयातयामताय

तिस्र उपसद उपैति त्रय इमे लोका इमानेव लोकान्प्रीणाति षड्उपद्यं तेषड्वाऋतव ऋ
तूनेव प्रीणाति द्वादशाहीने सोम उपैति द्वादश मासाः संवत्सरः संवत्सरमेव प्रीणाति
चतुर्विंशतिः सं॥४॥पद्यं तेच्चतुर्विंशतिरर्धमासा अर्धमासानेव प्रीणात्याराग्रा
मवांतरदीक्षामुपेयाद्यः कामयेतास्मिन्मे लोकेर्धुकं स्यादित्येकमग्रेथ द्वावथ त्री
नथ चतुर एषा वा आराग्रावांतरदीक्षास्मिन्नेवास्मै लोकेर्धुकं भवति परोवरीयसीम
वांतरदीक्षामुपेयाद्यः कामयेतामुष्मिन्मे लोकेर्धुकं स्यादिति चतुरोग्रेथ त्रीनथ द्वाव
थैकमेषा वै परोवरीयस्यवांतरदीक्षामुष्मिन्नेवास्मै लोकेर्धुकं भवति॥५॥असिष्यतीं
ति जुहुयात्तायं प्रातरुपसदश्चतुर्विंशतिः संचतुरोग्रे षोडश च॥३॥ ॥सुवर्गं वा ए २०
ते लोकं यंति य उपसद उपयंति तेषां य उन्नयते हीयत एव सनोदनेषीति सून्नीयमि

वयोवैस्वार्थेतांयतांःश्रांतोहीयतउतमसनिष्ठ्यायसहवसतितस्मात्सहकुन्नीय
नापरमुन्नयेतरक्षोन्त्येतैतर्हिपशूनांःरूपंःरूपेणैवपशून्नवरुंधे ॥१॥ यज्ञोदेवेभ्यो
निलायतविष्णूरूपंकृत्वासपृथिवींप्राविशत्तंदेवाहस्तांत्संःरभ्यैछंतमिंद्रउपर्युपर्यत्य
क्रामत्सोब्रवीत्कोमायमुपर्युपर्यत्यक्रमीदित्यहंदुर्गेहंतेत्यथकस्त्वमित्यहंदुर्गादाह
र्तेतिसोब्रवीद्दुर्गेवैहंतावोचथावराहोयंवाममोषः ॥२॥ सप्तानांगिरीणांपरस्ताद्वित्तंवे
द्यमसुराणांबिभर्तितंजहीयदिदुर्गेहंतासीतिसदर्भपुंजीलमुद्वृह्यसप्तगिरीन्भित्वा
तमहंत्सोब्रवीद्दुर्गाद्वाआहर्त्तावोचथारसमाहरेतितमभ्यायज्ञएवयज्ञमाहरद्यत्त
द्वित्तंवेद्यमसुराणामविंदंततदेकंवेद्यैवेदित्वमसुराणां ॥३॥ वाग्वाइदमग्रआसीद्या
वदासीनःपरापश्यतितावद्देवानांतेदेवाअब्रुवन्नस्त्वेवनोस्यामपीतिकियद्दोदास्या

प०स०
२१
म इति यावदियं सलावृकी त्रिः परिक्रामति तावन्नो दत्तेति स इंद्रः सलावृकी रूपं कृत्वे
मां त्रिः सर्वतः पर्यक्रामत्तदिमामविंदंत यदिमामविंदंत तद्वेद्यै वेदित्वं ॥४॥ सा वा इयं स
र्वैव वेदिरियति शक्ष्यामीति त्वा अवमाय यजंते त्रिंशत्पदानि पश्चात्तिरश्ची भवति ष
ट्त्रिंशत्प्राची चतुर्विंशतिः पुरस्तात्तिरश्ची दश दश संपद्यंते दशाक्षरा वै विराडन्नं विरा
ड्विराजैवान्नाद्यमवरुंधत उद्धंति यदेवास्या अमेध्यं तदपहत्य उद्धंति तस्मादोषधयः प
राभवंति बर्हिस्तृणाति प्रजा वै बर्हिर्यजमान उत्तरबर्हिर्यजमानमेवायजमानादुत्त
रं करोति तस्माद्यजमानो यजमानादुत्तरः ॥५॥ कंधेवाममोषो वेदित्वमक्षराणां वेदि
त्वं भवंति पंचविंशतिश्च ॥४॥ ॥ यद्वा अनीशानो भारमादत्ते वि वै स लिशते यद्वा २१
दशासान्हस्योपसदस्सु क्रियेत हीनस्य यत्तस्य विलोमं क्रियेत तिस्र एव सान्हस्योप

सदोह्वादशाहीनस्ययज्ञस्यसवीर्यत्वायाथोसलोमक्रियतेवत्सस्यैकस्तनोभागी
हिसोथैकꣳस्तनव्रतमुपैत्यथद्वावथत्रीनथचतुरएतद्वै॥१॥क्षुरपविनामव्रतंयेनप्र
जातान्भ्रातृव्यान्नुदतेप्रतिजनिष्यमाणानथोकनीयसैवभूयउपैतिचतुरोग्रेस्तना
न्व्रतमुपेत्यथत्रीनथद्वावथैकमेतद्वैसुजघनंनामव्रतंतपस्यꣳसुवर्ग्यमथोप्रैवजाय
तेप्रजयापशुभिर्यवागूराजन्यस्यव्रतंक्रूरेववैयवागूःक्रूरइव॥२॥राजन्योवज्रस्यरू
पꣳसमृद्ध्याआमिक्षावैश्यस्यपाकयज्ञस्यरूपंपुष्ट्यैपयोब्राह्मणस्यतेजोवैब्राह्मणस्ते
जःपयस्तेजसैवतेजःपयआत्मंधत्तेथोपयसावैगर्भावर्धंतेगर्भइवखलुवाएषयद्दी
क्षितोयदस्यपयोव्रतंभवत्यात्मानतद्वर्धयतित्रिव्रतोवैमनुरासीद्द्विव्रताअसुराएक
व्रताः॥३॥देवाःप्रातर्मध्यंदिनेसायंतन्मनोर्व्रतमासीत्पाकयज्ञस्यरूपंपुष्ट्यैप्रात

श्व सायंचासुराणांनिर्मध्यंक्षुधोद्रूपंततस्तेपराभवन्मध्यंदिनेमध्यरात्रेदेवानांतत
स्तेभवंत्स्वर्गंलोकमायन्यदस्यमध्यंदिनेमध्यरात्रेव्रतंभवतिमध्यतोवाअन्नेन
भुंजतेमध्यतएवतदूर्जंधत्तेभ्रातृव्याभिभूत्यैभवत्यात्मना॥४॥परास्यभ्रातृव्यो
भवतिगर्भोवाएषयद्दीक्षितोयोनिर्दीक्षितविमितंयद्दीक्षितोदीक्षितविमितात्प्रवसे
द्यथायोनेर्गर्भःस्कंदतितादृगेवतंनप्रवस्तव्यमात्मनोगोपीथायैषवैव्याघ्रःकुलगो
पोयदग्निःस्तस्माद्यद्दीक्षितःप्रवसेत्सएनमीश्वरोनूत्थायहंतोर्नप्रवस्तव्यमात्म
नोगुप्त्यैदक्षिणतःशयएतद्वैयजमानस्यायतनंस्वएवायतनेशयेग्निमभ्यावृ
त्यशयेदेवताएवयज्ञमभ्यावृत्यशये॥५॥एतद्वैक्रूरइवैकव्रताआत्मनायजमा २२
नस्यत्रयोदशच॥५॥ ॥पुरोहविषिदेवयजनेयाजयेद्यंकामयेतोपैनमुत्तरोयज्ञो

नमेदभिसुवर्गंलोकंजयेदित्येतद्वैपुरोहविर्देवयजनंयस्यहोताप्रातरनुवाक
मनुब्रुवन्नग्निमपआदित्यमभिविपश्यत्युपेनमुत्तरोयज्ञोनमत्यभिसुवर्गंलोकं
जयत्याप्तेदेवयजनेयाजयेद्भ्रातृव्यवंतंपंथांवाधिस्पर्शयित्वातैवायावन्नानसेया
तवै॥१॥नरस्थायैतद्वाआप्तंदेवयजनमाप्नोत्येवभ्रातृव्यंनैनंभ्रातृव्यआप्नोत्येको
न्नतेदेवयजनेयाजयेत्पशुकाममेकोन्नतावैदेवयजनादंगिरसःपशूनसृजंतां
तरासदोहविर्धानेउंनतःस्यादेतद्वाएकोन्नतंदेवयजनंपशुमानेवभवतित्र्युंनतेदे
वयजनेयाजयेत्सुवर्गकामंत्र्युंनतावैदेवयजनादंगिरसःसुवर्गंलोकमायन्नंतराह
वनीयंचहविर्धानंच॥२॥उन्नतःस्यादंतराहविर्धानंचसदश्चांतरासदश्चगार्हप
त्यंचैतद्वैत्र्युंनतंदेवयजनंसुवर्गंलोकमेतिप्रतिष्ठितेदेवयजनेयाजयेत्प्रतिष्ठाका

प०स०२ ममेतद्धैप्रतिष्ठितंदेवयजनंयत्सर्वतःसमंप्रत्येवतिष्ठतियत्रान्याअन्याओषधयोव्यति
२३ षक्ताःस्युस्तद्याजयेत्पशुकाममेतद्धैपशूनांरूपंरूपेणैवास्मैपशून्॥३॥अवरुंधेपशु
मानेवभवतिनिर्ऋतिगृहीतेदेवयजनेयाजयेद्यंकामयेतनिर्ऋत्यास्ययज्ञंग्राहयेय
मित्येतद्धैनिर्ऋतिगृहीतंदेवयजनंयत्सहृश्यैसत्याऋक्षंनिर्ऋत्यैवास्ययज्ञंग्राहयति
व्याहृत्तेदेवयजनेयाजनेद्व्यावृत्कामंयंपात्रेवातल्पेवामीमांसेरन्प्राचीनमाह
वनीयात्स्यात्प्रवणंस्यात्प्रतीचीनंगार्हपत्यादेतद्धैव्यावृत्तंदेवयजनंविपाप्मनाभ्रातृव्येणा
वर्ततेनैनंपात्रेनतल्पेमीमांसंतेकार्येदेवयजनेयाजयेद्भूतिकामंकार्योवैपुरुषोभव
त्येव॥४॥यातवैहविर्धानंचपशून्याप्मनाष्टादशच॥६॥ ॥तेभ्यउत्तरवेदिःसिंहीरू २३
पंकृत्वोभयानंतरापक्रम्यातिष्ठत्तेदेवाअमन्यंतयतरान्वाइयमुपावर्त्स्यतितइदं

भविष्यंतीतितामुपामंत्रयंतसाब्रवीद्वरंवृणैसर्वान्मयाकामान्व्यश्नवथपूर्वांतुमाग्ने
राऊतिरश्नवताइतितस्माडुत्तरवेदिंपूर्वामग्नेर्व्याघारयंतिवारेवृतꣳह्यस्यैशम्यया
परिमिमीते॥१॥मात्रैवास्यैसाथोयुक्तेनैवयुक्तमवरुंधेवित्तायनीमेसीत्याहवित्ताह्येना
नावत्तिक्तायनीमेसीत्याहतिक्ताह्येनानावदवतान्मानाथितमित्याहनाथितान्ह्येनाना
वदवतान्माव्यथितमित्याहव्यथितान्ह्येनानावद्विदेरग्निर्नभ॥२॥अग्नेअंगिरइतित्रि
र्हरतियएवेषुलोकेष्वग्नयस्तानेवावरुंधेतूष्णींचतुर्थꣳहरत्यनिरुक्तमेवावरुंधेसिꣳ
हीरसिमहिषीरसीत्याहसिꣳहीह्येषाभूत्वोभयानंतरापक्रम्यातिष्ठदुरुप्रथस्वो
रुतेयज्ञपतिःप्रथतामित्याहयजमानमेवप्रजयापशुभिःप्रथयतिध्रुवा॥३॥असी
तिसꣳहंतिधृत्यैदेवेभ्यःशुंधस्वदेवेभ्यःशुंभस्वेत्यवचोक्षतिप्रचकिरतिशुध्याइंद्रघो

ष० स० २ षस्त्वावसुभिःपुरस्तात्पात्वित्याहदिग्भ्यएवैनान्प्रोक्षतिदेवांश्चवैउत्तरवेदिरुपाववर्त्ते
२४ हैवविजयामहाइत्यसुरावज्रमुद्यत्यदेवानभ्यायंततानिंद्रघोषोवसुभिःपुरस्तादप॥४॥
अनुदतमनोजवाःपितृभिर्दक्षिणतःप्रचेताःरुद्रैःपश्चाद्विश्वकर्मादित्यैरुत्तरतोयदे
वमुत्तरवेदिंप्रोक्षतिदिग्भ्यएवतद्यजमानोभ्रातृव्यान्प्रणुदतइंद्रोयतींत्सालावृकेभ्यः
प्रायच्छत्तांदक्षिणतउत्तरवेद्याआदन्यत्प्रोक्षणीनामुच्छिष्येततद्दक्षिणतउत्तरवेद्यै
निनयेद्यद्देवतत्क्रूरंतत्तेनशमयतियंद्विष्यात्तंध्यायेत्त्वुचैवैनमर्पयति॥५॥मिमी
तेनामऋवापशुचांत्रीणिच॥७॥ ॥सोत्तरवेदिरब्रवीत्सर्वान्मयाकामान्व्यश्नवथे
तितेदेवाअकामयंतासुरान्भ्रातृव्यानभिभवेमेतितेजुहवुःसिंहीरसिसपत्नसा २४
हीस्वाहेतितेसुरान्भ्रातृव्यानभ्यभवंतेसुरान्भ्रातृव्यानभिभूयाकामयंतप्रजांविंदे

महीतितेजुहवुःसिंऽहीरसिसुप्रजावनिःस्वाहेतितेप्रजामविंदंततेप्रजांवित्वा॥१॥
अकामयंतपशून्विंदेमहीतितेजुहवुःसिंऽहीरसिरायस्पोषवनिस्वाहेतितेपशून्विं
दंततेपशून्वित्वाकामयंतप्रतिष्ठांविंदेमहीतितेजुहवुःसिंऽहीरस्यादित्यवनिस्वाहे
तितइमांप्रतिष्ठामविंदंततइमांप्रतिष्ठांवित्वाकामयंतदेवताआशिषउपेयामेतिते
जुहवुःसिंऽहीरस्यावहदेवान्देवयते॥२॥यजमानायस्वाहेतितेदेवताआशिषउ
पायन्पंचकृत्वोव्याघारयतिपंचाक्षरापंक्तिःपांक्तोयज्ञोयज्ञमेवावरुंधेक्ष्णयाव्या
घारयतितस्मादक्ष्णयापशवोंगानिप्रहरंतिप्रतिष्ठित्यैभूतेभ्यस्त्वेतिस्रुचमुद्गृह्णा
तियएवदेवाभूतास्तेषांतद्भागधेयंतानेवतेनप्रीणातिपौतुद्रवान्परिधीन्परिदधात्ये
षां॥३॥लोकानांविधृत्याअग्नेस्त्रयोज्यायाऽसोभ्रातरआसंतेदेवेभ्योहव्यंवहंतः

प्रामीयंतसोग्निरविभेदित्थंवावस्यआर्तिमारिष्यतीतिसनिलायतसयांवनस्पतिष्ववसत्तांघृतुद्रौयामोषधीषुतानंसुगंधितेजनेयांपशुषुतांपेत्वस्यांतराश्टृंगेतंदेवताःप्रैषमैछंतमन्ववविंदंतमब्रुवंन्॥४॥उपनआवर्तस्वहव्यंनोवहेतिसोब्रवीद्वरंवृणैयदेवगृहीतस्याहुतस्यबहिःपरिधिस्कंदात्तन्मेभ्रातॄणांभागधेयमसदितितस्माद्यद्गृहीतस्याहुतस्यबहिःपरिधिस्कंदतितेषांतद्भागधेयंतानेवतेनप्रीणातिसोमन्यतास्थन्वंतोमेपूर्वेभ्रातरःप्रामेषतास्थानिशातयाइतिसयानि॥५॥अस्थान्यशातयततत्पूतुद्रुभवद्यन्मांसमुपमृतंतद्गुल्गुलुयदेतांत्संभारांत्संभरत्यग्निमेवतत्संभरत्यग्नेःपुरीषमसीत्याहाग्नेर्हेतत्पुरीषंयत्संभाराअथोखल्वाहुरेतेवावैनंतेभ्रातरःपरिशेरेयत्पूतुद्रवाःपरिधयइति॥६॥वित्वादेवयतएषामब्रुवन्यानिचतुश्च

त्वारिंशच्च॥८॥ ॥बद्धमवस्यतिवरुणपाशादेवैनेमुंचतिप्रणेनेक्तिमेध्यएवैनेक
रोतिसावित्रियर्चाहुत्वाहविर्धानेप्रवर्तयतिसवितृप्रसूतएवैनेप्रवर्तयतिवरुणोवाए
षदुर्वागुभयतोबद्धोयदक्षःसयदुत्सर्जेद्यजमानस्यगृहानभ्युत्सर्जेत्सुवाग्देवदुर्यां
आवदेत्याहगृहावैदुर्याःशांत्यैपत्नी॥१॥उपानक्तिपत्नीहिसर्वस्यमित्रंमित्रत्वायय
द्वैपत्नीयज्ञस्यकरोतिमिथुनंतदथोपत्नियाएवैषयज्ञस्यान्वारंभोनवछित्त्यैवर्त्मना
वाअन्वित्ययज्ञंरक्षांसिजिघांसंतिवैष्णवीभ्यामृग्भ्यांवर्त्मनोर्जुहोतियज्ञोवैविष्णु
र्यज्ञादेवरक्षांस्यपहंतियदध्वर्युरनग्नावाहुतिंजुहुयादंधोध्वर्युस्याद्रक्षांसिय
ज्ञंहन्युः॥२॥हिरण्यमुपास्यजुहोत्यग्निवत्येवजुहोतिनांधोध्वर्युर्भवतिनयज्ञंरक्षां
सिघ्नंतिप्राचीप्रेतमध्वरंकल्पयंतीइत्याहसुवर्गमेवैनेलोकंगमयत्यत्ररमेथांवर्ष्मन्

सं०५०२ थिव्याइत्याहवर्ष्मह्येतत्पृथिव्यायद्देवयजनꣳशिरोवाएतद्यज्ञस्ययद्धविर्धानंदिवोवाविष्ण
२६ उतवापृथिव्याः॥३॥इत्याशीर्पदयर्चादक्षिणस्यहविर्धानस्यमेथींनिहंतिशीर्षतएवय
ज्ञस्ययजमानआशिषोवरुंधेदंडोवाऔपरस्तृतीयस्यहविर्धानस्यवषट्कारेणाक्षम
छिनद्यत्तृतीयंछदिर्हविर्धानयोरुदाहियतेतृतीयस्यहविर्धानस्यावरुध्यैशिरोवाएतद्य
ज्ञस्ययद्धविर्धानंविष्णोरराटमसिविष्णोःपृष्ठमसीत्याहतस्मादेतावधाशिरोविष्यू
तंविष्णोःस्यूरसिविष्णोर्ध्रुवमसीत्याहवैष्णवꣳहिदेवतयाहविर्धानंयंप्रथमंग्रंथिंग्र
थ्नीयाद्यत्तंनविस्रꣳसयेदमेहेनाध्वर्युःप्रमीयेततस्मात्सविस्रस्यः॥४॥पत्नीहत्युर्वी
पृथिव्याविष्यूतंविष्णोःषड्विꣳशतिश्च॥९॥ ॥देवस्यत्वासवितुःप्रसवइत्यभ्रिमादत्ते २६
प्रसूत्याअश्विनोर्बाहुभ्यामित्याहाश्विनौहिदेवानामध्वर्यूआस्तांपूष्णोहस्ताभ्यामि

त्याहयत्यैववज्रइववाएषायदभ्रिरभ्रिरसिनारिरसीत्याहशांत्यैकांडेकांडेवैक्रियमाणे
यज्ञंरक्षांसिजिघांसंतिपरिलिखितंरक्षःपरिलिखिताअरातयइत्याहरक्षसा
मपहत्यै॥१॥इदमहंरक्षसोग्रीवाअपिकृंतामियोस्मान्द्वेष्टियंचवयंद्विष्मइत्याहद्वौवा
वपुरुषौयंचैवद्वेष्टियश्चैनंद्वेष्टितयोरेवानंतरायंग्रीवाःकृंततिदिवेत्वांतरिक्षायत्वापृथि
व्यैत्वेत्याहैभ्यएवैनांलोकेभ्यःप्रोक्षतिपरस्तादर्वाचींप्रोक्षतितस्मात्॥२॥परस्तादर्वाचीं
मनुष्याऊर्जमुपजीवंतिक्रूरमिववाएतत्करोतियत्खनत्यपोवनयतिशांत्यैयवमतीरव
नयत्यूर्ग्वैयवऊर्गुदुंबरऊर्जैवोर्जंसमर्धयतियजमानेनसंमितोदुंबरीभवतियावानेव
यजमानस्तावतीमिवास्मिन्नूर्जंदधातिपितृणांसदनमसीतिबर्हिरवस्तृणातिपितृ
देवत्यं॥३॥ह्येतद्यन्निखातंयद्बर्हिरनवस्तीर्यमिनुयात्पितृदेवत्यानिखातास्याद्बर्हिर

ष०प्र०२ बस्तीर्यमिनोत्यस्यामेवैनांमिनोत्यथोस्वारुहमेवैनांकरोत्यद्दिवं॑स्तभानांतरिक्षंपृ
२८ णेत्याहैषांलोकानांविधृत्यैघृतानस्वामारुतोमिनोत्वित्याहघृतानोहस्मवैमारुतो
देवानामौडुंबरींमिनोतितेनैव॥४॥एनांमिनोतिब्रह्मवनिंत्वाक्षत्रवनिमित्याहयथाय
जुरेवैतद्दृंहतेनद्यावापृथिवीआपृणेथामित्यौडुंबर्यंजुहोतिद्यावापृथिवीएवरसेनान
नयांतमन्ववस्त्रावयत्यांतमेवयजमानंतेजसान तैंद्रमसीतिच्छदिरधिनिदधात्यैं
द्रंहिदेवतयासदोविश्वजनस्यछायेत्याहविश्वजनस्यह्येषाछायायत्सदोनवछ
दि॥५॥तेजस्कामस्यमिनुयात्त्रिवृतास्तोमेनसंमितंतेजस्त्रिवृत्तेजस्व्येवभवत्येकादश
छदींद्रियकामस्यैकादशाक्षरात्रिष्टुबिंद्रियंत्रिष्टुबिंद्रियाव्येवभवतिपंचदशछदिर्भ्रा २८
तृव्यवतःपंचदशोवज्रोभ्रातृव्याभिभूत्यैसप्तदशछदिप्रजाकामस्यसप्तदशःप्रजा

पतिः प्रजापतेराप्त्या एकविंशतिछदिप्रतिष्ठाकामस्यैकविंशः स्तोमानांप्रतिष्ठाप्रति
ष्ठित्या उदरंवैसद ऊर्गुदुंबरो मध्यत औदुंबरीं मिनोति मध्यत एव प्रजानामूर्जंदधातित
स्मात्॥८॥मध्यत ऊर्जंभुंजते यजमानलोके वै दक्षिणानिछदीः षिभ्रातृव्यलोक उत्त
राणि दक्षिणान्युत्तराणि करोति यजमानमेवायजमानादुत्तरंकरोति तस्माद्यजमा
नो यजमानादुत्तरोंतर्वर्त्तान्करोति व्यावृत्त्यै तस्मादरण्यं प्रजा उपजीवंति परित्वागिर्व
णो गिर इत्याह यथायजुरेवैतदिंद्रस्य स्यूरसीद्रस्य ध्रुवमसीत्यैंद्रं हि देवतया सदो
यं प्रथमं ग्रंथिं ग्रथ्नीयाद्यत्तं न विस्रंसयेदमेहेनाध्वर्युः प्रमीयेत तस्मात्तं विस्रस्यः॥९॥अ
प हत्यै तस्मात्पितृदेवत्यं तेनैव नवछदितस्मात्सदः पंच दशाच॥१०॥ ॥शिरो वा एतद्य
ज्ञस्य यद्धविर्धानं प्राणा उपरवा हविर्धाने खायंते तस्माच्छीर्षन्प्राणा अधस्तात्खायं

ष०स० तितस्मादथस्ताच्छीर्ष्णःप्राणारक्षोहणोवलगहनोवैष्णवान्खनामीत्याहवैष्णवाहिदे
२८ वतयोपखाअसुरावैनिर्यंतोदेवानांप्राणेषुवलगान्न्यखनंतान्वाङ्मात्रेन्वविंदंत
स्माद्वाङ्मात्राःखायंतइदमहंतंवलगमुद्वपामि॥१॥यंनःसमानोयमसमानोनिच
खानेत्याहद्वौवावपुरुषौयश्चैवसमानोयश्चासमानोयमेवास्मैतौवलगंनिखनतस्तमे
वोद्वपतिसंतृणत्तितस्मात्संतृणाअंतरतःप्राणानसंभिनत्तितस्मादसंभिंनाःप्राणा
अपोवनयतितस्मादार्द्राअंतरतःप्राणायवमतीरवनयति॥२॥ऊर्ग्वैयवःप्राणाउप
खाःप्राणेष्वेवोर्जंदधातिबर्हिरवस्तृणातितस्माल्लोमशाअंतरतःप्राणाआज्येनव्या
घारयतितेजोवाआज्यंप्राणाउपखाःप्राणेष्वेवतेजोदधातिहनूवाएतेयज्ञस्ययदधि २९
षवणेनसंतृणत्त्यसंतृण्णेहिहनूअथोखलुदीर्घसोमेसंतृद्येधृत्यैशिरोवाएतद्यज्ञस्य

यद्धविर्धानं॥३॥प्राणाउपरवाहनूअधिषवणेजिह्वाचर्मग्रावाणोदंतामुखमाहव
नीयोनासिकोत्तरवेदिरुदरंसदोयदाखलुवैजिह्वयादत्स्वधिखादत्यथमुखंगछति
यदामुखंगछत्यथोदरंगछतितस्माद्धविर्धानेचर्मन्नधिग्रावभिरभिषुत्याहवनीयेहुत्वा
प्रत्यंचःपरेत्यसदसिभक्षयंतियोवैविराजोयज्ञमुखेदोहंवेददुहएवैनामियंवैविराट्त
स्यैत्वक्चर्मोधोधिषवणेस्तनाउपरवाग्रावाणोवत्साऋत्विजोदुहंतिसोमःपयोयए
वंवेददुहएवैनां॥४॥वपामियवमतीरवनयतिहविर्धानमेवत्रयोविंशतिश्च॥११॥
॥ ॥यदुभौदेवासुरामिथस्तेषांस्वर्गंयद्वाअनीशानःपुरोहविषितेभ्यउत्तरवेदिःसो
त्तरवेदिर्वध्यंदेवस्याग्निःशिरोवाएकादश॥११॥ ॥यदुभावित्याहदेवानांयज्ञोदेवे
भ्योनरथाययजमानायपरस्तादर्वाचीनवपंचाशत्॥५१॥ ॥७॥ ॥हरिःॐ॥ ॥

ष०स०३ ॥ ॥चात्वालाद्धिष्णियानुपवपतियोनिर्वैयज्ञस्यचात्वालंयज्ञस्यसयोनित्वायदेवावै
२९ यज्ञंपराजयंततमाग्नीध्रात्पुनरपाजयंनेतद्वैयज्ञस्यापराजितंयदाग्नीध्रंयदाग्नी
ध्राधिष्णियान्विहरतियदेवयज्ञस्यापराजितंततएवैनंपुनस्तनुतेपराजित्येवरव
लुवाएतेयंतियेबहिष्पवमानंसर्पंतिबहिष्पवमानेस्तुते॥१॥आहाग्नीदग्नीन्वि
हरबर्हिस्तृणाहिपुरोडाशाँअलंकुर्वितियज्ञमेवापजित्यपुनस्तन्वानायंत्यंगा
रैर्द्वेसवनेविहरतिशलाकाभिस्तृतीयंसशुक्रत्वायाथोसंभरत्येवैनद्धिष्णियावा
अमुष्मिंलोकेसोममरक्षंतेभ्योधिसोममाहरंतमन्ववायंतंपर्यविशन्यएवंवेदवि
दते॥२॥परिवेष्टारंतेसोमपीथेनव्यार्ध्यंततेदेवेषुसोमपीथमैछंततादेवाअब्रुवंद्वे २९
द्वेनामनीकुरुध्वमथप्रवाप्स्यथनवेत्यग्नयोवाअथधिष्णियास्तस्माद्विनामाब्रा

ह्मणोर्धकस्तेषांयेनेदिष्ठंपर्यविशंस्तेसोमपीथंप्राप्नुवंनाहवनीयआग्नीध्रीयोहोत्री
योमार्जालीयस्तस्मात्तेषुजुह्वत्यतिहायवषट्करोतिविहि॥३॥एतेसोमपीथेनार्ध्यंतदे
वावैयाःप्राचीराहुतीरजुहवुर्यैपुरस्तादसुराआसंतांस्ताभिरपानुदंतयाःप्रती
चीर्यैपश्चादसुराआसंतांस्ताभिरपानुदंतप्राचीरन्याआहुतयोहूयंतेप्रत्यङा
सीनोधिष्णियान्व्याघारयतिपश्चाच्चैवपुरस्ताच्चयजमानोभ्रातृव्यान्प्रणुतेतस्मा
त्पराचीःप्रजाःप्रवीयंतेप्रतीचीः॥४॥जायंतेप्राणावाएतेयद्धिष्णियायदध्वर्युःप्र
त्यङ्धिष्णियानतिसर्पेत्प्राणांत्संकर्षेत्प्रमायुकःस्यान्नाभिर्वाएषायज्ञस्ययद्धोतो
र्ध्वःखलुवैनाभ्यैप्राणोवाङपानोयदध्वर्युःप्रत्यङ्होतारमतिसर्पेदपानेप्राणंदध्या
त्प्रमायुकःस्यान्नाध्वर्युरुपगायेद्वाग्वीर्योवाअध्वर्युर्यदध्वर्युरुपगायेदुद्गात्रे॥५॥

स्याजोवक्तुंनदीक्षांनतपांसिभ्यःसमिदिरेदीक्षितस्यदेवतासोस्मादेतर्हितिरइव
त पर्हियातिमीभ्युंऽरक्षांऽसिहंतोः॥३॥भद्रादभिश्रेयःप्रेहिबृहस्पतिः
त्वा पुरएतातेअस्तिविहब्रह्मवैदेवानांबृहस्पतिस्तमेवान्वारभंतेसएनं
ऽसंपारयत्सेदमगन्मदेवयजनंपृथिव्याइत्साहदेवयजनंऽह्येषपृथि
व्याआगच्छतियोयजतेविश्वेदेवायदजुषंत पूर्वइत्साहविश्वेह्येतंदेवा
जोषयंते यद्ब्राह्मणा ऋक्सामाभ्यांयजुषासंतरंतइत्साहऋक्सामाभ्यांऽ
ह्येषयजुषासंतरतियोयजतेरायस्पोषेणसमिषामदेमे साहाशिषमे
वैतामाशास्ते॥४॥यजमानोदीक्षाऽहंतोब्राह्मणाअनुविऽशंतिश्च ॥

सं० तृ १

एषतेगायत्रोभागइतिमेसोमायब्रूतादेषतेत्रैष्टुभोजागतोभागइतिमेसोमा
२ यब्रूताच्छंदोमानांसाम्राज्यंगच्छेतिमेसोमायब्रूतायोवैसोमंराजानंसाम्राज्यं
लोकंगमयित्वाक्रीणातिगच्छतिस्वानांसाम्राज्यंछंदांसिखलुवैसोमस्यराज्ञः नु
साम्राज्योलोकःपुरस्तात्सोमस्यक्रयादेवमभिमंत्रयेतसाम्राज्यमेनं॥१॥एनंलो
कंगमयित्वाक्रीणातिगच्छतिस्वानांसाम्राज्यंयोवैतानूनप्त्रस्यप्रतिष्ठांवेद
है प्रत्येवतिष्ठतिब्रह्मवादिनोवदंतिनप्राश्नंतिनजु स्वथक्वतानूनप्त्रंप्रतिति
ष्ठतीतिप्रजापतौमनसीतिब्रूयात्त्रिराजिघ्रेत्प्रजापतौत्वामनसिजुहोमीति
य एवं षावैतानूनप्त्रस्यप्रतिष्ठावेदप्रत्येवतिष्ठतियः॥ वाअध्वर्योःप्रतिष्ठांवेद
प्रत्येवतिष्ठतियतोमन्येतानभिक्रम्यहोष्यामीतितत्तिष्ठन्नाश्रावयेदेषावा

अध्वर्योः प्रतिष्ठाय एवं चेदु स एव निष्ठति यदभिक्रम्य जुहुयात्प्रतिष्ठाया इयात्तस्मात्समा
नत्रतिष्ठन्नाहोतव्यं प्रतिष्ठितस्य यो वा अध्वर्योः स्वं वेद स्ववान्नेव भवति सुग्वा अस्य स्वं वायव्य
मस्य ॥३॥ स्वं चमसोऽस्य स्वं यद्वा यूथ्यं वा चमसं वानन्वारभ्या श्रावयेत्स्वादियात्तस्मादन्वा
रभ्या श्राव्यं स्यादेव नेति यो वै सोममप्रतिष्ठाप्य स्तोत्रमुपाक रोसप्रतिष्ठितः
सोमो भवत्यप्रतिष्ठितः स्तोमोऽप्रतिष्ठितान्युक्थान्यप्रतिष्ठितो यजमानोऽप्रतिष्ठितो
ध्वर्युर्वायव्यं वै सोमस्य प्रतिष्ठा चमसोऽस्य प्रतिष्ठा सोमस्तोमेऽउक्थानां ग्रहं वा गृही स्युतो
त्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यात्स एव सोमं स्थापयति प्रतिस्तोमं प्रत्युक्था
नि प्रतियजमानः प्रतिष्ठत्यप्रत्यध्वर्युः ॥४॥ एव तिष्ठति यो वायव्यमस्य ग्रहं
वै कां न विंशाति ॥५॥ पूतं वा एनत्सं भरन्ति यत्सोमं यैष्ये पदं यन्तमुरव४ क

सं०त१

हविर्धाने यर्हि हविर्धाने प्राची प्रवर्तयेयुस्तर्हि तेनाक्षमुपाञ्जाघत्तमुख एव
प्रशमनुसंतनोति प्राञ्चमग्निं प्रहरन्त्युत्सल्लीमानयं स्यन्नवाशिप्रवर्तयेयं स्यथवा अ
।३।। य स्येषधिष्ण्यायाहीयते सोनुध्यातिस ईश्वरोरुद्रोभूत्वा ।।१।। प्रजां पशून्यजमानस्याभि
तर्हितस्य मन्तोर्यर्हि पशुमाप्रीतमुदञ्चं नयन्ति पशुश्रपणं हरन्ति तर्हि वैनं भागिनं करोति य
ह जमानो वा आहवनीयो यजमानं वा एतद्विकर्षन्ति यदाहवनीयात्पशुश्रपणं हरन्
य तिस एव स्यादग्निं मथित्वा कुर्याद्यजमानस्य सात्मत्वाय यदि पशोरवदानं नश्येदा ष्यै
ज्यस्य प्रत्याख्यायमवद्येत्सैव ततः प्रायश्चित्तिर्ये पशुं विमथ्नीरन्यस्तान्कामये
तार्तिमार्छेयुरिति कुविदङ्गेति नमोवृक्तिवत्यर्चाग्नीध्रे जुहुयान्नमोवृक्तिमेवैषां वृ
ङ्क्ते ताजगार्तिमार्छन्ति ।।२।। भूत्वा ततः षड्विंशतिश्च ।।३।। प्रजापतेर्जायमाना ।३।।

प्रजानाना श्नयाद्दमाः॥ तस्मै प्रतिप्रवेदय चिकित्वाँऽ अनुमंन्यतां॥ इमं पशुं पशुपते
ते अद्य बध्नाम्यग्ने सुकृतस्य मध्ये॥ अनुमंन्यस्व सुयजाय जामजुष्टं देवानामिदमस्तु
हव्यं॥ प्रजानंतः प्रतिगृह्णंति पूर्वे प्राणमंगेभ्यः पर्याचरंतं॥ सुवर्गंयाहि पथिभिर्देवया
नैरोषधीषु प्रतितिष्ठा शरीरैः॥ येषामीशे॥१॥ पशुपतिः पशूनां चतुष्पदामुत च द्वि
पृ पदां॥ निष्क्रीतो यं यज्ञियं भागमेतु रायस्पोषा यजमानस्य संतु॥ ये बध्यमानमनु बध्य
माना अभ्यैक्षंत मनसा चक्षुषा च॥ अग्निस्ताँऽ अग्रे प्रमुमोक्तु देवः प्रजापतिः प्रजया सं
विदानः॥ प्रमुंचमानाः॥२॥ भुवनस्य रेतो गातुं धत्त यजमानाय देवाः॥ उपाकृतँऽ
शशमानं यदस्थाज्जीवं देवानामप्येतु पाथः॥ नाना प्राणो यजमानस्य पशुना यज्ञो देवेभिः सह दे नः॥
२ य आरण्याः पशवो विश्वरूपा विरूपाः संतो बहुधैकरूपाः॥ वायुस्ताँऽ अग्रे प्रमुमोक्तु देवः प्रजा
पतिः प्रजया संविदानः॥

स॰ त१

४

जीवंदेवानामप्येतुपाथः सत्यासंतुयमानस्यकामाः॥यत्पशुर्मायुमकृतोरोवापद्भिराहते॥
अग्निर्मातस्मादेनसो विश्वान्मुंचत्वंहसः॥शमितारउपेतनयज्ञं॥३॥देवेभिरि
न्वितं॥पाशात्पशुंप्रमुंचतबंधाद्यज्ञपतिंपरि॥अदितिःपाशंप्रमुमोक्तुतंनमःप
शुभ्यःपशुपतयेकरोमि॥अरातीयंतमधरंकृणोमियंद्विष्मस्तस्मिन्प्रतिमुंचा
मिपाशं॥त्वामुतेदधिरेहव्यवाहंशृतंकर्तारमुतयज्ञियंच॥अग्नेसदक्षःसतनुर्हिभू
त्वाथहव्याजातवेदोजुषस्व॥जातवेदोवपयागच्छदेवांत्वंहिहोताप्रथमोबभूथ॥
घृतेनत्वंतनुवोवर्धयस्वस्वाहाकृतंहविरदंतुदेवाः॥स्वाहादेवेभ्योदेवेभ्यःस्वा
हा॥४॥इमेप्रमुंचमानायत्तत्वंषाडन्नाच॥४॥प्राजापत्यावैपशवस्तेषांरुद्रोधि ४

रं त ग भ्यः

पतिर्यदेताभ्यामुपाकरोतिताभ्यामेवैनंप्रतिप्रोच्यालभतआत्मनोनाव्रस्कायद्वाभ्यामु
पाकरोतिद्विपाद्यजमानःप्रतिष्ठित्याउपाकृत्यपंचजुहोतिपाङ्क्ताःपशवःपशूनेवावरुंधे
मृत्यवेवाएषनीयतेयत्पशुस्तंयदन्वारभेतप्रमायुकोयजमानस्स्यान्नानारभ्यायज
मानस्यपशुनेसाहव्यावृत्से॥१॥यत्पशुर्मायुमकृतेतिजुहोतिशांत्यैशमितारउ
पेतनेत्याहयथायजुरेवैतद्वपायांवाआह्रियमाणायामग्नेर्मेधोपक्रामतितामुत्ते
दधिरेहव्यमग्नेमितिवपामभिजुहोत्यग्नेरेवमेधमवरुंधेथोश्रुतत्वायपुरस्तात्स्वा
हाकृतयोवाअन्येदेवाउपरिष्टात्स्वाहाकृतयोन्येस्वाहादेवेभ्योदेवेभ्यःस्वाहेत्यभि
तोवपांजुहोतितानेवोभयान्प्रीणाति॥२॥व्यावृत्सेअभितोवपांपंचच॥५॥

हत

स०त्र१

यो वा अयथादेवतं यज्ञमुपचरत्यादेवताभ्यो वृश्च्यते पापीयान्भवति यो यथादेवतं न देव
५ ताभ्य आवृश्च्यते वसीयान्भवत्याग्नेय्यर्चाग्नीध्रमभिमृशेद्वैष्णव्या हविर्धानमाग्नेय्या स्रु
चो वायव्या वायव्यान्यैन्द्रिया सदो यथादेवतमेव यज्ञमुपचरति न देवताभ्य आवृश्च्य
ते वसीयान्भवति युनज्मि ते पृथिवीं ज्योतिषा सह युनज्मि वायुमन्तरिक्षेण ॥१॥
ते सह युनज्मि वा[illegible] च सह सूर्येण ते युनज्मि तिस्रो विपृचः सूर्यस्य ते ॥ अग्नि
त्री र्देवता गायत्रं छन्द उपांशोः पात्रमसि सोमो देव[illegible]ता त्रिष्टुप् छन्दो न्तर्यामस्य पात्र
मसीन्द्रो देवता जगती छन्द [illegible] इन्द्रवायुवोः पात्रमसि बृहस्पतिर्देवतानुष्टुप् छं
त्रा दो मि[illegible] वरुणयोः पात्रमस्यश्विनौ देवता पङ्क्तिश्छन्दो श्विनोः पात्रमसि सूर्यो देवता बृहती ॥

५

तो जो हवी भिते नो मुंचं त्वेन सः ॥ देवानां मन्वे अधिनो ब्रु
वंतु प्रेमां वाचं विश्वाम वंतु विश्वे ॥ आशून्हुवे सुयामानू
त यते नो मुंचं त्वेन सः ॥ यदि दं मा भि शोचति पोरुषेये
ण दैव्येन ॥ स्तो भि विश्वांदेवान्ना थितो जो हवी भिते नो
पा+ मुंचं त्वेन सः ॥ अनु नो द्यानु मतिरनु ॥ ५ ॥ इदनु मते त्वं
वैश्वानरो न उत्या पृष्ठो दिवि ॥ ये अप्र थेता म मितेभि
रोजोभिर्ये प्रतिष्ठे अभ वतां वसूनां ॥ स्तो भि द्यावापृथि

१८

वीना। थितोजेोहवी। मितेनो मुंचत मं॑हसः॥ उवः रोदसी वारि
वरिवः कृणोतं क्षेत्रस्यपत्नी अधिनोब्रूयातं॥ स्तो मिद्यावा
पृथिवीना। थितोजेोहवी। मितेनोमुचतमं॑हसः॥ यत्तेवय
पुरुषत्राय विष्ठा विद्वां॑सश्च कृमा क [illegible] ह्वना॥ ६॥ अ
गः॥ कृधीष्वस्मां॑ अदितेरनागा व्येनां॑सि शिश्रथो विष्व
मे॥ यथाहतद्वसवो गौर्यं चित्पादिषिता ममुंचेता यत्राः॥
एवात्व मस्मत्प्रमुंचाव्यं॑हः प्रातार्यग्ने प्रतरांन
आयुः॥ ॥ ७॥ गंतां ट्रप यंत्त्वे। मियुयोः २ धेनुमति

सि
ज

१८

श्रावा

श्विनो रनुचनन्चतुस्त्रिं॑शाज्ञ ॥१५॥ ७ु॥ अग्नेर्मन्वेयस्युद्रमिंद्रस्ययसंश्र
मं॑सनो मुंचतं॑ हसः ॥ मन्वेवां ता नो मुंचतमागसः ॥ योवांवा
योरुपरथान्तमौयद्दयात तौ नो मुंचतमागसः ॥ मरुतांतिग्म
दं स्वानांयदिते नो मुंचेत्वेनसः ॥ अनुनुउर्वी यत्ते नो मुंचतमं॑ह
सो ॥ चतुरं॑हसःषडागसः श्वतुरनसो हिरं॑हसः ॥ अग्ना
विष्णूज्येष्ठयं॑शांचोक्वाभ्मा चाग्निश्वा॑शुश्वे धम श्वा मिश्वग
भाश्वे कावबाजो नोम्न युनज्मिममामिप्रर्मिन्वेप वदन्त ॥ अग्नामि
मे पूष्र अग्निश्ववाजेनो अर श्योगोपानवत्रिं॑शातू ॥ हरी ॐ श्री
सर्वधारिनामसंवत्सरे वेशाखवस्तुध १०गु ॥ संपूर्ण ॥ गोपालनास्व
हस्ता ॥ ॥ ५२ ॥ ६४ ॥ ३१

७१

०॥श्री चतुर्थाष्टकसंहित समाप्त॥०

७१